‘अविज्ञातनिवेशत्वाद्यत्र मूलं[1] न विद्यते ।
हानिस्तत्र समा कल्प्या क्रेतृ-नाष्टिकयोर्द्वयोः’ ॥

इति । [2]अस्वामी विक्रेतुरिव स्वाम्यदत्तमुपभुञ्जानस्यापि दण्डमाह नारदः—

‘उद्दिष्टमेव भोक्तव्यं स्त्री पशुर्वसुधाऽपि वा ।
[3]अनर्पितं तु यो भुंक्ते भुक्तभोगं प्रदापयेत् ॥
[4]अनिर्दिष्टं तु यद्द्रव्यं [5]वासः क्षेत्रं गृहादिकम् ।
स्वबलेनैव भुञ्जानश्चोरवद्दण्डमर्हति ॥
अनड्वाहं तथा धेनुं [6]नावं दासं तथैव च ।
अनिर्दिष्टं तु[7] भुञ्जानो दद्यात् पणचतुष्टयम् ॥
दासी नौका तथा धुर्यो बन्धकं नोपर्[8]युज्यते ।
उपभोक्ता तु तं द्रव्यं पण्येनैव विशोधयेत् ॥
दिवसे द्विपणं दासीं धेनुमष्टपणं[9] तथा ।
त्रयोदशमनड्वाहम[10]श्वं [11]भूमिं च षोडश ॥
नौकामश्वं च धेनुं च लाङ्[12]गलं कार्मिकस्य च ।
बलात्कारेण यो भुङ्क्ते दाप्यश्चा[13]ष्टपणं दिने ॥

---

१. D. reads मूल्यं for मूलं. २. D. reads this sentence and the following half verse, above, between द्रव्यहानिकरंबुधैः and अविज्ञातस्थानकात्. ३. C. reads अनर्थितं for अनर्पितं. ४. C. reads अनिर्दिशं for अनिर्दिष्टं. ५. C. and D. read सक्षेत्रं च for वासः क्षेत्रं. ६. A. in margin and B. originally read अश्वं for नावं. ७. D. reads स for तु. ८. A. in margin B. and D. read °भुज्यते for °युज्यते. ९. A. and C. read अष्टापणं for अष्टपणं. १०. D. reads मत्स्यं for °मश्वं. ११. B. in margin and C. read तानेव for भूमिं. १२. B. C. and D. read लांगूलं for लांगलं. १३. C. reads °श्च सपणं दमम् for °श्चाष्टपणं दिने.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

ऊलूखले पणार्धं तु मुसलस्य[1] पणद्वयम् ।
शूर्पस्य च पणार्धं तु द्वे पणे मुनिरब्रवीत्[2]' ॥
(ना. स्मृ. ११. ३-१०.)

इति ।

इत्यस्वामिविक्रयाख्यं पदं समाप्तम् ।

अथ सम्भूयसमुत्थानाख्यं पदमुच्यते । तस्य स्वरूपं नारद आह—

'वणिक्प्रभृतयो यत्र कर्म[3] सम्भूय कुर्वते ।
तत् सम्भूयसमुत्थानं व्यवहारपदं स्मृतम्' ॥
(ना. स्मृ. ३. १.)

इति । तत्राधिकारिणो दर्शयति बृहस्पतिः—

'कुलीन-दक्षा-ऽनलसैः प्राज्ञैर्नाणकवेदिभिः ।
आय-व्ययज्ञैः शुचिभिः शूरैः कुर्यात् सहक्रियाम्' ॥

इति । क्रियां कृषि-वाणिज्य-शिल्प[4]-क्रतु-सङ्गीत-सैन्यात्मिकाम्[5] । नाणकविज्ञानी[6] वाणिज्यक्रियायामुपयुज्यते । आय-व्ययज्ञानमात्रं कर्षक[7]क्रियायाम् । सङ्गीतादिशिल्प[8]क्रियायां प्राज्ञत्वमुपयुज्यते । क्रतुक्रियायां तु कुलीनत्व-प्राज्ञत्व-शुचित्वानि[9] । सैन्य[10]क्रियायां शूरत्वमात्रम् । दक्षत्वा-ऽनलसत्वे तु सर्वत्रोपयुज्येते । अतएवा[11]-ऽदक्षादीन् निषेधति स एव—

---

१. D. reads मुशलस्य for मुसलस्य. २. B. originally reads जैमिनिः; while in margin द्वैविध्यं, D. also reads द्वैविध्यं for द्वे पणे. ३. C. reads क्रमं; while D. क्रयं for कर्म. ४. D. reads °शिल्पि° for °शिल्प°. ५. C. reads °स्तैन्यात्मकाम् for °सैन्यात्मिकाम्. ६ B. and D. read °विज्ञानं for °विज्ञानी. ७. C. and D. read कृषि° for कर्षक°. ८. C. reads °शिल्पि° for °शिल्प° ९. A. omits °शुचित्वानि; while C. reads °शुचित्वादि for °शुचित्वानि. १०. C. reads चैत्य° for °सैन्य°. ११. C. reads एव दक्षादीन्; while C. एव दक्षादि for एवाऽदक्षादीन्.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

' असक्ता-ऽलस-रोगार्त-मन्दभाग्य-निराश्रयैः ।
वाणिज्याद्याः सहैतैस्तु न कर्तव्या बुधैःक्रियाः' ॥
(ना. स्मृ. ३. ४.)

इति । ये तु सम्भूय वाणिज्यादिक्रियां कुर्वन्ति ते द्रव्यानुसारेण लाभभाजः । तथाच बृहस्पतिः—

' प्रयोगं कुर्वते ये तु हेम-धान्य-रसादिना ।
सम-न्यूनाऽधिकैरंशैर्लाभस्तेषां तथाविधः ' ॥

इति । लाभवदेव व्ययादिरपि तथैवेत्याह स एव—

' समो न्यूनाधिको वांशो येन क्षिप्तस्तथैव सः ।
व्ययं दद्यात् कर्म कुर्याल्लाभं गृह्णीत चैव हि ' ॥

इति । द्रव्यानुसारेण लाभ इत्यस्यापवादमाह याज्ञवल्क्यः—

' समवायेन वणिजां लाभार्थं कर्म कुर्वताम् ।
लाभालाभौ यथाद्रव्यं यथा वा संविदा कृतौ ' ॥
(या. स्मृ. २. २५९.)

इति । संविदा समयेन । पुरुषविशेषानुसारेण कृतौ कल्पितौ

१. C. reads अशक्ता-ऽलस-दुर्बुद्धि° for अशक्ता-ऽलस-रोगार्त°. २. B. C. D. read तथाविधिः for तथाविधः. ३. C. reads लाभस्तेषां तथाविध; while D. ततस्तेषां तथाविधः for लाभं गृण्हीत चैव हि. ४. C. omits द्रव्या°. ५. C. reads संविदा क्रीतौ for संविदा कृतौ.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

लाभालाभौ ज्ञेयौ । न तु द्रव्यानुसारेण इत्यर्थः* । सम्भूय कारिणां कर्तव्यमाह व्यासः—

'समक्षमसमक्षं वा ऽवञ्चयन्तः परस्परम् ।
नानापण्यानुसारात्ते प्रकुर्युः क्रय-विक्रयौ ॥
[2]अगोपयन्तो भाण्डानि शुल्कं दद्युश्च तेऽध्वनि ।
अन्यथा द्विगुणं दाप्याः शुल्कस्थानात् बहिःस्थिताः' ॥

इति । नारदोऽपि—

'§ भांडं[4]-पिण्ड-व्ययोद्धार-भार-साराद्यवेक्षणम् ।
कुर्युस्तेऽव्यभिचारेण समये स्वे व्यवस्थिताः ' ॥
(ना. स्मृ. ३. ४.)

इति । सम्भूयकारिणां परस्परं विवादे निर्णयप्रकारमाह बृहस्पतिः—

---

* अत्र विज्ञानेश्वरः—'सर्वे वयमिदं कर्म मिलिताः कुर्म' इत्येवंरूपा सम्प्रतिपत्तिः समवायः । तेन ये वणिङ्-नट-नर्तकप्रभृतयो लाभलिप्सवः प्रातिस्विकं कर्म कुर्वते तेषां लाभालाभौ उपचयापचयौ यथाद्रव्यं येन यावत् द्रव्यं पण्यग्रहणाद्यर्थं दत्तं तदनुसारेणावसेयौ । यद्वा । प्रधानगुणभावपर्यालोचनया अस्य भागद्वयं अस्य एको भागः इत्येवंरूपया संविदा समयेन यथा सम्प्रतिपन्नौ तथा वेदितव्यौ' । एतेन द्रव्यानुसारेण संविदनुसारेण वा भागकल्पनं विज्ञानेश्वरस्य सम्मतमिति स्पष्टम् ।

§ भाण्डं मूलधनं, पिण्डः क्रीतपदार्थः, व्ययः मूल्यादिरूपेण व्ययितं द्रव्यं, उद्धारो लाभः, भारः क्रीतद्रव्यस्य तुलामानं, सारः द्रव्यस्य स्थिरोंऽशः इत्यादीनां ते भागिनः अवेक्षणं कुर्युः । कृतसमयानुसारेण भागिभिः भाण्डाद्यवेक्षणं कर्तव्यमित्यर्थः

---

१. B. and D. read वंचयंतः° for ऽवंचयंतः. २. B. and C. read अगोपयन्तौ for अगोपयन्तो. ३. D. reads दाप्यः for दाप्याः. ४. A. and B. read भाण्डी भाण्डव्ययोद्धार° for भाण्डपिण्ड-व्ययोद्धार°.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

'परीक्षकाः साक्षिणश्च त एवोक्ताःपरस्परम् ।
सन्दिग्धेऽर्थे ऽवंचनार्था न चेद्विद्वेषसंयुताः ॥
यःकश्चिद्वञ्चकस्तेषां विज्ञातः क्रय-विक्रये ।
शपथैः सं विशोध्यः स्यात् सर्ववादेष्वयं विधिः' ॥

इति । दैव-राजकृतद्रव्यहानिविषयेऽप्याह स एव—

'क्षयहानिर्यदा तत्र दैव-राजकृतात् भवेत् ।
सर्वेषामेव सा प्रोक्ता कल्पनीया यथांशतः' ॥

इति । क्षयायैव हानिः क्षयहानिः । नतूपचयार्थं व्ययः । प्रातिस्विकदोषेण द्रव्यनाशे स एवाह—

'अनिर्दिष्टो वार्यमाणः प्रमादाद्यस्तु नाशयेत् ।
तेनैव तद्भवेद्देयं सर्वेषां समवायिनाम्' ॥

इति । अनिर्दिष्टः समवाय्यननुज्ञातः । चोरादिभ्यः । पालयितुर्लाभाधिक्यमस्तीत्याह कात्यायनः—

'चोरतः सलिलादग्नेर्द्रव्यं यस्तु संमाहरेत् ।
तस्यांशो दशमो देयः सर्वद्रव्येष्वयं विधिः' ॥

इति । संमाहरेत् स्वशक्त्या परिपालयेदित्यर्थः । बृहस्पतिरपि—

---

१. B. and D. read वंचनायां for ऽवंचनार्थाः. २. D. reads तेन चेत् द्वेष° for न चेद्विद्वेष°. ३. A. reads संविशोध्यः for स विशोध्यः. ४. A. reads °कृता for °कृतात्. ५. A. C. read रूपप्राप्त्यर्थं and B. क्षयाद्यर्थं; while D. प्रवासार्थं for उपचयार्थं. ६. A. B. read यदि for यस्तु. ७. B. has marginal reading समाहरन्. ८. B. reads समाहरन् हरेदित्यर्थः for समाहरेत् स्वशक्त्या परिपालयेदित्यर्थः. ९. D. omits बृहस्पतिरपि—

'दैव-राजभयाद्यस्तु स्वशक्त्या परिपालयेत् ।
तस्यांशं दशमं दत्वा गृह्णीयुस्ते ततः परम्' ॥

इति; while C. omits the second half and A. only the first half.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

'दैव-राजभयाद्यस्तु स्वशक्त्या परिपालयेत् ।
तस्यांशं दशमं दत्त्वा गृह्णीयुस्ते ततः परम्' ॥

इति । यस्तु समवायिभिः प्रयुक्तं धनं समवायिभिःसह प्रतिपादनादिना न साधयति तस्य लाभहानिरिति ।

तदाह[1] बृहस्पतिः—

'समवेतैस्तु यद्दत्तं प्रार्थनीयं तथैव तत् ।
न याचते च यः कश्चिल्लाभात् स परिहीयते' ॥

इति । सर्वानुमतः[2] सर्वेषां कार्यं एक एव कुर्यात्तदाह स एव—

'बहूनां सम्मतो यस्तु दद्यादेको धनं नरः ।
करणं कारयेद्वापि सर्वैरेव कृतं भवेत्' ॥

इति । करणं लेख्यादिकं । सम्भूयकारिणामृत्विजां कर्तव्यमाह मनुः—

'ऋत्विजः समवेतास्तु यथा सत्रे निमन्त्रिताः ।
कुर्युर्यथार्हं[3] ते कर्म गृह्णीयुर्दक्षिणां तथा'† ॥

इति । तथेति कर्मानुसारेण दक्षिणां गृह्णीयुरित्यर्थः ।

तथा च स एव—

'सम्भूय स्वानि[4] कर्माणि कुर्वद्भिरिह मानवैः ।
अनेन[5] विधियोगेन कर्तव्यांऽशप्रकल्पना[6]' ॥

(म. स्मृ. ८. २११.)

---

† नायं श्लोक उपलभ्यते मुद्रितपुस्तकेषु । मत्संगृहीतलिखितपुस्तके तु वर्तत एव । व्याख्यातश्च मेधातिथिना ।

---

१. B. reads तदा बृहस्पतिराह for तदाह बृहस्पतिः. २. D. reads °अनुगतः for °अनुमतः. ३. A. reads यथाह तत् for यथार्हं. ४. B. originally reads स्वामि° for स्वानि. ५. A. and B. read अनेके कर्म° and C. and D. अनेकं कर्म° for अनेन विधि°. ६. D. reads कर्तव्यांशं प्रकल्पयेत् for कर्तव्यांऽशप्रकल्पना.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

इति । इयं चांशकल्पना 'तस्य द्वादशशतं दक्षिणा' इत्यवं क्रतुसम्बन्धित्वमात्रतया विहितायां दक्षिणायामेव । नर्त्विग्विशेषोल्लेखेन विहितायाम् । अत एवोक्तं तेनैव—

'रथं हरेत वाध्वर्युर्ब्रह्मा ऽऽधाने च वाजिनम् ।
होता वापि हरेदश्वमुद्गाता चाप्यनः क्रये' ‡ ॥
(म. स्मृ. ८. २०९.)

इति । दक्षिणांशप्रकल्पनामाह स एव—

'सर्वेषामर्धिनो मुख्यास्तदर्धेनार्धिनो ऽपरे ।
तृतीयिनस्तृतीयांशाश्चतुर्थांशास्तु पादिनः' ॥
(म. स्मृ. ८. २१०.)

इति । सर्वेषां षोडशर्त्विजां मध्ये मुख्याश्चत्वारो होत्रध्वर्युब्रह्मोद्गातारस्ते गोशतस्य अर्धिनः । सर्वेषां भागपरिपूरणोपपत्तिवशायाताष्टचत्वारिंशद्रूपार्धेनार्धभाजः । अपरे मैत्रावरुण-

‡ केषांचित् शाखिनां आधाने अध्वर्यवे रथो देयत्वेनाम्नायते । तथैव ब्रह्मणे वेगवानश्वः । होत्रेचाश्वः । उद्गात्रे सोमक्रयवहनशकटम् अतो व्यवस्थाम्नानसामर्थ्यात् या दक्षिणा यत्सम्बन्धत्वेन श्रूयते स एव तामाददीतेत्यभिप्रायः ।

१. A. C. and D. read च for वा; while B. reads °त् तथा for वा. २. A. and C. read गृह्याधाने च for ब्रह्माधाने च. ३. A. B. read विनिद्वरं चाश्वं; while C. originally विनिद्वरं चाश्वं and D. हरेत्तथैवाश्वं for वापि हरेदश्वं. ४. B. originally reads अर्थिनो for अर्धिनो; while C. has mistake through whole the verse. ५. D. reads °पूर्णोपपत्तिवशादाया-ताष्टा° for पूरणोपपत्तिवशायाताष्टा°. ६. D. reads °रूपार्धेण for °रूपार्धेन. ७. C. reads अर्धभागः for अर्धभाजः. ८ A and C. omit अपरे मैत्रावरूण-प्रतिप्रस्थातृ-ब्राह्मणाच्छंसि-प्रस्तोतारस्तदर्धिनः धनमुख्यांशरूपार्द्धेन चतुर्विंशतिरूपेणार्धभाजः । ये पूनस्तृतीयिनो.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

प्रतिप्रस्थातृ-ब्राह्मणाच्छंसि-प्रस्तोतारस्तदर्धिनः धनमुख्यांशस्यार्द्धेन चतुर्विंशतिरूपेणार्धभाजः। ये पुनस्तृतीयिनोऽछावाक-नेष्टा-ऽग्नीध्र-प्रतिहर्तारस्ते तृतीयिनो मुख्यांशस्य षोडशभाग-रूपतृतीयांशभाजः। ये तु पादिनोग्रावस्तोतृ-नेतृ-पोतृ-सुब्रह्मण्यास्ते मुख्यभागस्य चतुर्थांशेन द्वादशगोरूपेणांशभाजः। मुख्यानां चतुर्णां मिथो विभागः समत्वेनैव। एवमेव तद-नंतरादीनामपि मिथो विभागः। तथा च कात्यायनसूत्रम्—

'द्वादश द्वादशाद्येभ्यः षट् षट्
द्वितीयेभ्यश्चतस्रश्चतस्रः
तृतीयेभ्यस्तिस्रस्तिस्र इतरेभ्यः'।

इति। स्वकीयकर्म[1]कलापांशकर्तृत्वानुसारेण भागो देय इत्याह मनुः।—

'ऋत्विग्यदि वृतो यज्ञे स्वकर्म प[2]रिहापयेत्।
तस्य कर्मानुरूपेण देयोंऽशः सहकर्तृभिः'॥
(म. स्मृ. ८. २०६.)

इति। स[3]हकर्तृभिः* सम्भूयकारिभिरित्यर्थः। कृतकर्मा-शानुसारेण दक्षिणां दद्यादित्युक्तम् तस्य क्वचिदपवादमाह स एव—

*यज्ञे कृतवरणः ऋत्विक् किञ्चित् कर्म कृत्वा यदि व्याध्यादिना अशक्तः सन् कर्म त्यजति इत्यत्रानुसन्धेयम्। शाठ्यादिना त्यजति चेन्न तस्यांशः।

१. D. reads °कलापस्याशक्तयाऽकरणे कृतानुसारेण for °कलापांश-कर्तृत्वानुसारेण; while C. reads °कलापांशकर्तृकृतानुसारेण. २. B. and C. read परिहापयेत् for परिहापयन. ३. B. and C. omit सह°.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

'दक्षिणासु प्रदत्तासु स्वकर्म परिहापयन् ।
कृत्स्नमेव लभेतांशमन्येनैव च कारयेत्' ॥
(म. स्मृ. ८. २०७.)

इति । अन्येन स्वस्वगणवर्त्तिनां मध्ये प्रत्यासन्नेन । कर्ममध्ये ऋत्विङ्मरणे नारद आह—

'ऋत्विजां व्यसनेऽप्येवमन्यस्तत्कर्म विस्तरेत् ।
लभते दक्षिणाभागं स तस्मात् सम्प्रकल्पितम्' ॥
(ना. स्मृ. ३. ८.)

इति । सम्भूयकारिणां कृषिकराणां कर्तव्यमाह बृहस्पतिः—

'वाह्य-वाहक-बीजाद्यैः क्षेत्रोपकरणेन च ।
ये समाः स्युस्तु तैः सार्धं कृषिः कार्या विजानता' ॥

इति । वाह्यं लांगलादिः । वाहको बलिवर्दादिः । क्षेत्रेषु वर्जनीयमाह स एव—

'पर्वते नगराभ्याशे तथा राजपथस्य च ।
उषरं मुषिकव्यासं क्षेत्रं यत्नेन वर्जयेत्' ॥

इति । वाह्येषु विवर्जनीयानाह स एव—

---

१. C. reads °त्वरणे for °मरणे; while D. °तरणे. २. B. reads निस्तरेत्, C. °भिस्तरेत् for विस्तरेत्. ३. B. and C. read कृषिकाणां for कृषिकराणां. ४. A. C. D. omit:—

'वाह्य-वाहक-बीजाद्यैः क्षेत्रोपकरणेन च ।
ये समास्युस्तु तैः सार्धं कृषिः कार्या विजानता' ॥

इति । वाहयं लांगलादिः । वाहको बलीवर्दादिः । क्षेत्रेषु वर्जनीयमाह स एव;— while B. reads this portion after कर्तव्यमाह बृहस्पतिः. ५. C. reads वाह्येष्वपि वर्जनीयानाह for वाह्येषु विवर्जनीयानाह.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

'कृशाति[1]वृद्धं क्षुद्रं[2] च रोगिणं प्रपलायिनम् ।
काणं खञ्जं विना[3]ऽऽदद्यात् वाह्यं प्राज्ञः कृषीवलैः[4]' ॥

इति । प्रातिस्विक[5]दोषात् फलहानौ विशेषमाह स एव—

'वाह्य-बीजात्ययाद्यस्य क्षेत्रहानिः प्रजायते ।
तेनैव सा प्रदातव्या सर्वेषां कृषिजीविनाम्' ॥

इति । वाह्य-बीजग्रहणं कृषिसा[6]धनानामुपलक्षणार्थम् ।

सम्भूयकारिणां शिल्पिनां लाभ[7]विभागमाह स एव—

'हेमकारादयो यत्र शिल्पं सम्भूय कुर्वते ।
कर्मानुरूपं निर्वेशं लभेरंस्ते यथांशतः' ॥

इति । निर्वेशो[8]भृतिः । कात्यायनोऽपि—

'शिल्पा[9]ऽऽकरज्ञ-कुशला आचार्यश्चेति शिल्पिनः ।
एक-द्वि-त्रि-चतुर्भागान् हरेयुं[10]स्ते यथांशतः[11]' ॥

इति । हर्म्या[12]दिनिर्माणकृतांमध्ये मुख्यभागमाह बृहस्पतिः

'हर्म्यं देवगृहं वापि धार्मिको यत् पुराणि च ।
संभूय[13] कुर्वतां तेषां प्रमुखो द्व्यंशमर्हति' ॥

इति । शिल्पिनां स्वरूपमाह स एव—

---

१. A. reads कृताति° for कृशाति°. २. B. and C. read शुद्धं for क्षुद्रं. ३. B.and C. read च नादद्यात् for विनाऽऽदद्यात्. ४. C. reads वाह्यप्रज्ञः कृषीवलः for वाह्यं प्राज्ञः कृषिबलः. ५. C. reads प्रातिस्थिक° for प्रातिस्विक°. ६. C. reads °साधनानुपलक्षणार्थम् for °साधनानामुपलक्षणार्थम्. ७. A. and D. omit लाभ°. ८. C. wrongly reads निर्णयो भृतिः. ९. B. reads शिक्षकाभिज्ञ°, C. शिक्षकारिज्ञ.°; while D. शिक्षकाभिज्ञ° for शिल्पाकरज्ञ°. १०. B. reads लभेयुः. for हरेयुः. ११. B. reads यथोत्तरम् for यथांशतः. १२. A. C. D. omit the whole portion inserted in the text, which is to read after यथांशतः till स्तेनान् प्रत्याह स एव. १३. C. omits सम्भूय कुर्वतां तेषां प्रमुखो द्व्यंशमर्हति' ॥.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

'हिरण्य-कुप्य-सूत्राणां काष्ठ-पाषाण-चर्मणाम् ।
संस्कर्ता तु कलाभिज्ञः शिल्पी प्रोक्तो मनीषिभिः' ॥

इति । कुप्यं हेम-रूप्यव्यतिरिक्तत्रपु-सीसकादिकम् । स्तेनान् प्रत्याह स एव—

'स्वाम्याज्ञया तु यच्चोरैः परदेशात् समाहृतम् ।
राज्ञे दत्वा तु षड्भागं भजेयुस्ते यथांशतः ॥
चतुरोंशान् भजेन्मुख्यः शूरस्त्र्यंशमवाप्नुयात्¹ ।
समर्थस्तु हरेद्व्यंशं शेषास्त्वन्ये समांशिनः' ॥

इति । परदेशाद्वैरिदेशादित्यर्थः² । प्रबल³वैरिदेशादाहृतधनविषयमेतत् । दुर्बल⁴वैरिदेशादाहृतविषये त्वाह कात्यायनः—

'परराष्ट्राद्धनं यस्य⁵ चोरैश्चेदाज्ञया⁶ऽऽहृतम् ।
राज्ञे⁷ दशांशमुद्धृत्य विभजेरन् यथाविधि ॥
चौराणां मुख्यभूतस्तु चतुरोंशांस्तथा हरेत् ।
शूरोंऽशांस्त्रीन् समर्थौ द्वौ शेषास्त्वेकैकमेव च' ॥

इति । हानिरप्येवमेवेत्याह स एव—

'तेषां चेत्प्रसृतां यो यो ग्रहणं समवाप्नुयात् ।
तन्मोक्षणार्थं यद्दत्तं वहेयुस्ते यथांशतः' ॥

इति । नर्तकानां भागकल्पनाप्रकारमाह स⁸ एव—

---

१. C. reads °स्त्वंशमथाप्नुयात् for °स्त्र्यंशमवाप्नुयात्. २. C. omits परदेशात् वैरिदेशादित्यर्थः. ३. C. adds °तर° after प्रबल°. ४. B. adds °तर° after दुर्बल°. ५. C. reads यत्स्यात् for यस्य. ६. B. and C. read स्वाम्याज्ञया for °श्चेदाज्ञया. ७. C. omits राज्ञे दशांशमुद्धृत्य विभजेरन् यथाविधि ॥ इति and the following also. ८. A. C. and D. omit the following portion from चोराणां मुख्यभूतस्तु, up to the end सर्वेषामेव निर्णयः' ॥ इति that up to the end of this व्यवहारपद.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust, Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

'नर्तकानामेष एव धर्मः सद्भिरुदाहृतः ।
तालज्ञो लभते ह्यर्धं गायनास्तु समांशिनः ॥
प्रमुखा द्व्यंशमर्हन्ति सोयं संभूयकुर्वताम्'।

इति । शिल्पिनां मुख्यः प्रोक्तः । स एष धर्मो भागद्वयरूपो नर्तकादीनां संभूयकुर्वतांमध्ये मुख्यस्योदाहृतः । अयमेव विभागः पूर्वमकृतसमवायानां संभूयकारिणां द्रष्टव्यः ।

तथा च स एव—

'वणिजां कर्षणानां च चोराणां शिल्पिनां तथा ।
अनियम्यांशकर्तृणां सर्वेषामेव निर्णयः' ॥

इति । इति सम्भूयसमुत्थानाख्यं पदं समाप्तम् ।

अथ संभूयसमुत्थानोपसंहारपूर्वकं[1] दत्ताप्रदानिकाख्यं व्यवहारपदमुच्यते[2][3] । तत्र[4] बृहस्पतिः—

'एषा ऽखिलेनाभिहिता संभूयोत्थाननिष्कृतिः ।
अदेय-देय-दत्तानामदत्तानां च कथ्यते' ॥

इति । अदेयं दानानर्हं, देयं दानार्हं, दत्तं स्थिरं अनिवर्तनीयम्, अदत्तं अनिवर्तनीयम् । इत्येवं चतुर्विधानामदेयादीनां स्वरूपं कथ्यत इत्यर्थः । अतएव[5] नारदः—

दत्वा[6] द्रव्यमसम्यग्यः पुनरादातुमिच्छति ।
दत्ताप्रदानिकं नाम तद्विवादपदं स्मृतम् ॥

---

१. A. C. and D. omit संभूय समुत्थानोपसंहारपूर्वकं. २. A. C. and D. omit व्यवहार°. ३. B. reads अनुक्रमते for उच्यते. ४. A. C. and D. omit from तत्र बृहस्पतिः । up to अत एव. ५. A. and D. substitute तत्र for अतएव ६. B. omits :—

'दत्वा द्रव्यमसम्यग्यः पुनरादातुमिच्छति ।
दत्ताप्रदानिकं नाम तद्विवादपदं स्मृतम्' ॥;

while C. omits the same and the following :—

'अदेयमथ देयं च दत्तं चा दत्तमेव च ।.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

अदेयमथ देयं च दत्तं चादत्तमेव च ।
व्यवहारेषु विज्ञेयो दानमार्गश्चतुर्विधः' ॥

(ना. स्मृ. ४. १–२.)

इति । अदेयस्वरूपभेदानाह बृहस्पतिः—

'सामान्यं पुत्र-दारादि सर्वस्वं न्यासयाचितम् ।
प्रतिश्रुतमथान्यस्य न देयं त्वष्टधा स्मृतम्' ॥

इति । सामान्यमनेकस्वतंत्रस्वामिकं रथ्यादि । नारदोऽपि—

'अन्वाहितं याचितकमाधिः साधारणं च यत् ।
निक्षेपं पुत्रदारं च सर्वस्वं चान्वये सति ॥
आपत्स्वपि हि कष्टासु वर्तमानेन देहिना ।
अदेयान्याहुराचार्या यच्चान्यस्मै प्रतिश्रुतम्' ॥

(ना. स्मृ. ४. ४–६.)

इति । अन्वाहितादिवत् स्त्रीधनमप्यदेयम् । अतएव दक्षः—

'सामान्यं याचितं न्यास आधिर्दाराश्च तद्धनम् ।
अन्वाहितं च निक्षेपं सर्वस्वं चान्वये सति ॥
आपत्स्वपि न देयानि नववस्तूनि पण्डितैः ।
यो ददाति स मूढात्मा प्रायश्चित्तीयते नरः' ॥

इति । अदेयदाने प्रतिग्रहे च दण्डो मनुनाऽभिहितः—

---

१. A. and D. read °दाराधि° for °दारादि. २. C. reads °पावितं for °याचितम्. ३. A. and D. substitute °स्वत्वकं for °स्वतंत्रस्वामिकं. ४. C. wrongly reads आविर्दासाश्च for आधिर्दाराश्च. ५. C. reads तव वस्त्राणि for नव वस्तूनि.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

'अदेयं यश्च गृह्णाति यश्चादेयं प्रयच्छति।
तावुभौ चोरवच्छास्यौ दण्ड्यौ चोत्तमसाहसम्' † ॥

इति। अदेयग्रहणमदत्तस्याप्युपलक्षणार्थम्। अतएव नारदः—

'गृह्णात्यदत्तं यो लोभाद्यश्चादेयं प्रयच्छति।
दण्डनीयावुभावेतौ धर्मज्ञेन महीक्षिता' * ॥

(ना. स्मृ. ४. १२.)

इति। किं तर्हि देयमित्यपेक्षिते स एवाह—

'कुटुम्बभरणात् द्रव्यं यत्किञ्चिदतिरिच्यते।
तद्देयमुपरुद्ध्यन्यत् ददद्दोषमवाप्नुयात्' ॥

(ना. स्मृ. ४. ६.)

इति। भर्तव्यं कुटुम्बमुपरुद्ध्येत्यर्थः। कात्यायनोऽपि—

'सर्वस्वं गृहवर्जं तु कुटुम्बभरणाधिकम्।
यद्द्रव्यं तत् स्वकं देयमदेयं स्यादतोऽन्यथा' ॥

इति। याज्ञवल्क्योऽपि—

'स्वं कुटुम्बाविरोधेन देयं दार-सुतादृते'।

(या. स्मृ. २. १७९.)

---

† नास्त्ययं श्लोकोऽस्मद्दृष्टमुद्रीतमनुस्मृतिपुस्तकेषु। कुत्रचिदयं कात्यायनवचनत्वेनोद्धृतो दृश्यते।

* विज्ञानेश्वरस्तु अदेयदायको दण्ड्यः तथाऽदत्तप्रतीच्छकः'। इति इति॥

C. reads चारवत् for चोरवत् २. C. reads मोहात् for लोभात्. ३. C. reads त एव for स एव. ४. B. originally reads °दिकम् for °धिकम्. ५. C. reads स्वकुटुं° for स्वं कुटुम्बा°.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

इति। अत्र[1] सुतस्यादेयत्वं एकपुत्रविषयम्। तस्यापि दाने कृते सन्तानविच्छेदापत्तेः। अतएवैकस्य पुत्रस्य दानं निषेधति वसिष्ठः—

'न त्वेकं पुत्रं दद्यात् प्रतिगृह्णीयाद्वा। (३)
स हि सन्तानाय पूर्वेषाम्'॥ (४)
(व. स्मृ. १५. ३–४.)

इति। तथा कात्यायनोऽपि

'अतश्च सुत-दाराणां वशित्वं त्वनुशासने।
विक्रये चैव दाने च वशित्वं न सुते पितुः'॥

इति। एवमादीनी सुतस्यादेयत्वप्रतिपादकानि वचनान्येकपुत्रविषयाणीत्यवगम्यते। अनेकपुत्रेष्वपि माता-पितृवियोग सहनक्षम एव देयः—

'विक्रयं चैव दानं च न[2] नेयाःस्युरनिच्छवः।
दाराः पुत्राश्च सर्वस्वमात्मन्येव[3] तु योजयेत्'॥

इति कात्यायनस्मरणात्। न नेयाः स्युरनिच्छव इत्यनापद्विषयम्—

'आपत्कालेपि कर्तव्यं दानं विक्रय एव वा।
अन्यथा न प्रवर्तेत इति[4] शास्त्रविनिश्चयः[5]'॥

इति तानेवाधिकृत्य तेनैवोक्तत्वात्। पुत्रस्य प्रतिग्रह[6]-प्रकारविशेषो वसिष्ठेन दर्शितः—

---

१. A. and D. omit अत्र. २. C. reads अनेयाः for न नेयाः; while B. originally reads न देयाः. ३ B. and C. omit आत्मन्येव तु योजयेत्. ४. C. omits इति शास्त्रावीनिश्चयः. ५. B. reads शास्त्रस्य निश्चयः for शास्त्रविनिश्चयः. ६. B. reads प्रातिग्रहे for प्रतिग्रह.°

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

'पुत्रं प्रतिग्रहीष्यन् बन्धूनाहूय राजनि च निवेद्य निवेशनस्यमध्ये व्याहृतिभिर्हुत्वाऽदूर-बान्धवमसन्निकृष्टमेव गृह्णीयात्'।

(व. स्मृ. १५. ६.)

इति। अदूरबान्धवं सन्निकृष्टमातुलादिबान्धवम्। असन्निकृष्ट-सन्निकृष्टभ्रातृपुत्रादिव्यतिरिक्तमेव। स्थावरविषये देयं द्रव्यमाह प्रजापतिः—

'सप्तागमाद्गृहक्षेत्राद्यद्यत् क्षेत्रं प्रचीयते।
पित्र्यं वाऽथ स्वयं प्राप्तं तद्दातव्यं विवक्षितम्'॥

इति। सप्तभ्य आगमेभ्यो यत् प्रचीयते समधिकं स्यात्तद्दातव्यत्वेन विवक्षितमिति। स्वयं प्राप्तं द्रव्यं अविभक्तधनैर्भ्रातृभिरननुज्ञातमपि देयम्—

'स्वेच्छदेयं स्वयं प्राप्तम्'।

इति बृहस्पतिवचनात्। यत्तु तेनैवोक्तम्—

'विभक्ता वाऽविभक्ता वा दायादाः स्थावरे समाः।
एकोऽप्यनीशः सर्वत्र दानाधमनविक्रये'॥

---

१. B. reads आवेद्य for निवेद्य. २. C. reads °मातृ° for °भ्रातृ°. ३. B. and C. read देयद्रव्यम् for देयं द्रव्यम्. ४. B. and C. read सप्तारामात् for सप्तागमात्. ५. B. reads यद्यस्त्रं; while C. यत्र क्षेत्रं for यद्यत्क्षेत्रं. ६. B. and C. read प्रदीयते for प्रचीयते. ७. B. and C. read यत् for ऽथ. ८. B. reads आरामादिभ्यो; while C. सागमादिभ्यो for आगमेभ्यो. ९. C. reads समात्रकं for समधिकं.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

इति । तदविभक्तस्थावरविषयम् सप्तानाधिकस्थावरविषयं वा । सप्ताधिकस्यैवं[1] देयत्वेनाभिधानात् । किंचिद्भर्त्रा भार्ययाऽनुज्ञातमेव देयम् । किंचिन्मुख्येनापि[2] भ्रात्राद्यनुज्ञातमेवदेयम् । किञ्चित्[3] दासेन स्वार्जितमपि स्वाम्यनुज्ञातमेव देयम् । तथाच स एव—

'सौदायिकं[4] क्रमायातं शौर्यप्राप्तं च यद्भवेत् ।
स्त्री-ज्ञाति-स्वाम्यनुज्ञातं दत्तं सिद्धिमवाप्नुयात्' ॥

इति । सौदायिकं विवाहलब्धम् । क्रमायातं पितामहादिक्रमायातम् । स्त्री-ज्ञात्यनुमतं सावशेषं देयम् ।

'वैवाहिके क्रमायाते सर्वं[6] दानं न विद्यते' ।

इति तेनैवोक्तत्वात् । इत्थ देयादेयस्वरूपं निरूपितम् । अथ दत्तादत्तयोस्तु स्वरूपं निरूप्यते । तत्र दत्तं सप्तविधमदत्तं षोडशात्मकम् । तथा च नारदः—

'दत्तं सप्तविधं प्रोक्तमदत्तं षोडशात्मकम् । (३)
पण्यमूल्यं भृतिस्तुष्ट्या[7] स्नेहात् प्रत्युपकारतः ।
स्त्रीशुल्कानुग्रहार्थं च दत्तं दानविदो विदुः ॥ (८)
अदत्तं तु क्षय-क्रोध-शोकावेगरुगन्वितैः[8] ।
तथोत्कोच-परीहास-व्यत्यास-च्छलयोगतः ॥ (९)

१, B. reads °स्याददेयत्वेन for °स्यैवदेयत्वेन. २. A. and D. omit किंचिन्मुख्येनापि भ्रात्राद्यनुज्ञातमेव देयम्. ३. C. adds अन्यत् after किंचित्. ४. C. reads सौदासिकं for सौदायिकं. ५. B. originally reads °स्वामि°. ६. C. reads सर्वदानं for सर्वं दानं. ७. C. reads तुष्टा for तुष्ट्या. ८. B. originally reads °मेवरूगान्वितैः, A. °वेगानुगर्हितम्; while C. reads°वेगानुगान्वितैः for °वेगरुगन्वितैः.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

बाल-मूढा-ऽस्वतन्त्रा-ऽऽर्त्त-मत्तोन्मत्तापवर्जितम् ।
कर्ता ममायं कर्मेति प्रतिलाभेच्छया च यत् ॥ (१०)
अपात्रे पात्रमित्युक्ते कार्ये चाऽधर्मसंहिते ।
यद्दत्तं स्यादविज्ञानाददत्तमिति तत्स्मृतम्' ॥ (११)
(ना. स्मृ. ४. ३.–११.)

इति । पण्यस्य क्रीतद्रव्यस्य मूल्यम् । भृतिर्वेतनं कृतेकर्मणे दत्तम् । तुष्ट्या बन्दि-चारणादिभ्यो दत्तम् । स्नेहाद्दुहित्रादिभ्यो दत्तम् । प्रत्युपकारतः उपकृतवते प्रत्युपकाररूपेण दत्तम् । स्त्रीशुल्कं परिणयनार्थं कन्याज्ञातिभ्यो दत्तम् । अनुग्रहार्थं अदृष्टार्थे दत्तम् । तदेतत् पण्यमूल्यादिसप्तविधं दत्तमेव न प्रत्याहरणीयम् । तथा च याज्ञवल्क्यः—

'देयं प्रतिश्रुतं चैव दत्त्वा नापहरेत् पुनः' ।
(या. स्मृ. २. १७६.)

इति । भयेन बन्दिग्रहादिभ्यो दत्तम् । क्रोधेन पुत्रादिविषयकोपनिर्यातनायान्यस्मै दत्तम् । पुत्रवियोगादिनिमित्तशोकावेशेन दत्तम् । रुगन्वितैः असाद्ध्य रोगपीडितैश्च यद्दत्तम् । उत्कोचेन कार्यप्रतिबन्धनिरासार्थमधिकृतेभ्यो दत्तम् । परिहासेनोपहासेन दत्तम् । द्रव्यव्यत्यासेन दत्तं एकः स्वं द्रव्यमन्यस्मै ददाति अन्योऽपि तस्मै ददाति इति

१. C. reads वा for च. २. C. reads °संहितम् for °संहिते. ३. B. C. and D. read °कर्मणो for कर्मणे. ४. C. reads तुष्टा for तुष्ट्या. ५. C. and B. read अदृष्टार्थं for अदृष्टार्थे. ६. C. reads प्रतिस्तुतं for प्रतिश्रुतं. ७. B. reads शोकवशेन for शोकावेशेन. ८. A. omits ददाति अन्योऽपि तस्मै ददाति इति दानव्यत्यासेन दत्तम् । अन्यस्मै दातव्यमन्यस्मै दानम्.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

दानव्यत्यासेन दत्तम् । [1]अन्यस्मै दातव्यं अन्यस्मै दानम् । छलयोगतः [2]शतदानमभिसन्धाय सहस्रमिति परिभाव्य दत्तम् । बालेना[3]प्राप्तषोडशवर्षेण दत्तम् । मूढेन लोक-वेदानभिज्ञेन दत्तम् । अस्वतन्त्रेण पुत्र-दासादिना दत्तम् । आर्त्तेन रोगोपहतेन दत्तम् । मत्तेन [4]मदनियतेन दत्तम् । उन्मत्तेन वातिकाद्युन्मादग्रस्तेन अपवर्जितं दत्तम् । अयं मदीयमिदं कर्म करिष्यतीति प्रतिलाभेच्छया प्रतिलाभमकुर्वाणा[5]य दत्तम् । अयोग्याय योग्योक्तिमात्रेण यथा अचतुर्वेदाय चतुर्वेदोऽहमित्युक्ते दत्तम् । यज्ञं करिष्यामीति धनं लब्ध्वा द्यूतादौ विनियुञ्जानाय दत्तम् । एवं षोडशप्रकारमपि दत्तं पुनः प्रत्याहरणीयत्वाददत्तमित्युच्यते । तथाच कात्यायनः—

'काम-क्रोधा-ऽस्वत[6]न्त्राऽऽर्त्त-क्लीबोन्मत्त-[7]प्रमोहितैः ।
व्यत्यासपरिहासाच्च यद्दत्तं तत् पुनर्हरेत् ॥
[8]या तु कार्यस्य सिद्ध्यर्थमुत्कोचा [9]स्यात् प्रतिश्रुता ।
तस्मिन्नपि प्रसिद्धेऽर्थे न देयो[10] स्यात् कथं च न ॥
अथ प्रागेव दत्तो[11] स्यात् प्रतिदाप्यः स तां बलात् ।
दण्डं चैकादशगुणमाहुर्गार्गीयमानवाः' ॥

इति । उत्कोचस्वरूपमाह स एव—

---

१. B. C. omit अन्यस्मै दातव्यं अन्यस्मै दानम्. २. B. reads शतादिकं for शतदानम्. ३. B. originally reads °नाजात° for °नाप्राप्त°. ४. B. C. read °मत्तेन for मदनियतेन. ५. B. reads °लाभोपकुर्वाणाय for °लाभमकुर्वाणाय. ६. B. and C. read °स्वतंत्राद्वा for °स्वतंत्रार्त.° ७. B. reads °प्रमत्तकैः for °प्रमोहितैः. ८. C. reads यत्तु for या तु. ९. B. C. read उत्कोचाख्या for उत्कोचा स्यात्. १०. B. C. read देयं for देया. ११. C. reads दत्तं for दत्ता.

41

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

'स्तेन[1]-साहसिकोद्वृत्त-पारदारिकसङ्गमात्[2]।
दर्शनोद्वृत्त[3]नष्टस्य तथाऽसत्यप्रवर्त्तनात्[4]॥
प्राप्तमेतैस्तु यत्किञ्चिदुत्कोचाख्यं तदुच्यते।
न दाता तत्र दण्ड्यः स्यान्मध्यस्थश्चैव दोषभाक्'॥

इति। मध्यस्थ उक्तानुवादकः[5]। चकाराद्ग्राहकः समुच्चीयते। तावुभौ दोषभाजौ दण्डनीयावित्यर्थः। आर्तदत्तस्य[6]दत्तत्वं धर्मकार्यव्यतिरिक्तविषयम्। तथा च स एव—

'स्वस्थेनार्त्तेन वा दत्तं श्रावितं[7] धर्मकारणात्।
अदत्वा तु मृते दाप्यस्तत्सुतो नात्र[8] संशयः'॥

इति। मनुरपि सोपाधिकदानादेर्निवर्त्तनीयतामाह—

'योगाधमनविक्रीतं योगदान-प्रतिग्रहम्।
यस्य वाऽप्युपधिं पश्येत्तत्सर्वं विनिवर्तयेत्' *॥

(म. स्मृ. ८. १६५.)

इति। योग उपधिः[9]। अदेयदान-तत्प्रतिग्रहयोर्दण्डो[10] नारदेनोक्तः—

---

* योगशब्दश्छलवाची। छलेन ये बन्धक-विक्रय-दान-प्रतिग्रहाः क्रियन्ते न तत्वतः। अन्यत्रापि निक्षेपादौ यत्र छद्म जानीयात् वस्तुतो निक्षेपादि न कृतं तत्सर्वं निवर्तत इति भावः।

---

१. B. reads स्नेह° and C. स्तेन°. २. B. originally reads °संगवान्. ३. A. and D. read दर्शनाद्वृत्त° for दर्शनोद्वृत्त°. ४. B. in margin and C. read ऽसत्पथदर्शनात् for ऽसत्यप्रवर्तनात्. ५. B. and C. read उत्कोचापादकः. ६. A. and D. read आर्तदत्तेत्यादिकं तु and C. आर्तदत्तत्वं for आर्तदत्तस्य दत्तत्वं. ७. B. originally reads सावित्रं and in marginal reading साधितं. C. also the same. ८. A. and D. read यत्र. ९. D. reads उपाधिः for उपधिः. १०. B. reads अदेयदानादत्त° and C. अदेयदानात्त° for अदेयदान-तत्°.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

'गृह्णात्यदत्तं यो लोभाद्यश्चादेयं प्रयच्छति।
अदेयदायको दण्ड्यस्तथाऽदत्तप्रतीच्छकः'॥
(ना. स्मृ. ४. १२.)

इति।

इति दत्ताप्रदानिकम्।

अथ वेतनस्याऽनपाकर्माख्यं विवादपदमुच्यते। तस्य स्वरूपमाह नारदः—

'भृत्यानां[1] वेतनस्योक्तो दानाऽदानविधिक्रमः।
वेतनस्याऽनपाकर्म तद्विवादपदं स्मृतम्'॥
(ना. स्मृ. ६. ३.)

इति। वेतनं कर्ममूल्यम्। तस्यानपाकर्म भृत्यायाऽसमर्पणं समर्पितस्य परावर्तनं वा। तत्र समर्पणे विशेषमाह नारदः—

'भृत्याय[2] वेतनं दद्यात् कर्मस्वामी यथाक्रमम्।
आदौ मध्येऽवसाने च कर्मणो यद्विनिश्चितम्'॥
(ना. स्मृ. ६. २.)

इति। ऐतावदहं[3] तव कर्मकरणाय दास्यामीति भाषाया अभावे विशेषमाह स एव—

'भृतावनिश्चितायां तु दशभागमवाप्नुयुः।
लाभं[4] गो-वीर्य-शस्यानां वणिजो[5]ऽथकृषीवलाः'॥
(ना. स्मृ. ४. ३.)

---

१. B. and C. read भृतानां for भृत्यानां. २. B. C. read भृताय for भृत्याय ३. C. reads एतावदेवं तत्र कर्मकरणाय and A. and D. read एतावदेव तत्कर्मकरणात् for एतावदहं तव कर्मकरणाय. ४. A. D. read लाभगो° for लाभं गो°. ५. A. and D. read वणिग्गोय° for वणिजोऽथ.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

इति। गोवीर्यं पाल्यमानगवादिप्रभवं पयःप्रभृति। यदि कर्मस्वामी भृत्याय दशमं भागं न प्रयच्छति तदासौ राज्ञा दाप्य इत्याह याज्ञवल्क्यः—

'दाप्यस्तु दशमं भागं वाणिज्य-पशु-शस्यतः।
अनिश्चित्य भृतिं यस्तु कारयेत् स महीक्षिता' ॥
(या. स्मृ. २. १९४.)

इति। यत्तु बृहस्पतिनोक्तम्[१]—

'त्रिभागं पञ्चभागं वा गृह्णीयात् सीरवाहकः' ॥

इति तदायाससाध्या-ऽकृष्टक्षेत्रकर्तृ[२]विषयम्। तत्रापि त्रि-भाग-पञ्चभागौ व्यवस्थया विकल्पितौ वेदितव्यौ। तथा च स एव—

'भक्ताच्छाद[३]भृतः सीराद्भागं गृह्णीत पञ्चकम्।
जातशस्यो[४] त्रिभागं तु प्रगृह्णीयात्तथा[५]ऽभृतः' ॥

इति। अशनाच्छादानाभ्यां भृतः कृषीवलः क्षेत्रजातशस्यात् पञ्चमं भागं गृह्णीयात्। ताभ्यामभृतस्तृतीयं भागमित्यर्थः। एतावद्दास्यामीति परिभाषायां सत्यामपि क्वचित्[६]ततो न्यूनं स्वामिबुद्धिपरिकल्पितं वेतनं देयम्। क्वचित्ततोऽप्यधिकं देयम्। तदाह याज्ञवल्क्यः—

१. C. reads बृहस्पतिः for बृहस्पतिनोक्तम्. २. B. and C. omit °कर्तृ°. ३. B. C. read °छादन° for °छाद°. ४. B. reads जातसस्या, C. reads जातसस्य°, D. जातसस्ये for जातशस्यो. ५. B. reads °हथाऽभृतः. C. also the same for तथाऽभृतः. ६. B. reads क्वाचिरतो for क्वचित्ततो.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

'देशं कालं च योऽतीयाल्लाभं कुर्याच्च योऽन्यथा ।
तदा तु स्वामिनच्छन्दोऽधिकं देयं कृतेऽधिके' ॥
(या. स्मृ. २. १९५.)

इति । यः स्वाम्याज्ञामन्तरेण वाणिज्यादिलाभसाधनदेशकालातिक्रमं करोति लाभं च बहुतरव्ययकरणादल्पं करोति तस्मै स्वामी स्वेच्छानुसारेण किंचिद्दद्यात् । यस्तु स्वातन्त्र्येण बहुलाभं करोति तस्मै परिभाषितमूल्यादधिकं देयमित्यर्थः । अनेकभृत्यकर्तृकर्मणि वेतनार्पणप्रकारमाह स एव—

'यो यावत् कुरुते कर्म तावत्तस्य तु वेतनम् ।
उभयोरप्यसाध्यं चेत् साध्ये कुर्याद्यथाश्रुतम्' ॥
(या. स्मृ. २. १९६.)

इति । यदा पुनरेकं कर्म नियतवेतनमुभाभ्यां बहुभिर्वा क्रियमाणमुभयोरप्यसाध्यं* चेदुभाभ्यामेवापरिसमापितम् तदा यो यावत् कर्म करोति तस्मै तत्कर्मानुसारेण मध्यस्थकल्पितं वेतनं देयम् । न पुनः समम् । साध्येउभाभ्यां कर्माणि परिसमापिते तु यथाश्रुतं यथावत्परिभाषितं तावदुभाभ्यां देयम् । न पुनः प्रत्येकं कृत्स्नं वेतनं देयम् । नापि कर्मानुरूपं परिकल्प्य देयम् । भृत्यानां कर्तृत्वमाह नारदः—

* अत्र अपिशब्दात् बहुभिरपि इत्यनुसन्धेयम् ।

१. B. and C. read तत्र स्यात् for तदा तु. २. B. C. D. read °कर्तृक°. ३. B. originally reads सद्यः and in margin साध्ये. ४. B. and C. read व्याध्याद्यभिभवादुपरि° for उभाभ्यामेवापरि°. ५. C. reads कार्याणि.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

'कर्मोपकरणं तेषां क्रियांप्रति[1] यथाहितम्[2]।
आप्तभावेन तद्रक्ष्यं[3] न[4] जैह्येन कदाचन'॥

(ना. स्मृ ६. ४.)

इति। तेषां कर्मस्वामिनां कर्मोपकरणं लाङ्गलादि क्रियामुद्दिश्य यस्मिन् भृत्ये[5] निहितं तेन सर्वदा निःशाठ्येन रक्ष्यमित्यर्थः। बृहस्पतिरपि—

'भृतकस्तु न कुर्वीत स्वामिना[6] शाठ्यमण्वपि।
भृतिहानिं समाप्नोति तदा[7] वादः[8] प्रवर्त्तते'॥

इति। यस्तु भृतिं स्वीकृत्य कर्म न करोति तं प्रत्याह स एव—

'गृहीतवेतनः कर्म न करोति यदा भृतः।
समर्थश्चेद्दमं दाप्यो द्विगुणं तच्च वेतनम्'॥

इति। अगृहीतवेतनविषये याज्ञवल्क्य आह—

'अगृहीते समं[9] दाप्यो भृत्यै रक्ष्य उपस्करः' *॥

(या. स्मृ. २. १९३.)

---

* उपस्करः उपकरणम्। भृत्यैः लाङ्गलादीनां प्रग्रह-योक्त्रादिकं यथाशक्त्या रक्षणीयमित्यर्थः।

---

१. B. reads क्रिया प्रतिपदाहितम् for क्रियांप्रति यथाहितम्. २. C. and D. read यदा हितम् for यथाहितम्. ३. C. reads द्रव्यं for रक्ष्यं. ४. B. reads न जह्याचु for न जैह्येन; while C. wrongly reads नैहयेन for न जैह्येन. ५. A. and D. read कृत्ये; while C. wrongly reads तत्प or तत्ये. ६. B. reads स्वामिनः for स्वामिना. ७. B., C. D. read ततो for तदा. ८. B., C. D. read वादं for वादः. ९. C. reads तु संदाप्यो for समं दाप्यो.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

इति । समं यावता वेतनेन भृत्यत्वमङ्गीकृतं तावदेव स्वामिने दद्यान्नतु राज्ञे दण्डमित्यर्थः । यद्वा[१] अत्राङ्गीकृतवेतनं दत्वा बलात् कारयितव्यः । तदाह नारदः—

‘कर्माऽकुर्वन्[२] प्रतिश्रुत्य कार्यो दत्वा भृतिं बलात् ।
भृतिं गृहीत्वाऽकुर्वाणः द्विगुणां भृतिमाप्नुयात्’ ॥
(ना. स्मृ. ६. ५.)

इति । प्रतिश्रुत्येति प्रारम्भस्याप्युपलक्षणार्थम् । तदाह कात्यायनः—

‘कर्मारम्भं[३] तु यःकृत्वा सर्वं[४] नैव तु कारयेत् ।
बलात् कारयितव्योऽसावकुर्वन् दण्डमर्हति’ ॥

इति । दण्डपरिमाणमाह[५] वृद्धमनुः—

‘प्रतिश्रुत्य न कुर्याद्यः स कार्यः स्याद्बलादपि ।
स चेन्न कुर्यात्तत्कर्म प्राप्नुयाद्विशतं[६] दमम्’ ॥

इति । द्विशतं कार्षापणद्विशतामित्यर्थः । यत्तु मनुवचनम्—

---

१. A. originally reads यदा for यद्वा. २. B. reads कर्म कुर्वन् for कर्माऽकुर्वन्. ३. C. omits—

‘कर्मारम्भं तु यः कृत्वा सर्वं नैव तु कारयेत् ।
बलात्कारयितव्योऽसावकुर्वन् दण्डमर्हति’ ॥

इति । दण्डपरिमाणमाह वृद्धमनुः—

‘प्रतिश्रुत्य न कुर्याद्यः स कार्यः स्याद्बलादपि ।
स चेन्न कुर्यात्तत्कर्म प्राप्नुयाद्विशतं दमम्’ ॥

and instead of this omitted portion reads—

स्याद् बलादपिवेतनं न कुर्यात्तत्कर्म प्राप्नुयाद्विशतं दममिति ।

४. B. reads सिद्धिं for सर्वं. ५. D. omits—

दण्डपरिमाणमाह वृद्धमनुः—

‘प्रतिश्रुत्य न कुर्याद्यः स कार्यः स्याद् बलादपि.

६. A. and D. read द्विगुणं for द्विशतं.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

'भृत्योऽनार्तो न कुर्याद्यो दर्पात् कर्म यथोदितम्[2] ।
स दण्ड्यः कृष्णलान्यष्टौ न देयं तस्य वेतनम्' ॥
(म. स्मृ. ८. २१६.)

इति तदर्धावशेषितविषयम् । किञ्चिन्मात्रावशेषे तु दण्डवर्जं वेतनादानम्[4] । तदाह[5] स एव—

'यथोक्तमार्तः स्वस्थो वा यस्तु कर्म न कारयेत् ।
न तस्य वेतनं देयमल्पोनस्यापि कर्मणः' ॥
(म. स्मृ. ८. १७.)

इति । यस्तु कालविशेषावधिकं कर्म प्रतिज्ञाय कालात् पूर्वमेव[6] कर्म त्यजति तं प्रत्याह नारदः—

'कालेऽपूर्णे त्यजन् कर्म भृतेर्नाशमवाप्नुयात्[7] ।
स्वामिदोषादकरणे यावद्भृतिमवाप्नुयात्' ॥[8]

इति । स्वामिदोषात् पारुष्यकरणादिस्वामिदोषात् । नारदः—

---

१. B. and C. read भृतो° for भृत्यो°. २. A. originally and D. read यथोचितं for यथोदितम्. ३. B. reads अष्ट for अष्टौ. ४. B. reads वर्षावेतनदानम्; while C. दंडं वर्षावेतनदानम् for दण्डवर्जंवेतनादानम्. ५. C. omits आह. ६. B. and C. read पूर्तावेव for पूर्वमेव. ७. B. reads भृतिनाशं; while C. भृते नाशं for भृतेर्नाशं. ८. B. reads—

पारुष्यकरणादिस्वामिदोषतः कर्मत्यागे त्वाह स एव—
'स्वामिदोषादपक्रामन् न्यायकृत्तमवाप्नुयात् ॥

इति । यस्तु प्रमादादिना दोषेण वा स्वामिद्रव्यं बलीवर्दादिकं वा नाशयति तं प्रत्याह. and C. पारुष्यकरणादिस्वामिदोषतः for स्वामिदोषादकरणे यावद्भृतिमवाप्नुयात् ।;
While D. omits इति । स्वामिदोषात् पारुष्यकरणादिस्वामिदोषात् । नारदः-

'भाण्डं व्यसनमागच्छेद्यदि वाहकदोषतः ।
दाप्यो यत्तत्र नष्टं स्याद्दैव-राजकृताहृते' ॥

इति । वाहकदोषतः भृतकदोषतः ।.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

'[1]भाण्डं व्यसनमागच्छेद्यदि वाहकदोषतः ।
दाप्यो यत्तत्र नष्टं स्याद्दैव-राजकृताद्दृते' ॥

(ना. स्मृ. ६. ९.)

इति । वाहकदोषतः भृतकदोषतः । वृद्धमनुः[2]—

'प्रमादान्नाशितं दाप्यः समं द्विर्द्रोहनाशितम् ।
न तु दाप्यो हृतं चोरैर्दग्धमूढं जलेन वा' ॥

इति । द्रोहनाशितं तीव्रप्रहारादिना द्रोहेण नाशितम् । द्विर्दाप्यो द्विगुणं दाप्य इत्यर्थः । प्रस्थानविघ्नकं भृत्यं प्रत्याह कात्यायनः—

'विघ्नयन् वाहको दाप्यः प्रस्थाने द्विगुणां भृतिम् ।

इति । वृद्धमनुः[3]—

'यः कर्मकाले सम्प्राप्ते न कुर्याद्विघ्नमाचरेत् ।
उद्धृत्यान्यस्तु कार्यः स्यात् स दाप्यो द्विगुणां भृतिम्' ॥

इति । याज्ञवल्क्यः—

---

१. B. reads this verse after the following:—

'प्रमादान्नाशितं दाप्यः समं द्विर्द्रोहनाशितम् ।
नतु दाप्यो हृतं चोरैर्दग्धमूढं जलेन वा' ॥
इति । द्रोहनाशितं तीव्र प्रहारादिना द्रोहेण नाशितम् ।
द्विर्दाप्यो द्विगुणं दाप्य इत्यर्थः ।.

२. C. omits वृद्धमनुः ३. B. omits—वृद्धमनुः—

'यः कर्मकाले संप्राप्ते न कुर्याद्विघ्नमाचरेत् ।
उद्धृत्यान्यस्तु कार्यः स्यात् स दाप्यो द्विगुणां भृतिम्' ॥

while C. omits this verse and the following one verse together with the preceding portion.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

'अराजदैविकं नष्टं भाण्डं दाप्यस्तु वाहकः ।
प्रस्थानविघ्नकृच्चैव प्रदाप्यो द्विगुणां भृतिम् ॥
प्रक्रान्ते सप्तमं भागं चतुर्थं पथि संत्यजन् ।
भृतिमर्धपथे सर्वां प्रदाप्यस्त्याजकोऽपि च' ॥
(या. स्मृ. २. १९७–१९८.)

इति । अराजदैविकं न विद्यते राज-दैविकं यस्य भाण्डस्य तद्यदि प्रज्ञाहीनतया वाहकेन नाशितं तदा तन्मूल्यानुसारेण तद्भाण्डं दापनीयः । यस्तु प्रस्थानलग्नसमय एव स्वीकृत्याऽभ्युपात्तं कर्म त्यजन् प्रस्थानविघ्नं करोति तदासौ द्विगुणां भृतिं दाप्यः । यस्तु भृत्यान्तरोपादानावसरसम्भवे* स्वाङ्गीकृतं कर्म त्यजति असौ भृत्यः सप्तमं भागं दाप्यः । यः पुनः पथि प्रक्रान्ते गमने वर्तमाने सति कर्म त्यजति स भृतेश्चतुर्थं भागं दाप्यः । अर्धपथे त्यजन् सर्वां भृतिं दापनीयः । यस्तु स्वामी भृत्यं स्वय-

*अत्र विज्ञानेश्वरः—प्रक्रान्ते अध्यवसिते प्रस्थाने स्वाङ्गीकृतं कर्म यस्त्यजति असौ भृतेः सप्तमं भागं दाप्यः । ननु—अत्रैव विषये 'प्रस्थानविघ्नकृत्' इत्यादिना द्विगुणभृतिदानमुक्तम् । इदानीं सप्तमो भाग इति विरोधः-इति चेत् उच्यते । भृत्यान्तरोपादानावसरसम्भवे यस्त्यजति तस्य सप्तमो विभागः । यस्तु प्रस्थानलग्नसमय एव त्यजति तस्य द्विगुणभृतिदानमित्यविरोधः ।

१. A. and D. read अराजदैवको घातं for अराजदैविकं नष्टं. २. B. reads वाहकं for वाहकः. ३. B. reads °विघ्नकः for विघ्नकृत्. ४. B. reads द्विगुणं भृतम् for द्विगुणां भृतिम्. ५. B. reads प्रक्रान्तं सप्तमं for प्रक्रांते सप्तमं. ६. A. reads परि° for पथि. ७. C. reads वा for च. ८. A. D. read अराजदैवको घातो for अराजदैविकं न विद्यते राज-दैविकं. ९. B. C. omit तदा. १०. A. D. read व्यवस्थाभ्युपगतं and स्वाम्युपगतं for स्वाभ्युपगतं. ११. A. B. and C. read. भृत्यान्तरापादना° for भृत्यान्तरोपादान°. १२. B. reads स्व° for स. १३. A. C. D. read सर्वा भृतीः for सर्वां भृतिं.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

मेव कर्म त्याजयति पूर्वोक्तप्रदेशेषु[1] असावपि पूर्वोक्तसप्तम-भागादिकं दापनीयः। एतच्चाऽव्याधितादिविषयम्। व्याधित-स्यापराधाभावात्। यदा पुनर्व्याधितो व्याध्यपगमेंऽतरित[2]-दिवसान् परिगणय्य पूरयति तदा लभेतैव सर्वां भृतिम्। तदाह मनुः—

'आर्तस्तु[3] कुर्यात् स्वस्थः सन् यथाभाषितमादितः।
सुदीर्घस्यापि कालस्य तल्लभेतैव[4] वेतनम्'॥

(म. स्मृ. ८. २१६.)

इति। त्याजकस्य स्वामिनश्चतुर्थभागादिदापनमविक्री-तभाण्डविषयम्। विक्रीते तु भाण्डे विशेषो वृद्धमनुनाऽ-भिहितः—

'पथि विक्रीय तद्भाण्डं वणिग्भृत्यं त्यजेद्यदि।
अथ[5] तस्यापि देयं स्याद्भृतेरर्धं[6] लभेत सः'॥

इति। आसेधेन प्रतिबद्धभाण्डविषये राजाद्यपहृतभाण्ड-विषये चाह[7] कात्यायनः—

'यथा च पथि तद्भाण्डमासिद्ध्येत ह्रियेत वा।
यावानध्वा गतस्तेन प्राप्नुयात्तावतो भृतिम्'॥

इति। भाटक[8]स्वीकृतेन यानादिना भाण्डनेतारं[9] प्रत्याह नारदः—

१. A. C. D. read °देशेषु for °प्रदेशेषु. २. A. and D. read व्याध्यपगमे तादितर° for व्याध्यपगमेऽन्तरित°. ३. A. and D. read आर्तः स and C. आर्तस्य for आर्तस्तु. ४. B. reads स्वं लभेत for तल्लभेत. ५. A. and D. read अगतस्य for अथ तस्य. ६. C. reads भृतेरपि for भृतेरर्धं. ७. A. and D. substitute वा for च. ८. B. reads ताहृक् and C. ताटक for भाटक°, ९. A. omits भाण्डनेतारं.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

'अनयन् भाटयित्वा तु भाण्डवान् यान-वाहने।
दाप्यो भृतेश्चतुर्भागं सर्वामर्द्धपथे त्यजन्॥
अनयन् वाहकोऽप्येवं भृतिहानिमवाप्नुयात्'।
(ना. स्मृ. ६. ७–८.)

इति। यः शकटादिकं भाटयित्वा तदेवोपकारशून्यमादाय देशान्तरं गच्छति भाटकं च न प्रयच्छति तं प्रत्याह वृद्धमनुः—

'यो भाटयित्वा शकटं नीत्वा चान्यत्र गच्छति।
भाण्डं न दद्यात् परतो दाप्यः स्यात् सोऽपि भाटकम्'॥

इति। भाटककार्योपाधिपरिक्रयमूल्यं आरूढस्यापि अकृतोपकारस्यापि स्वकृते कृत्ये समनंतरमनर्पितहस्त्यश्वादेः समर्पणपर्यंतं भाटकानिवृत्तिरित्याह कात्यायनः—

'हस्त्यश्व-गो-खरोष्ट्रादीन् गृहीत्वा भाटकेन यः।
निर्ययेत् कृतकृत्यःसन् स्त्रीवत् दाप्यः स भाटकम्॥

१. A. and D. read आनीय for अनयन्. २. B. and C. read भृतिचतुर्भागं for भृतेश्चतुर्भागं. ३. A. and D. read भाटकः for भाटकं; while A C. D. omit the following portion—

च न प्रयच्छाति तप्रत्याह वृद्धमनुः—
'यो भाटयित्वा शकटं नीत्वा चान्यत्र गच्छति।
भाण्डं न दद्यात् परतो दाप्यः स्यात् सोऽपि भाटकम्'॥
इति। भाटककार्योपाधिपरिक्रयमूल्यं आरुढस्यापि अकृतोपकारस्यापि स्वकृते कृत्ये समनंतरमनर्पितहस्त्यश्वादेः समर्पणपर्यंतं भाटकानिवृत्तिरित्याह कात्यायनः—
'हस्त्यश्व-गो-खरोष्ट्रादीन् गृहीत्वा भाटकेन यः।
निर्ययेत्कृतकृत्यः सन् स्त्रीवद्दाप्यः सभाटकम्॥
गृहचार्यापणादीनि गृहीत्वाभाटकेनयः।
स्वामिनो नार्पयेद्यावत्तावद्दाप्यः सभाटकं'॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

गृह-वार्यार्पणादीनि गृहीत्वा भाटकेन यः ।
स्वामिनो नार्पयेद्यावत्तावद्दाप्यः स भाटकम्' ॥

इति । वारिशब्देन तदाधारो लक्ष्यते । [1]उपकारशब्देन तदाधारो लक्ष्यते । परभूमौ गृहनिर्माणा[2]य भाटकदातारं प्रत्याह नारदः—

'परभूमौ गृहं कृत्वा स्तोमं दत्वा वसेत्तु यः ।
स तद्गृहीत्वा निर्गच्छे[3]त्तृणकाष्ठानि चेष्टकाम्' ॥

(ना. स्मृ. ६. २०.)

इति । तथा स्तोमो [4]भाटकम् । स्तोमाप्रदाने प्राह स एव—

'[5]स्तोमाद्विना वसित्वा तु परभूमावनिश्चि[6]तः ।
निर्गच्छंस्तृण-[7]काष्ठादि न गृह्णीयात् कथंचन ॥ (२१)
[8]यान्येव तृण-काष्ठानि त्वि[9]ष्टका विनिवेशिताः ।
विनिर्गच्छंस्तु त[10]त्सर्वं भूमिस्वामिनि वेदये[11]त्' ॥

(ना. स्मृ. ६. २१–२२.)

---

१. B. and C. read वारिशब्देन for उपकारशब्देन. २. B. and C. read °निर्माणादि for °निर्माणाय. ३. B. reads तृण-काष्ठादिकं तथा C. reads तृण-काष्ठानि त्विष्टिकाः for तृणकाष्ठानि चेष्टकाम्. ४. A. C. D. omit स्तोमो भाटकम् । स्तोमाप्रदाने प्राह सएव. ५. C. omits the following:—

'स्तोमाद्विना वसित्वा तु परभूमावनिश्चितः ।
निर्गच्छंस्तृण-काष्ठादि न गृण्हीयात्कथंचन ॥
यान्येव तृण-काष्ठानि त्विष्टिका विनिवेशिताः ।.

६. B. reads अनिश्चितम् for अनिश्चितः. ७ B. reads °काष्ठादीन् for °काष्ठादि. ८. B. reads धान्यवत् for यान्येव. ९. B. reads इष्टकाः for त्विष्टकाः. १०. B. reads यत् for तत्. ११. A. C. D. omit वेदयेत्.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

इति। अनिश्चिततृण-काष्ठादिग्रहणपरिभाषायामित्यर्थः[1]। परिभाषिते तु यथा परिभाषा तथेति। वेदयेत् निवेदयेदित्यर्थः[2]। भाटकं दत्वा द्रव्याद्यर्पणार्थं[3] गृहीतमणिकादिपात्रभेदनादावव्याह स एव—

'स्तोमवाहीनि[4] भाण्डानि पूर्णकालान्युपानयेत्[5]।
ग्रहीतुरावहेद्[6]भग्नं नष्टं वा[7]ऽन्यत्र सम्प्लवात्'॥
(ना. स्मृ. ६. २३.)

इति। सम्प्लवः परस्परसङ्घर्षः। तेनाल्पकेन कार्त्स्न्येन वा भिन्नं पूर्ववत् कृत्वा भाण्डं वा तन्मूल्यं वा स्वामिने देयम्। सम्प्लवादन्यत्र भेदे तु भाटकग्रहीतुरेव तदित्यर्थः[8]। कृतकर्मणे भृत्याय वेतनादातारं प्रत्याह बृहस्पतिः—

'कृते कर्मणि यः स्वामी न दद्याद्वेतनं भृते[9]।
राज्ञा दापयितव्यः स्याद्विनयं चानुरूपतः'॥

इति। रुग्णं[10] भृत्यं पथि त्यजतो दण्डमाह कात्यायनः—

'त्यजेत् पथि सहायं यो श्रान्तं[11] रोगार्तमेव च।
प्राप्नुयात् साहसं पूर्वं ग्रामे त्र्यहमपालयन्'॥

इति। पण्यस्त्री तदुपभोक्तृविषये त्वाह नारदः—

---

१. B. reads °तृणकाष्ठादिग्रहणाग्रहणपरिभाषादिविहीन इत्यर्थः and C. °तृणकाष्ठादिग्रहणात् ग्रहणप्रतिभाषानिवेदित इत्यर्थः for °तृणकाष्ठादिग्रहणपरिभाषायामित्यर्थः. २. B. and C. omit वेदयेत् निवेदयेदित्यर्थः. ३. B. C. read द्रव्यप्रापणार्थं for द्रव्याद्यर्पणार्थं. ४. B. in margin and C. read सोमवाहीनि; while B. originally reads स्तोमवाहीनि for स्तोमवाहीनि. ५. C. reads उपातयेत् for उपानयेत्. ६. B. reads आनयेत् for आवहेत्. ७. B. substitutes च for वा. ८. B. and C. read तद्भवेदित्यर्थ; for तदित्यर्थः. ९. C. reads मृते for भृते. १०. B. reads निमग्नं for रुग्णं; while C. omits रुग्णं भृत्यं. ११. B. भृत्यं for श्रान्तं; while C. भृत्यं रोगार्तं for श्रान्तं रोगार्तं°.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

'शुल्कं गृहीत्वा पण्यस्त्री नेच्छन्ती द्विगुणं वहेत् ।
अनिच्छन् शुल्कदाताऽपि शुल्कहानिमवाप्नुयात्' ॥
(ना. स्मृ. ६. १८.)

इति । एतदव्याधितादिविषयम् । व्याधित[1]विषये तु स्मृत्यन्तरम्—

'व्याधिता[2] सम्भ्रमा व्यग्रा राजधर्मपरायणा ।
आमन्त्रिता च ना गच्छेदवाच्या वडवा स्मृता' ॥

इति । अ[3]त्यन्तावश्यकेषु [4]कार्येषु जातसम्भ्रमा सं[5]भ्रमपदेन उक्ता । तत्रैव व्याकुला व्यग्रा । वडवा दा[6]सी । दा[7]सीग्रहण-मत्र पण्यस्त्रीप्रदर्शनार्थम् । उपभोक्तारं प्रत्याह नारदः—

'अप्रयच्छन् तथा शुल्कमनुभूय पुमान् स्त्रियम् ।
अ[8]क्रमेण तु[9] सङ्गच्छेद् घा[10]तयेद्वा नखादिभिः ॥
अयोनौ यः स[11]माक्रामेद्बहुभिर्वा विवासयेत् ।
शुल्कं त्व[12]ष्टगुणं दाप्यो विनयं तावदेव तु' ॥
(ना. स्मृ. ६. १९. २०.)

इति । पण्यस्त्रियो[13]स्त्वपराधे दण्डादिकं मत्स्यपुराणेऽभिहितम् ।

---

१. B. and C. read व्याधितादि° for व्याधित°. २. C. reads व्याधिना for व्याधिता. ३. D. and C. read भय-त्रासाद्यावश्यकेषु for अत्यन्तावश्य-केषु. ४. A. C. and D. omit कार्येषु. ५. C. reads संभ्रमं यदिनोक्ता for सभ्रमपदेनोक्ता. ६. C. reads दासः for दासी. ७. B. and C. read तद्ग्रहणम् for दासीग्रहणम्. ८. C. wrongly reads this line thus–अक्रमे बत संछेद्यादवंतरनखादिभिः for अक्रमेण तु संगच्छेद् घातयेद्वा नखादिभिः. ९. B. C. substitute च for तु. १०. B. reads खादन् दन्त° for घातयेद्वा. ११. B. originally reads समाक्रामेद्वृद्धिर्वापि विवासयेत्, but in margin substitutes बहुभिर्वा and तन्नतिर्वा instead of वृद्धिर्वा; while C. संक्रमेत्तन्नतिर्वा for समा-क्रामेद्बहुभिर्वा. १२. B. reads सोष्टगुणं and C. चाष्टगुणं for त्वष्टगुणं. १३. B. omits तु.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

'गृहीत्वा वेतनं वेश्या लोभादन्यत्र गच्छति।
तां दमं दापयेद्द्व्यादितरस्यापि भाटकम्' ॥
(म. पु. २३.७.)

इति। अत्र निर्णयमाह नारदः—
'वेश्याप्रधाना ये तत्र कामुकास्तद्गृहोषिताः।
तत्समुत्थेषु कार्येषु निर्णयं संशये विदुः' ॥
(ना. स्मृ. ६. २४.)—

इति। इत्थं अभ्युपेत्याशुश्रूषाख्यविवादपदान्तर्गतवेतनस्यानपाकर्माख्यं विवादपदं मनूक्तोद्देशक्रमानुसारेणाभिहितम्।

इति वेतनस्याऽनपाकर्माख्यं विवादपदमभिहितम्।

अथेदानीमभ्युपेत्याशुश्रूषाख्यं विवादपदमभिधीयते। तस्य स्वरूपं नारद आह—
'अभ्युपेत्य च शुश्रूषां यस्तां न प्रतिपद्यते।
अशुश्रूषाभ्युपेत्यैतद्विवादपदमुच्यते' ॥
(ना. स्मृ. ९. १.)

इति। आज्ञाकरणं शुश्रूषा। शुश्रूषकश्च पञ्चप्रकारः। तथा च स एव—

---

१. B. and C. read हन्यादित्यस्यापि for द्व्यादितरस्यापि च. २. B. and C. read निर्णेतृन् for निर्णयम्. ३. B. originally reads °प्रयाणा for °प्रधाना. ४. A. and D. read यास्तत्र for ये तत्र. ५. C. reads समुत्पन्नेषु for तत्समुत्थेषु. ६. B. omits इत्थं and C. विवादपदांत बाधितं नामकर्माख्यम् for वेतनस्यानपाकर्माख्यं. ७. C. omits अथ. ८. B. adds तदेव after इदानीं; while C. reads तदेव before इदानीं and D. and A. omit तदेव. ९. C. and D. read तु for च. १०. C. omits शुश्रूषा.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

'[1]शुश्रूषकः पञ्चविधः शास्त्रे दृष्टो मनीषिभिः।
चतुर्विधः कर्मकरः शेषो[2] दासास्त्रिपञ्चकाः॥ (२)
शिष्या-ऽन्तेवासि-ऽभृतकाः चतुर्थस्त्वधिकर्मकृत्।
एते कर्मकरा ज्ञेया दासास्तु गृहजादयः॥ (३)
सामान्यमस्वतन्त्रत्वं तेषामाहुर्मनीषिणः।
[3]जातकर्मकरस्तूक्तो वि[4]शेषो वृत्तितस्तथा॥ (४)
कर्मापि द्विविधं ज्ञेयमशुभं शुभमेव च।
अशुभं दासकर्मोक्तं शुभं क[5]र्मकरे स्मृतम्॥ (५)
[6]गृहद्वारा-ऽशुचिस्थान-रथ्या-ऽवस्करशोधनम्[7]।
गुह्याङ्गस्पर्शनोच्छिष्टविण्मूत्रग्रहणोज्झनम्[8]॥ (६)
[9]इच्छतः स्वामिनश्चाङ्गैरुपस्थानमथा[10]न्ततः।
अशुभं कर्म विज्ञेयं शुभमन्यदतः परम्'॥ (७)

(ना. स्मृ. ५. २-७.)

इति। तत्र शिष्यो वेदविद्यार्थी। अन्तेवासी शिल्पशिक्षार्थी। मूल्येन यः कर्म करोति स भृतकः। अधिकर्मकृत्

---

१. C. reads पुरुषकारः for शुश्रुषकः २. B. reads तेषां दासस्त्रिपंचकः; while C. तेषां दासास्त्रिपंचप्रकाराः for शेषा दासास्त्रिपंचकाः. ३. B. and C. read जातिकर्मकृतः for जातकर्मकरः. ४. C. reads शेषो for विशेषो. ५. B. reads कर्मकृता for कर्मकरे; while C. कर्म विज्ञेयमतःपरम् for कर्मकरेस्मृतम्.
६. C. omits—

गृहद्वारा-ऽशुऽचिस्थान-रथ्या-ऽवस्करशोधनम्।
गुह्यांगस्पर्शनोच्छिष्टविण्मूत्रग्रहणोज्झनम्॥
इच्छतः स्वामिनश्चांगैरूपस्थानमथान्ततः॥
अशुभं कर्म विज्ञेयं शुमन्यदतः परम्'॥ इति॥

७. B. reads °साधनम् for °शोधनम्. ८. B. reads °ग्रहणोक्तकम् for ग्रहणोज्झनम्. ९. D. reads इष्टतः स्वामिनोश्चांगे for इच्छतः स्वामिनश्चांगैः°. १० B. reads °स्थानमतां for °स्थानमथां°.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

कर्मकुर्वतामधिष्ठाता। अशुचेस्थाने उच्छिष्टप्रक्षेपार्थं गर्तादिकम्। अवस्करः गृहसम्मोर्जितपांस्वादिनिचयत्यागस्थानम्। भृतकश्च त्रिविधः । तदुक्तं तेनैव—

'उत्तमः कार्यकर्ता च मध्यमस्तु कृषीवलः ।
अधमो भारवाही स्यादित्येवं त्रिविधो भृतः' ॥

(ना. स्मृ. ६. ९.)

इति । दासस्वरूपमपि तेनैव दर्शितम्—

'गृहजातस्तथा क्रीतो लब्धो दायादुपागतः ।
अन्नाकालभृतस्तद्वदाहितः स्वामिना च यः ॥
मोक्षितो महतश्चर्णाद्युद्धे प्राप्तः पणे जितः ।
तवाहमित्युपगतः प्रव्रज्यावसितः कृतः ॥
भक्तदासश्च विज्ञेयस्तथैव वडवाहृतः ।
विक्रेता चात्मनः शास्त्रे दासाः पञ्चदश स्मृताः' ॥

(ना. स्मृ. ६. १६–१८.)

इति । गृहजातः स्वगृहे दास्यां जातः । क्रीतो मूल्येन । लब्ध प्रतिग्रहादिना । दायागतो रिक्थग्राहित्वेन प्राप्तः । अन्नाकालभृतः दुर्भिक्षे दासत्वाय पोषितः । आहितः स्वामिना

१. B. and C. read °मार्जित° °संमार्जित°. २. D. and A. read °पांश्वादि° for °पांस्वादि°. ३. B and C. °निचयस्थानं उज्झनं त्यागः for °निचयत्यागस्थानम्. ४. B. and C. read आयुधीयोऽत्र for कार्यकर्ता च. ५. B. and C. read अनाकाल° for अन्नाकाल°. ६. B. originally reads महतस्सेकात् and C. महतस्त्वर्णात्. ७. B. and C. read युद्धप्राप्तः for युद्धे प्राप्तः. ८. B. originally reads वडवाभृतः for वडवाहृतः. ९. B. and C. read स्वगृहदास्यां for स्वगृहे दास्यां. १०. B. reads दायागतो भवेत्; while C. दायादभागतः for दायागतः. ११. B. and C. read अनाकाल for अन्नाकाल°.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

धनग्रहणेनाधीनतां नीतः । ऋणमोक्षितः ऋणमोचनप्रत्युपकारतया दासत्वमभ्युपगतः । युद्धप्राप्तः समरे विजित्य गृहीतः । पणे[1] विजितः दासत्वपणके[2] द्यूतादौ[3] जितः । तवाहमित्युपगतः तव दासोऽस्मीति स्वयमेवागतः । प्रव्रज्याऽवसितः प्रव्रज्यातश्च्युतः । कृतः कृतकालः[4] एतावत्कालं त्वं मद्दास इत्युपगत[5] इति । भक्तदासः सर्वकालं भक्तार्थे एव दासत्वमभ्युपगतः । वडवया[6] गृहदास्या आहृतः तल्लोभेन[7] तामुद्वाह्य[8] दासत्वेन प्रविष्टः । यः आत्मानं विक्रीणीते असावात्मविक्रेता । एवं पञ्चदशप्रकाराः । यत्तु मनुनोक्तम्—

'ध्वजाहृतो[9] भक्तदासो गृहजः क्रीत दत्त्रिमौ ।
पैतृको दण्डदासश्च सप्तैते दासयोनयः' ॥

(म. स्मृ. ८. ४१५.)

इति तत्तेषां दासत्वप्रतिपादनार्थम् । न तु परिसङ्ख्यार्थम्[10] । अत्र शिष्याणां कर्मकृतौ[11] विशेषो नारदेनोक्तः—

'आ विद्याग्रहणाच्छिष्यः शुश्रूषेत् प्रयतो गुरुम् ।
तद्वृत्तिर्गुरुदारेषु[12] गुरुपुत्रे तथैव च' ॥

(ना. स्मृ. ६. ११.)

इति । विद्या चात्र[13] त्रयी । तदुक्तं बृहस्पतिना—

---

१. B. reads पणे कृतः for पणे विजितः. २. B. reads पण° for पणके. ३. C. reads सूतादौ for द्यूतादौ. ४. B. and C. omit कृतकालः; while D. reads कृतकालं for कृतकालः. ५. B. reads इत्यभ्युपगमितः; while C. इत्यभ्युपगतमितः. ६. A.C. and D. omit वडवया; while C. reads वडवा यथा for वडवया. ७. C. omits तल्लोभेन तामुद्वाह्य दासत्वेन प्रविष्टः. ८. B. reads तामुद्वीक्ष्य for तामुद्वाह्य. ९. B. and D. read ध्वजाहृतो for ध्वजाहृतो; while C. omits ध्वजाहृतो भक्तदासो गृहजः. १०. C. reads अवारिसंख्यार्थम् for परिसंख्यार्थम्. ११. B. and C. read कर्मकृतो for कर्मकृतौ. १२. C. reads ततकृतिर्गुरुदारेषु for तद्वृतिर्गु दारेषु. १३. C. reads वात्र for चात्र.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

'विद्या त्रयी समाख्याता ऋग्यजुः-सामलक्षणा ।
तदर्थं गुरुशुश्रूषां प्रकुर्याच्च प्रचोदिताम्' ॥

इति । अन्तेवासिनामपि कर्मकृतौ विशेषस्तेनैवोक्तः—

'विज्ञानमुच्यते शिल्पं हेम-रूप्यादिसंस्कृतिः ।
नृत्यादिकं च तत्प्राप्तं कुर्यात् कर्म गुरोर्गृहे' ॥

इति । नारदोऽपि—

'स्वं शिल्पमिच्छन्वा हर्तुं बान्धवानामनुज्ञया ।
आचार्यस्य वसेदन्ते कालं कृत्वा सुनिश्चितम्' ॥

(ना. स्मृ. ६. १०.)

इति । आचार्यस्याऽपि कर्तव्यमाह स एव—

'आचार्यः शिक्षयेदेनं स्वगृहे दत्तभोजनम् ।
न चान्यत् कारयेत् कर्म पुत्रवच्चैनमाचरेत्' ॥

(ना. स्मृ. ६. १३.)

इति । अन्यकर्मकारकमाचार्यं प्रत्याह कात्यायनः—

'यस्तु न ग्राहयेच्छिल्पं कर्माण्यन्यानि कारयेत् ।
प्राप्नुयात् साहसं पूर्वं तस्माच्छिष्यो निवर्तते' ॥

इति । परिभाषितकालात् प्रागेव विद्याप्राप्तावपि तावत्कालं वसेदित्याह नारदः—

१. B. reads प्रकुर्याच्छात्रचोदिताम् for प्रकुर्याच्च प्रचोदिताम्: while C. शास्त्रचोदिताम् छात्रचोदिताम्. २. B. and C. read कर्मकृतो for कर्मकृतौ. ३. C. °रूप्याधि° for °रूप्यादि°. ४. B. and C. read वृत्तादिकं for नृत्यादिकं. ५. B. and C. read स्व° for स्वं. ६. B. and C. read °मिच्छन्नाहर्तुं for मिच्छन्वा हर्तुं. ७. B. reads विनिश्चितम् for सुनिश्चितम्. ८. C. reads नवाऽन्यत् for नचाऽन्यत्. ९. B. and C. read शिष्यं for शिल्पं. १०. B. originally reads निवर्तयेत्. ११. B. and C. read निवसेत् for. वसेत्.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

'शिक्षितोऽपि कृतं कालमन्तेवासी समापयेत् ।
तत्र कर्म च यत् कुर्यादाचार्यस्यैव तत्फलम्' ॥
(ना. स्मृ. ६. १६.)

इति । याज्ञवल्क्योऽपि—

'कृतशिल्पोऽपि निवसेत् कृतकालं गुरोर्गृहे ।
अन्तेवासी गुरुप्राप्तभोजनस्तत्फलं[1]प्रदः' ॥
(या. स्मृ. २. १८४.)

इति । दुष्टं प्रत्याह नारदः—

'शिक्षयन्तमदुष्टं च यस्त्वाचार्यं परित्यजेत् ।
बलाद्वासयितव्यः स्याद्वधबन्धं[2] च सोऽर्हति' ॥

इति । वधो[3]त्र ताडनादिः । परिभाषितकालसम्पूर्त्तौ कर्तव्यमाह नारदः—

'गृहीतशिल्पः समये कृत्वाचार्यं प्रदक्षिणम् ।
शक्तितश्चानुमान्यैनं अन्तेवासी निवर्तते' ॥
(ना. स्मृ. ६. ११.)

इति । भृतकानामपि भृतिकृतः कालकृतश्च विशेषो बृहस्पतिना दर्शितः—

'यो भुङ्क्ते परदासीं तु स ज्ञेयो वडवाभृतः ।
कर्म तत्स्वामिनः कुर्याद्यथान्नेन[4] भृतोऽनरः ॥
बहुधाऽर्थभृतः प्रोक्तस्तथा भागभृतोऽपरः ।
हीनमध्योत्तमत्वं च सर्वेषामेव चोदितम् ॥

१. B. reads तत्फलक° for तत्फल°. २. B. and C. read वध-बंधौ for वध-बंधं. ३. B. and C. read बंधोऽत्र for वधोऽत्र. ४. C. ecads यथाऽन्योर्य° for यथाऽन्नेन.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

दिन-मासार्ध-षण्मास-त्रिमासा-ऽब्दे[1]भृतस्तथा ।
कर्म कुर्यात् प्रतिज्ञातं लभते परिभाषितम् ' ॥

इति । अर्थभृतस्य [2]बहुधात्वं [3]समर्थाल्पत्व-महत्त्वाभ्यां द्रष्टव्यम् । ते चाल्पत्व-महत्त्वे [4]शक्त्यनुसारतो द्रष्टव्ये । तथाच नारदः—

' भृत्यस्तु त्रिविधो ज्ञेयः उत्तमो मध्यमोऽधमः ।
शक्ति-[5]भक्तानुसाराभ्यां तेषां कर्माश्रया भृतिः' ॥

इति । भागभृतस्य द्वैविध्यमाह बृहस्पतिः—

' द्विप्रकारो भागभृतः [6]कृषणो जीवितः स्मृतः ।
जातसस्यात्तथा क्षीराल्लभते तु न संशयः ' ॥

इति । अधिकर्मकृतस्य स्वरूपमाह नारदः—

' [7]अर्थेष्वधिकृतो यःस्यात् कुटुम्बस्य तथोपरि ।
सोऽधिकर्मकृतो ज्ञेयः [8]स न कौटुम्बिकः स्मृतः ' ॥
(ना. स्मृ. ६. २२.)

इति । एवंनिरूपितेभ्यः शिष्याऽन्तेवासिभ्यः भृतकादिकर्म करेभ्यो दासानां भेदं दासशब्दव्युत्पत्ति[9]दर्शनमुखेनाह कात्यायनः—

' स्वतन्त्रस्यात्मनो दानाद्दासत्वं दारवद्भृगुः' ॥

---

१. B. and C. read त्रिमासाद्वा for त्रिमासाब्द°. २. B. in margin and C. read बहुधाभिधानं for बहुधात्वं. ३. B. and C. read अर्थाल्प-महत्त्वाभ्यां for समर्थाल्पत्व-महत्त्वाभ्याम्. ४. B. and C. read शक्ति-भक्त्यानुसारतो for शक्त्यनुसारतो. ५. B. and C. read °भक्त्यनुरूपा च for °भक्त्यनुसाराभ्यां. ६. A. and D. read कृपणो for कृषणो; while C. कृषणाजीवितो and B. originally कृषिनो जीविका and in margin कृषणाजीवितः. ७. B. in margin and C. read आविकृतो. ८. C. reads सर्व° for स च. ९. A. omits °दर्शन° after °व्युत्पत्ति°.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

इति । अयमर्थः । यथा भर्तुः सम्भोगार्थं स्वशरीरदानाद्दारत्वं तथा स्वतन्त्रस्यात्मनो दानाद्दासत्वम्—इति भृगुराचार्यो मन्यते—इति । तेन चात्यन्तपारार्थ्यदर्शनमासाद्य शुश्रूषकाः दासाः । पारार्थ्यमात्रमासाद्य शुश्रूषकाः कर्मकरा इत्युक्तं भवति । दासत्वं च ब्राह्मणव्यतिरिक्तेष्वेव त्रिषु वर्णेषु विज्ञेयम् ।

'दास्यं विप्रस्य न क्वचित्' ।

इति तेनैवोक्तत्वात् । तेष्वपि दास्यमानुलोम्येनैवेत्याह स एव—

'वर्णानामानुलोम्येन दास्यं न प्रतिलोभतः ।
राजन्य-वैश्य-शूद्राणां त्यजतां हि स्वतन्त्रताम्' ॥

इति । प्रातिलोम्येन दासत्वप्रतिषेधः स्वधर्मपरित्यागिभ्यो पतितेभ्यो ऽन्यत्र द्रष्टव्यः । तथा च नारदः—

'वर्णानां प्रातिलोम्येन दासत्वं न विधीयते ।
स्वधर्मत्यागिनोऽन्यत्र दारवद्दासता मता ‡ ॥

(ना. स्मृ. ६. २३.)

---

‡ दारवद्दासता मता यथा दारस्वीकरणमानुलोम्येन भवति न प्रातिलोम्येन तथा दासतापीत्यर्थः ।

---

१. C. reads °पारमार्थ्य° for °पारार्थ्य°. २. B. in margin and C. read सुखैकाः for शुश्रूषकाः. ३. A, B. and D. omit °मात्र° after पारार्थ्य°. ४. C. reads येनैवोक्तम्. ५. C. omits—

'..........................दास्यं न प्रतिलोमतः ।
राजन्य-वैश्य-शूद्राणां त्यजतां हि स्वतंत्रताम्' ॥
इति । प्रातिलोम्येन दासत्वप्रतिषेधः स्वधर्मपरित्यागिभ्यो पतितेभ्योऽन्यत्र द्रष्टव्यः ।
तथा च नारदः—
'वर्णानां प्रातिलोम्येन.............. ।.

६. B. reads °निषेधः for °प्रतिषेधः. ७. B. adds सनातेभ्यो for °त्यागिभ्यो; while A. and D. omit पतितेभ्यो. ८. C. reads स्वधन° for स्वधर्म.°

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

इति । दासवद्दासता[1] मतेति वचनात् ब्राह्मणस्य सवर्णं[2] प्रति दासत्वमाह[3] कात्यायनः—

'असवर्णे[4] तु विप्रस्य[5] दासत्वं नैव कारयेत्' ।

इति । यदि ब्राह्मणः स्वेच्छया दास्यं भजते तदाऽसौ नाशुभं कर्म कुर्यादित्याह स एव—

'श्रुताध्ययनसम्पन्नं[6] तदूनं कर्म कामतः ।
तत्रापि नाशुभं किंचित् प्रकुर्वीत द्विजोत्तमः' ॥

इति । ऊनं हीनमपि कर्म कामतो वेतनग्रहणमन्तरेण स्वेच्छया परहितार्थम् । क्षत्रिय-वैश्यविषये स्वामिनः कर्तव्यमाह मनुः—

'क्षत्रियं चैव वैश्यं च ब्राह्मणोऽवृत्तिकर्शितौ[7] ।
बिभृयादानृशंस्येन स्वानि कर्माणि कारयेत्' * ॥

(म. स्मृ. ८. ४११.)

इति । यस्तु द्विजातिं बलाद्दास्यं कर्म कारयति तस्य दण्डमाह स एव—

---

* अस्यार्थः—समर्थो ब्राह्मणः क्षत्रिय-वैश्यौ भृत्यभावेन पीडितौ करुणया स्वानि कर्माणि रक्षण-कृष्यादीनि कारयन् ग्रासाच्छादनादिना पोषयेत् । एवं बलवान् ब्राह्मणः तावुपगतौ अबिभ्रन् राज्ञा दण्डनीय इति प्रकरणसामर्थ्यात् गम्यते ।

---

१. C. reads दासता सदा for दासता मता. २. C. reads वर्णं for सवर्णं. ३. B. and C. read दासत्वप्राप्तावाह for दासत्वमाह. ४. B. reads समवर्णेऽपि; while C. असवर्णेऽपि. ५. B. and C. read विप्रं तु for विप्रस्य. ६. B. reads शीलाध्ययन°; while C. सिराध्ययन°. ७. B. and C. read वर्जितौ and गर्हितौ respectively for °कर्शितौ.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

'दास्यं तु कारयेन्मोहाद्ब्राह्मणः संस्कृतान् द्विजान् ।
अनिच्छतः प्राभवत्वाद्राज्ञा दण्डयः शतानि षट्' † ॥[1]

(म. स्मृ. ८. ४१२.)

इति । प्रभवतो भावः प्राभवत्वं तस्मादिति । शूद्रं तु यथाकथमपि दास्यं कारयेदित्याह स एव—

'शूद्रं तु कारयेद्दास्यं क्रीतमक्रीतमेव च ।
दास्यायैव हि सृष्टोऽसौ स्वयमेव स्वयम्भुवा' ॥

(म. स्मृ. ९. ४१३.)

इति । पञ्चदशप्रकाराणां दासानां मध्ये गृहजात क्रीत-लब्ध-दायागतानां चतुर्णां दासत्वं स्वामिप्रसादादेव मुच्यते । नान्यथेत्याह नारदः—

'तत्र पूर्वश्चतुर्वर्गो दासत्वान्न विमुच्यते ।
प्रसादात् स्वामिनोऽन्यत्र दास्यमेषां क्रमागतम्' ॥

(ना. स्मृ. ६. २९.)

इति । आत्मविक्रेतुरपि दासत्वं स्वामिप्रसादादन्यतो नापैतीत्याह नारदः—

† प्राभवत्वात् ब्राह्मणः कृतोपनयनान् द्विजातीननिच्छतः प्रभुत्वेन लोभाद्वा दास्यकर्म पादधावन-उच्छिष्टभक्षण-वस्त्रक्षालनादि कारयत् राज्ञा षट् शतानि दण्ड्यः । पणानामिती शेषः ।

१. B. and C. read प्रभावत्वात् for प्राभवत्वात्. २. B. and C. read प्रभावस्यभाक. प्राभावत्वं for प्रभवतो भावः प्राभवत्वम्. ३. C. reads दासत्वं न for दासत्वान्न. ४. C. reads प्रशास्यात् for प्रसादात्.

44

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant-2 Equipment Heritage Foundation, Jalgaon

'[1]विक्रीणीतेऽस्वतन्त्रः सन् य आत्मानं नराधमः ।
स जघन्यतमस्तेषां सोऽपि दास्यान्न मुच्यते' ॥

(ना. स्मृ. ५. ३७.)

इति । [2]प्रव्रज्यावासितस्याऽपि दास्यमोक्षो नास्तीत्याह स एव--

'राज्ञ एव हि[3] दासः स्यात् प्रव्रज्याऽ[4]वासितो नरः ।
न तस्य प्रतिमोक्षोऽस्ति न विशुद्धिः कथंचन' ॥

(ना. स्मृ. ५. ३५.)

इति । याज्ञवल्क्योऽपि—

'प्रव्रज्यावासितो राज्ञो दास आमरणान्तिकम्'* ।

(या. स्मृ. २. १८३.)

इति । प्रव्रज्याऽवसितस्य दासत्वं ब्राह्मणेतरविषयम् । ब्राह्मणस्तु निर्वास्य इत्याह कात्यायनः--

---

* प्रव्रज्या संन्यासः ततो ऽवसितः प्रच्युतः । स यदि अनभ्युपगतप्रायश्चित्तश्चेत् मरणपर्यंतं राज्ञ एव दासो भवति । कृतप्रायश्चित्तस्य तु न दासत्वमित्यवसितोऽर्थः ।

---

१. B. and C. omit—

'विक्रीणीतेऽस्वतंत्रः सन् य आत्मानं नराधमः ।
स जघन्यतमस्तेषां सोऽपि दास्यान्न मुच्यते ' ॥

इति. but C. omits the whole and B. except दास्यान्न मुच्यते ॥ इति. २. C. omits प्रव्रज्यावसितस्यापि दास्यमोक्षो नास्तीत्याह सएव. ३. B. and C. substitute तु for हि. ४. C. reads प्रव्रज्याऽध्यापितो for प्रव्रज्यावसितो.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

'प्रव्रज्याऽवसिता ये तु त्रयो वर्णा द्विजातयः† ।
निर्वासं कारयेद्विप्रं दासत्वं क्षत्रियं विशोः[1]' ॥

इति । निर्वासन[2]प्रकारमाह नारदः—

'पारिव्रज्यं गृहीत्वा तु यः स्वधर्मे न तिष्ठति ।
श्वपदेना[3]ङ्कयित्वा तं राजा शीघ्रं प्रवासयेत्' ॥

(ना. स्मृ. ५. ३४.)

इति । प्रव्रज्यावसिताऽऽत्मविक्रेतृव्यतिरिक्तानामन्नाका[4]-लभृतादीनां दास्यापनयनप्रकारमाह स एव—

'अन्नाकाल[5]भृतो दास्यान्मुच्यते गोद्वयं ददत्[6] ।
तद्भक्षितं[7] यद्दुर्भिक्षे न तत् शुद्धयेत कर्मणा ॥ (३१)
भक्तस्योत्क्षेपणेनैव[8] भक्तदासः[9] प्रमुच्यते ।
आहितोऽपि धनं दत्वा स्वामी यद्येन[10]मुद्धरेत् ॥

† 'ननु—आत्मन्यग्नीन् समारोप्य ब्राह्मणः प्रव्रजेत् गृहात्' इत्यादि वचनेषु ब्राह्मणस्यैव सन्यासाधिकारः तत्कथमुच्यते त्रयो वर्णा द्विजातय इति—इति चेत् न । 'यदहरेव विरजेत् तदहरेव प्रव्रजेत्' इति श्रुतौ वर्णविशेषग्रहणाभावात् 'त्रयाणां वर्णानां वेदमधीत्य चत्वार आश्रमाः' । इति सूत्रकारवचनात् अस्त्येवाधिकारस्त्रैवर्णिकानामिति सर्वमनवद्यम् ।

१. B. reads क्षत्रियं विशम् while C. क्षत्रियं त्रीकम्. २. C. reads निवासन° for निर्वासन°. ३. D. reads श्वापदेन for श्वपदेन. ४. B. and C. read अनाकाल° for अन्नाकाल°. ५. B. and C. read अनाकाल° for अन्नाकाल.° ६. C. read गोयुगं ददन् for गोद्वयं ददत्. ७. B. and C. read तं भक्षित यद्दुर्भिक्षे नतु शुद्धयेत्कर्मणा for तद्भक्षितं यत् दुर्भिक्षे न तत् शुद्धयेत कर्मणा. ८. B. reads °क्षेपणात् सद्यः while C. °क्षेपणात्सर्वे for °क्षेपणेनैव. ९. C. reads °दासात् for °दासः. १०. C. reads ये न त° for यद्येन.°

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

स्वपर्याप्तमृणं दत्वा तद्दृणात् स विमुच्यते । (३२)
तवाहमित्युपगतो युद्धे प्राप्तः पणे जितः ॥
प्रतिशीर्षप्रदानेन मुच्येरंस्तुल्यकर्मणा ।
कृतकालव्यपगमात् कृतकोऽपि विमुच्यते ॥
निग्रहाद्वडवायास्तु मुच्यते वडवाहृतः' ॥ (३६)
(ना. स्मृ. ५. ३१. ३६.)

इति । स्वामिनः प्राणरक्षणादपि गृहजातादयः सर्वे दास्यान्मुच्यन्त इत्याह नारदः—

'यश्चैषां स्वामिनं कश्चिन्मोचयेत् प्राणसंशयात् ।
दासत्वात्स विमुच्येत पुत्रभागं लभेत च' ॥
(ना. स्मृ. ५. ३९.)

इति । दासाभासानां मोचनमाह याज्ञवल्क्यः—
'बलाद्दासीकृतश्चोरैर्विक्रीतश्चापि मुच्यते' ॥
(या. स्मृ. २. १८२.)

इति । चकारादाहितो दत्तश्च गृह्यते । नारदोऽपि—

---

१. B. reads ऋणं तु सोदयं दत्वा ऋणिदास्यात्प्रमुच्यते; while C. ऋणं तु सोविमुच्येत for स्वपर्य्याप्तं ऋणंदत्वा तद्दृणात्स विमुच्यते. २. A. C. and D. omit the following :—

'तवाहमित्युपगतो युद्धे प्राप्तः पणे जितः ॥
प्रतिशीर्षप्रदानेन मुच्येरंस्तल्यकर्मणा ॥
कृतकालव्यपगमात्कृतकोऽपि विमुच्यते ॥

३. C. reads वडवाकृतः for वडवाहृतः. ४. B. C. and D. read °संरक्षणात् for °रक्षणात्. ५. C. reads यश्चैनां for यश्चैषां. ६. B. reads दत्तश्चापि and C. दत्तस्वामी for दत्तश्च.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

'चोरापहृत-विक्रीता ये च दासीकृता बलात् ।
राज्ञा मोचयितव्यास्ते दासत्वं तेषु नेष्यते' ॥

(ना. स्मृ. ९. ३८.)

इति । यस्त्वेकस्य पूर्वं दास्यमङ्गीकृत्य परस्यापि दासत्वमङ्गीकरोति असावपरेण विसर्जनीय इत्याह स एव—

'तवाहमिति वोऽस्मानं योऽस्वतन्त्रः प्रयच्छति ।
न स तं प्राप्नुयात् कामं पूर्वस्वामी लभेत तम्' ॥

(ना. स्मृ. ९. ४०.)

इति । दासविमोक्षणेतिकर्तव्यतामाह स एव—

'स्वदासमिच्छेद्यः कर्तुमदासं प्रीतमानसः ।
स्कन्धादादाय तस्याऽसौ भिन्द्यात्कुम्भं सहाम्भसा' ॥ ४२

साक्षताभिः सपुष्पाभिर्मूर्धन्यद्भिरवाकिरेत् ।
अदास इति चोक्त्वा त्रिः प्राङ्मुखस्तु तथोत्सृजेत् ॥ ४३

ततः प्रभृति वक्तव्यः स्वाम्यनुग्रहपालितः ।
भोज्याऽन्नोथ प्रतिग्राह्यो भवत्यभिमतः सताम्' ॥ ४४

(ना. स्मृ. ९. ४२–४४)

इति । सत्यभ्युपेत्याऽशुश्रूषाख्यं विवादपदं समाप्तम् ।

---

१. C. reads चौरापहृत° for चोरापहृत°. २. B. and C. read नेऽयते and D. नेक्ष्यते. ३. B. and C. read चात्मानं for वात्मानं. ४. C. reads स्वकं च for ऽस्वतंत्रः. ५. C. reads स्वदास्यं for स्वदासम्. ६. C. reads ततः for तथा. ७. C. reads °पालिनः for °पालितः.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust, Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अथ संविद्व्यतिक्रमाख्यविवादपदस्य विधिरुच्यते ।
तस्यं लक्षणं नारदेन व्यतिरेकमुखेन दर्शितम्—

'पाषण्ड-नैगमादीनां स्थितिः समय उच्यते ।
समयस्याऽनपाकर्म तद्विवादपदं स्मृतम्' ॥
(ना. स्मृ. ७. ३.)

इति । समयस्यानपाकर्म अव्यतिक्रमः समयपरिपालनम् । तद्व्यतिक्रममाणं विवादपदं भवतीत्यर्थः । तदुपयोगिनमर्थमाह बृहस्पतिः—

'वेदविद्याविदो विप्रान् श्रोत्रियांश्चाग्निहोत्रिणः ।
आहृत्य स्थापयेत्तत्र तेषां वृत्तिं प्रकल्पयेत्' ॥

इति । याज्ञवल्क्योऽपि—

'राजा कृत्वा पुरे स्थानं ब्राह्मणान् न्यस्य तत्र तु ।
त्रैविद्यान्[1] वृत्तिमद्ब्रूयात् स्वधर्मः पाल्यतामिति' ।
(या. स्मृ. २.–१८६.)

इति । ब्राह्मणान्[2] त्रैविद्यान् वेदत्रयसम्पन्नान् वृत्तिमत् भूरि हिरण्यादिसम्पन्नं कृत्वा स्वधर्मो वर्णा-ऽश्रम[3]-श्रुति-स्मृति-विहितो भगवद्भिरनुष्ठीयतामिति तान् ब्रूयात् । वृत्तिसम्पत्तिश्च बृहस्पतिना दर्शिता—

---

१. B. reads त्रैविद्यं for त्रैविद्यान्; while C. reads त्रैविध्यं वृत्तिमास्थाय स्वधर्मं प्रतिपालयेत् for त्रैविद्यान्वृत्तिमद्ब्रूयात् स्वधर्मः पाल्यतामिति' ॥. २. B. and C. read ब्राह्मणव्रातं त्रैविद्यं वेदत्रयसंपन्नम् for ब्राह्मणान् त्रैविद्यान् वेदत्रयसंपन्नान्. ३. B. adds °निमित्त° after वर्णाश्रम°.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

'अनाच्छेद्यकरास्तेभ्यः प्रदद्याद्गृहभूमयः ।
भुक्तभाव्याश्च¹ नृपतिर्लेखयित्वा स्वशासने²' ॥

इति । अनाच्छेद्यकरा अग्राह्यकराः भुक्ता भाव्यास्तु न विश्रुतकराः । आगामिनृपतिभिरग्राह्यकरा या भूमयस्ताः स्वशासने लिखित्वा तेभ्यो दद्यादित्यर्थः ।

तेषां कर्तव्यमाह बृहस्पतिः—

'नित्यं नैमित्तिकं काम्यं शान्तिकं पौष्टिकं तथा ।
पौराणां कर्म कुर्युस्ते संदिग्धेऽर्थे च निर्णयम्³' ॥

इति । याज्ञवल्क्योऽपि—

'निजधर्माविरोधेन यस्तु सामयिको भवेत् ।
सोऽपि यत्नेन संरक्ष्यो धर्मो राजकृतश्च यः ॥

(या. स्मृ. २. १८६.)

इति । श्रौत-स्मार्तधर्मानुपमर्देन गोत्राचारेक्षण⁴-देवगृहपालनादिरूपो यो धर्मः समयान्निष्पन्नो भवेत् सोऽपि यत्नेन पालनीयः । तथा राज्ञा च निजधर्माविरोधेनैव यावत्पथिक⁵-भोजनं देयम् । अस्मदरातिमण्डलं⁶ तुरङ्गादयो न प्रस्थापनीया

---

१. B. भुक्ता भाव्याश्च, C. भुक्ता भाव्यश्च and D. भुक्ताभाव्याश्च for भुक्तभाव्याश्च. २. C. omits—

°शासने, ॥ इति । अनाच्छेद्यकरा अग्राह्यकराः°
भुक्ता भाव्यास्तु नविश्रुतकराः ॥ आगामिनृपति-
भिरग्राह्यकरा या भूमयस्ताः स्वशासने लिखित्वा;

while A. and D. omit the same portion except स्वशासने, and read instead of that only तेभ्यो दद्यादित्यर्थः. ३. B. and C. read संदिग्धे निर्णयं तथेति for संदिग्धेऽर्थे च निर्णयम्. ४. B. reads गोप्रचाररक्षण ° (लक्षण) and C. गोप्रचारैः रक्षणं for गोत्राचारेक्षण°. ५. C. reads अवश्यायिक° for यावत्पथिक°. ६. B. in margin and C. read °मंडनं for °मंडलं.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

इत्येवं रूपः समयनिष्पन्नः सोऽपि रक्षणीयः। एवं राजनियुक्तसमुदायविशेषस्य कर्तव्यविशेषोऽभिहितः[1]। ग्रामादिसर्वसमुदायानां तु साधारणकार्यमाह बृहस्पतिः—

'ग्राम-श्रेणी-गणानां[2] च सङ्केतः समयक्रिया[3]।
बाधाकाले[4] तु सा कार्या धर्मकार्ये तथैव च॥
वाटचोरभये[5] बाधा सर्वसाधारणी[6] स्मृता।
तत्रोपशमनं कार्यं सर्वैर्णैकेन केनचित्'॥

इति। चकारेण पाषण्ड-नैगमादीनां चोपसंग्रहः। ततश्च ग्राम-श्रेणी-गण-पाषंड-नैगमादीनां उपद्रवकाले धर्मकार्ये च यां पारिभाषिकीं समयक्रियां विना उपद्रवो दुःपरिहरः धर्मकार्यं च दुःसाध्यं सा पारिभाषिकी समयक्रिया[7] सर्वैर्मिलितैः कार्या। वाटो वृकः[8]। वाट-चोरेभ्यो भये प्राप्ते तदा चोरोपशमनं[9] सर्वैः सम्भूय[10] कर्तव्यमित्यर्थः। धर्मकार्ये तु विशेषः तेनैवोक्तः—

'सभा प्रपा देवगृहं तडागारामसंस्कृतिः।
तथाऽनाथ[11]-दरिद्राणां संस्कारो यजनक्रिया॥
कुलायनं निरोधश्च कार्यमस्माभिरंशतः।
यत्त्वेवं लिखितं पत्रं धर्म्या सा समयक्रिया॥

---

१. C. reads °विशेषे विहितः for विशेषोऽभिहितः २. A. reads °गजानां for °गणानां. ३. C. reads समनाक्रिया for समयक्रिया. ४. B. originally reads °कार्ये for °काले; while C. धातुःकाले for बाधाकाले. ५. B. in margin and C. read चार° for वाट.° ६. B. and C. read सर्वे साधारणाः for सर्वसाधारणी. ७. A. and D. read समक्रिया for समयक्रियां. ८. A. and D. omit वाटो वृकः; while B. wrongly reads चाटो. ९. C. reads तद्वाधोपशमनं for तदा चोरोपशमनं. १०. C. omits संभूय. ११. C. reads तत्स्वानाऽथ° for तथाऽनाथ°.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

पालनीया [1]समस्तैस्तु [2]यः समर्थो विसंवदेत् ।
[3]सर्वस्वहरणं दण्डः तस्य निर्वासनं पुरात्' ॥

इति । [4]यजनक्रिया सोमयागादिकर्तृभ्यो दानम् । [5]कुलायनं [6]दुर्भिक्षादिपीडितवृथागमनम्[7] । [8]तस्मिन् गते सति यत्सं-वि[9]धानं विधेयं तदेव तच्छब्देनोच्यते । निरोधः दुर्भिक्षाद्यपगमपर्यन्तं धारणम् । अशातः गृह-क्षेत्र-पुरुषादिप्रयुक्तसङ्गृहीतधनेनाढ्यकत्वेन वा स्थितेन कार्यमिति । एवं कृता समयक्रिया न [10]केवलं समुदायिभिः पालनीया । किन्तु राज्ञाऽपीत्याह नारदः—

' पाषण्ड-नैगम-श्रेणि-पूग-[11]व्रात-गणादिषु ।
संरक्षेत् समयं राजा दुर्गे जनपदे तथा' ॥

(ना. स्मृ. ७. ६.)

इति । पाषण्डा वेद[12]बाह्या वेदोक्तलिङ्गधारिणो अतिरिक्ता वा सर्वे लिङ्गिनः । तेषु[13]मध्ये अभिचरणाद्याः समयाः सन्ति । नैगमाः सार्थिका वणिग्प्रभृतयः । तेषु [14]संकञ्चुक-सन्देशहर-

---

१. B. originally reads समर्थैः for समस्तैः. २. B. and C. omit the following यः समर्थो विसंवदेत् ॥ सर्वस्वहरणं दंडस्तस्य निर्वासनं पुरात्' ॥. ३. A. reads सर्वस्य for सर्वस्व°. ४. C. reads यजमान° for यजन°. ५. C. reads कुलायमस्माभिरंशतः and B. also the same. ६. B. and C. add तं before दुर्भिक्षा° and also read °पीडितं for °पीडितः. ७. B. and C. read °तथागमनं for °वृथागमनम्. ८. C. and D. read तस्मिन्नागते for तस्मिन्गते. ९. B. and C. read यथोक्तं विधानं for यंत्साविधानं. १०. A. omits केवलं. ११. B. in margin and C. read लिंगिनो चारणादिषु for पूगव्रातगणादिषु १२. B. and C. respectively read वेदोक्तलिंगधारिण्यतिरिक्ताः and वेदोक्तलिंगव्यतिरिक्ताः for वेद बाह्या वेदोक्तलिंगधारिणो अतिरिक्ता वा. १३. B. originally reads मच्छादिभिक्षाचरणाद्याः and in margin भावादिभिक्षाचरणाद्याः; while C. as B. in margin, all for °मध्ये अभिचरणाद्याः. १४. B. C. read सकल्पक° for सकंचुक°.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

पुरुषतिरस्कारिणो दण्ड्या इत्येवमादयो बहवःसमया विद्यन्ते। अथवा नैगमा आप्तप्रणीतत्वेन वेदप्रामाण्यमिच्छन्ति ये पाशुपतादयः, [1]पण्य-शिल्पोपजीविनः कुविंदादयः तास्वियमनयैव-श्रेण्या विक्रेयमित्यादिकाः समयाः संति युगा हस्त्यश्वारोहकादयः। व्रात-गणशब्दयोरर्थः कात्यायनेन दर्शितः—

'नानायुधधरा[2] व्राताः समवेतास्तु कीर्तिताः।
कुलानां तु समूहो यः गणः स[3] परिकीर्तितः' ॥

इति। [4]पूगे व्राते चान्योन्यमुत्सृज्य समरे न गन्तव्यमित्यादयः सन्ति समयाः। [5]गणे त पञ्चमेऽहनि पञ्चमे वा अब्दे कर्णवेधः कर्तव्य [6]इत्यादिसमयाः। दुर्गे धान्यादिकं गृहीत्वा [7]अन्यत्र यास्यता न तद्विक्रेयमि[8]त्यास्ते समयः। जनपदे तु क्वचिद्विक्रेतुर्हस्ते क्वचित् क्रेतृहस्ते [9]शुल्कग्रहणमित्यादिकोऽस्त्यनेकविधः समयः। त[10]त् समयजातं यथा न भ्रश्यति नच व्यतिवर्तेत तथा राजा कुर्यादित्यर्थः। समुदाये तु पुरुषविषये विशेषमाह बृहस्पतिः—

१. A. C. D. omit—

पण्यशिल्पोपजीविनः कुविंदादयः तास्वियमनयैव श्रेण्या
विक्रेयमित्यादिकाः समयाः संति युगा हस्त्यश्वारोहकादयः.

२. B. reads °धना for °धरा. ३. B. reads संपरिकीर्तितः for स परिकीर्तितः. ४. C. reads पूगजातेरन्योन्यमुत्सृष्टसमरे for पूगे व्राते चान्योन्यमुत्सृज्य समरे. ५. C. wrongly reads मणे for गणे. ६. B. reads इत्येवमादिरस्ति समयः for इत्यादिसमयाः; while C. इत्येवमादिशते समयः. ७. B. reads अन्यस्मिन् यास्यतो and C. अन्यच्च यास्यतो for अन्यत्र यास्यता. ८. B. and C. read °मित्यादिरस्ति समयः for °मित्यास्ते समयः. ९. A. omits शुल्कग्रहणमित्यादिकोऽस्त्यनेकविधः समयः। तत्समयजातं यथा न and C. शुल्कग्रहणमित्यादिकाऽस्त्वनेकविधाः समयाः. १०. B. and C. read तदेतत् for तत्.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

'कोशेन लेख्यक्रियया मध्यस्थैर्वा परस्परम्।
विश्वासं प्रथमं कृत्वा कुर्युः कार्याण्यनंतरम्' ॥

इति। मध्यस्थैः प्रतिभूभिः। कार्याणि समूहकार्याणि। कात्यायनोऽपि—

'समूहानां तु यो धर्मस्तेन धर्मेण ते सदा।
प्रकुर्युः सर्वकर्माणि स्वधर्मेषु व्यवस्थिताः' ॥

इति। समूहकार्यकारिषु हेयोपादेयान् विभजति बृहस्पतिः—

'विद्वेषिणो व्यसनिनः शालीनाऽलस-भीरवः।
वृद्धा[2] लुब्धाश्च बालाश्च न कार्याः कार्यचिन्तकाः' ॥

'शुचयो वेदधर्मज्ञा दक्षा दान्ताः कुलोद्भवाः।
सर्वकार्यप्रवीणाश्च कर्तव्यास्तु महत्तमाः' ॥

इति। ते च कियन्तः[3] कर्तव्या इत्यपेक्षिते स एवाह—

---

१. A. and D. omit—

'कोशेन लेख्यक्रियया मध्यस्थैर्वा परस्परम्।
विश्वासं प्रथमं कृत्वा कुर्यात् कार्याण्यनंतरम्' ॥०

इति। मध्यस्थैः प्रतिभूभिः। कार्याणि समूहकार्याणि।

कात्यायनोपि—

'समूहानां तु यो धर्मस्तेन धर्मेण ते सदा।
प्रकुर्युः सर्वकर्माणि स्वधर्मेषु व्यवस्थिताः' ॥

इति। समूहकार्यकारिषु हेयोपादेयान्विभजाति बृहस्पातिः—

२. B. and C. read लुब्धातिवृद्ध° for वृद्धा लुब्धाश्च. ३. C. reads क्रियावंतः for कियंतः.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

' द्वौ त्रयः पञ्च वा कार्याः समूहहितवादिनः ।
कर्तव्यं वचनं तेषां ग्राम-श्रेणि-गणादिभिः' ॥

इति । यः समूहहितवादिनां वचनातिक्रमं करोति तस्य दंडमाह याज्ञवल्क्यः—

'कर्तव्यं वचनं सर्वैः समूहहितवादिनाम् ।
यस्तत्र विपरीतःस्यात् स दाप्यः प्रथमं दमम्' ॥
(या. स्मृ. २. १८८.)

इति । कात्यायनोऽपि—

'युक्तियुक्तं च यो हन्याद्यः कार्यानवकाशदः ।
अयुक्तं चैव यो ब्रूयात् स दाप्यः पूर्वसाहसम्' ॥

इति । बृहस्पतिरपि—

' यस्तु साधारणं हिंस्यात् क्षिपेत्त्रैविद्यमेव वा ।
संवित्क्रियां विहन्याच्च स निर्वास्यः ततः पुरात्' ॥

इति । समूहिनामप्यधर्मेण द्वेषादिना कार्यकरणे दण्डमाह स एव—

---

१. A. and D. omit—
'कर्तव्यं वचनं तेषां ग्रामश्रेणिगणादिभिः' ॥
इति । यःसमूहहितवादिनां वचनातिक्रमं करोति तस्य दंडमाह याज्ञवल्क्यः—
' कर्तव्यं वचनं सर्वैः समूहहितवादिनाम् ।
while C. omits—
कर्तव्यं वचनं तेषां ग्राम-श्रेणि-गणा दिभिः' ॥
इति । यःसमूहहितवादिनां वचनातिक्रमं करोति तस्य दण्डमाह याज्ञवल्क्यः.—

२. B. originaly reads वस्कर्योऽनवकाशतः and in margin वस्तुर्योऽवकाशतः; while C. wrongly reads वक्तुर्यो नावकाशतः. ३. C. wrongly reads क्रिये for क्षिपेत्. ४. C. reads संधिक्रियां for संवित्क्रियां. ५. B. orniginally reads निर्वास्यस्तु वः पुरात् ॥ 'इति and in margin निर्वास्यः स ततः पुरा इति for स निर्वास्यः ततः पुरात्' ॥ इति । .

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

'बाधां कुर्युर्यदैकस्य सम्भूता द्वेषसंयुताः ।
राज्ञा सर्वे गृहीतार्थाः शास्याश्चैवानुबन्धतः' ॥

इति । अनुबंधतोऽनुसारतः न यथा समयं जह्युः । मुख्यानामौद्दण्ड्यं राजा निवारयेदित्याह स एव—

'मुख्यैः सहसमूहानां विसंवादो यदा भवेत् ।
तदा विचारयेद्राजा स्वमार्गे स्थापयेच्च तान्' ॥

इति । यस्तु मुख्यः समूहद्रव्यादिकमपहरति तस्य दण्डमाह याज्ञवल्क्यः—

'गणद्रव्यं हरेद्यस्तु संविदं लङ्घयेत्तु यः ।
सर्वस्वहरणं कृत्वा तं राष्ट्राद्विप्रवासयेत्' ॥
(या. स्मृ. २. १८७.)

इति । मर्मोद्घाटकादीनां पुरान्निर्वासनमेव दण्डमाह बृहस्पतिः—

'अरुन्तुदः सूचकश्च भेदकृत् साहसी तथा ।
श्रेणि-पूग-नृपद्वेष्टा क्षिप्रं निर्वास्यते तदा ॥

१. B. reads ज्ञात्वा निर्वायास्तु and C. ज्ञात्वातिचार्यास्तु for सर्वे गृहीतार्थाः. २. A. C. and D. omit अनुबंधतोऽनुसारतः. ३. C. omits न यथा समयंजह्युः ।

मुख्यानाभौद्दण्ड्यं राजा निवारयेदित्याह स एव —
मुख्यैःसह समूहानां विसंवादो यदा भवेत् ।
तदा विचारयेद्राजा........................ ||;

while A. and D. omit—

मुख्यानामौद्दण्ड्यं राजा निवारयेदित्याह स एव—
'मुख्यैः सह समूहानां विसंवादो यदाभवेत् ।·

४. C. omits °द्रव्यादिकम्. ५. B. reads लंघयेच्च and C. लंघयच्च for लंघयेत्तु. ६. B. and C. read °द्विष्टः for °द्वेष्टा. ७. B. and C. read ततः for तदा.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

पुर-श्रेणि गणाध्यक्षाः पुर-दुर्गनिवासिनः ।
वाग्धिग्दमं परित्यागं प्रकुर्युः पापकारिणः ॥
तैः कृतं यत्स्वधर्मेण निग्रहानुग्रहं नृणाम् ।
तद्राज्ञाऽप्यनुमन्तव्यं निसृष्टार्था हि ते स्मृताः' ॥

इति । निसृष्टार्था अनुज्ञातकार्या[1] इत्यर्थः । पाषण्ड्यादि-सर्वसमूहेषु यथा राज्ञा वर्त्तितव्यं तदाह नारदः—

'यो धर्मः कर्म यच्चैषामुपस्थानविधिश्च यः ।
यच्चैषां[2] वृत्त्युपादानमनुमन्येत तत्तथा ॥ (३)
प्रतिकूलं च यद्राज्ञः प्रकृत्यवमतं[3] च यत् । (४)
दोषवत्करणं यत् स्यादनाम्नायप्रकल्पितम्[4][5] ।
प्रवृत्तमपि तद्राजा श्रेयस्कामो निवर्तयेत्' ॥ (७)

(ना. स्मृ. १०. ३–७.)

इति । धर्मो जटावत्त्वादि[6] । कर्म प्रातःपर्युषितभिक्षाट-[7]नादि । उपस्थानविधिः समूहकार्यार्थे पटहादिध्वनिमाकर्ण्य मण्डपादौ मेलनम् । वृत्त्युपादानं[8] जीवनार्थं[9] तापसवेषपरिग्रहः ॥

---

१. C. wrongly reads °भार्या for °कार्या. २. A. and D. read यश्चैषां प्राप्नुयादर्थं for यच्चैषां वृत्त्युपादानम्; while B. and C. read प्रत्युपादानं. ३. B. in margin and C. read प्रकृता° for प्रकृत्य°; While the text of नारद read नानुकूलं for प्रतिकूलं and C. D. read राज्ञः for राजा. ४. C. reads अनाश्रीय° for अनाम्नाय°. ५. B. and C. read °प्रकर्षितं for °प्रकल्पितम्. ६. C. reads जटावडादिः for जटावत्त्वादिः. ७. B. and D. read प्रातः for प्रातः. ८. B. reads तस्य च प्रत्युपादानं; while C. simply प्रत्युपादानं for वृत्त्युपादानं. ९. B. and C. read जीवनाय for जीवनार्थं.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

राज्ञः प्रतिकूलमाधिकारिकशूद्रकर्तृकं त्रैवर्णिकविवादे धर्मविवेचनम्। तस्य च प्रतिकूलत्वमुक्तं स्मृत्यन्तरेण—

'यस्य राज्ञः तु कुरुते शूद्रो धर्मविवेचनम्।
तस्य प्रेक्षुभ्यते राष्ट्रं बलं कोषं च नश्यति' ॥

इति। प्रकृत्यवमतं स्वभावत एव यदननुज्ञातं पाषण्ड्यादिषु ताम्बूलभक्षणाद्यर्थानां बाधकं रसवादादिकम्। मिथः सङ्घातकरणं उपस्थानविधेः पूर्वं पृथक्पृथगवान्तरस्तोमकरणम् आहितकलशादिकम्। परस्परोपतापः राजपुरुषाश्रयणेनान्योन्यमर्थापहरणादिः। दोषवत्करणं श्रुति-स्मृतिविरुद्धं विधवादौ वेश्यात्वादिकं पाषण्ड्यादिभिः प्रकल्पितम्। संविल्लंघने दण्डमाह मनुः—

'यो ग्राम-देश-संघानां कृत्वा सत्येन संविदम्।
विसंवदेन्नरो लोभात्तं राष्ट्राद्विप्रवासयेत् ॥
निगृह्य दापयेदेनं समयव्यभिचारिणम्।
चतुःसुवर्णान् षण्णिष्कान् शतमानं च राजतम् ॥

---

१. B. and C. read सार्थिकादि° for आधिकारिक°. २. B. and C. read स्मृत्यन्तरे. ३. A. and D. प्रणश्यते for प्रक्षुभ्यते. ४, B. and C. read एवावज्ञातं for एव यदननुज्ञातं. ५. After this word A. C. and D. omit the following—

णाद्यर्थानां बाधकं रसवादादिकम्। मिथःसंघातकरणं उपस्थानविधेःपूर्वं पृथक्पृथगवान्तरस्तोमकरणम्। आहितकलशा-

६. B. in margin C. and D. read निकृत्य for निगृह्य. ७. B. reads व्यतिचारिणम् for व्यभिचारिणम्. ८. B. C. and D. read °सुवर्णकं निष्कं for °सुवर्णान् षण्णिष्कान्.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

एवं दण्डविधिं कुर्याद्धार्मिकः पृथिवीपतिः ।
ग्राम-जातिसमूहेषु समयव्यभिचारिणाम्[1]' ॥

(म. स्मृ. ८. २१९–२२१.)

इति । सत्येन शपथेन । एतेषां निर्वासन-चतुःसुवर्ण-षट्-निष्क-शतमानरूपाणां जाति-विद्या-गुणाद्यपेक्षया व्यवस्था कल्पनीया । समूहपूजार्थं राज्ञा समर्पितं द्रव्यं समूहाय यो न ददाति तं प्रत्याह याज्ञवल्क्यः—

'समूहकार्य आयातान् कृतकार्यान् विसर्जयेत् ।
[2]सदान-मान-सत्कारैः पूजयित्वा महीपतिः ॥
समूहकार्य[3]प्रहितो यल्लभेत तदर्पयेत् ।
एकादशगुणं दाप्यो यद्यस्मै नार्पयेत् स्वयम्' ॥

(या. स्मृ. २. १८९–१९०.)

इति । [4]समूहकार्यप्रहितेनार्पितं च धनं सर्वे समूहिनो विभज्य गृह्णीयुः । तथा च बृहस्पतिः—

'ततो लभ्येत यत्किंचित् सर्वेषामेव तत् समम्' ।

इति । विभज्य ग्रहणमणुद्रव्यविषयम् । यस्तत्पक्षविषये स एवाह— .

---

१. B. reads °व्यतिचारिणाम् for °व्यभिचारिणाम्. २. A. C. and D. read सशासन्मान° for सदान-मान°. ३. B. originally reads °पतितो for °प्रहितो.

४. A. C. and D. omit following:—

समूहकार्यप्रहितेनार्पितं च धनं सर्वे समूहिनो विभज्य गृण्हीयुः ।
तथा च बृहस्पतिः—
'ततो लभ्येत यत्किंचित् सर्वेषामेव तत् समम्' । इति ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

‘ षाण्मासिकं वत्सरं[1] वा विभक्तव्यं यथांशतः[2] ।
देयं बधिर[3]-वृद्धा-ऽन्ध-स्त्री-बाला-ऽऽतुर-रोगिषु[4] ॥
सान्तानिकादिषु तथा धर्म एष सनातनः’ ।

इति । राज्ञः[5] प्रसादलब्धं वंटणमपि सर्वेषां सममित्याह स एव—

‘ यत्तैः प्राप्तं रक्षितं वा गणार्थे वा ऋणं कृतम् ।
राज्ञः[6] प्रसादलब्धं च सर्वेषां तत्समाहितम्[7]’ ॥

इति । एतदभक्षितविषयम्[8] । भक्षिते तु कात्यायन आह—

‘ गणमुद्दिश्य यत्किञ्चित् कृत्वर्णं[9] भक्षितं भवेत् ।
आत्मार्थं[10] विनियुक्तं वा देयं तैरेव तद्भवेत्’ ॥

इति । ये तु समुदायं प्रसाद्य तदन्तर्गता ये च समुदाय-क्षोभादिना ततो बहिर्भूताः तान् प्रत्याह स एव—

‘ गणिनां[11] शिल्पिवर्गाणां गताः स्युर्ये तु मध्यताम् ।
प्राक्तनस्या[12]ऽधमर्णस्य[13] समांशाः[14] सर्व एव ते ॥

---

१. B. C. read मासिकं for वत्सरं. २. B. originally reads यथार्हतः, but corrects यथांशतः. ३. B. C. read वा निःस्व° for बधिर°. ४. B. in margin and C. read °योगिषु for °रोगिषु. ५. C. reads राज्ञां प्रसादलब्धं for राज्ञः प्रसादलब्धं; while B. reads राजप्रसादलब्धं च for राज्ञः प्रसादलब्धं. ६. B. and C. read राजप्रसादलब्धं च for राज्ञः प्रसादलब्धं च. ७. D. in margin and B. read एव तत्समम् for तत्समाहितम्; while C. for the following तत्समाहितम्’ ॥ इति । एतदभक्षितविषयम् reads समूहिनां सममित्येतद्भक्षितेतरविषयम्. ८. B. reads मुख्यैः कृतं ऋणं सर्वेषां समूहिनां सममित्येतद्भक्षितेतरविषयम् for एतदभक्षितविषयम्. ९. A. and D. read कृत्यर्णं for कृत्वर्णं. १०. C. wrongly reads आप्तार्थं for आत्मार्थं. ११. B. originally reads गणानां for गणिनां. १२. B. originally reads प्राक्तनस्य धनर्णस्य for प्राक्तनस्याऽधमर्णस्य; while in margin reads प्रकृतस्य धनर्णस्य and D. also in margin प्राकृतस्य धनर्णस्य originally प्राकृतस्याधमर्णस्य. १३. B. and C. read धनर्णस्य for ऽधमर्णस्य. १४. C. reads समाः स्युः for समांशाः.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

तथैव भोजनैर्भाव्यं[1] दान-धर्मक्रियासु च।
समूहस्थोंऽशभागी स्यात् प्रगतस्त्वंशभागभाक्[2]' ॥

इति।

॥ संविद्व्यतिक्रमाख्यं विवादपदम् ॥

अथ क्रीतानुशयः कथ्यते।

तत्स्वरूपं नारदेनोक्तम्—

'क्रीत्वा मूल्येन यः पण्यं क्रेता न बहु मन्यते।
क्रीतानुशय[3] इत्येतद्विवादपदमुच्यते' ॥

(ना. स्मृ. ९. १.)

इति। क्रीत्वाऽनुशयानुत्पत्त्यर्थं क्रेता क्रयात् प्रागेव सम्यक् परीक्षेत। तथा च स एव—

'क्रेता पण्यं परीक्षेत प्राक् स्वयं गुणदोषतः[4]।
परीक्षाऽभिमतं क्रीतं विक्रेतुर्न भवेत् पुनः' ॥

(ना. स्मृ. ९. ४.)

इति। परीक्षाभिमतं क्रीतं तद्दोषदर्शनेऽपि ग्रहीतुरेव भवति[5] न विक्रेतुः। तथा च बृहस्पतिः—

'परीक्षितं बहुमतं[6] गृहीत्वा[7] न पुनस्त्यजेत्'।

---

१. B. and C. read भोज्यवैभाव्य° for भोजनैर्भाव्यं. २. B. in margin reads प्रगतस्त्वंशभागिति and प्रगतस्त्वं ऋणं कृतम्; while C. प्रागतस्त्वं ऋणं कृतम् for प्रगतस्त्वंशभागभाक्; But D. in margin reads प्रगतस्त्वंशभागिति and प्रगतस्त्वंशभाङ् न तु. ३. B. originally reads क्रीत्वा° for क्रीता°. ४. A. reads °दोषभाक्. for °दोषतः. ५. B. and C. read भवेत् for भवाति. ६. A. reads बहुमितं for बहुमतं. ७. C. reads ग्रहीता for गृहीत्वा.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

इति। तत्कालपरीक्षितस्य पुनरर्पणाभावः सावधिविषयः[1]। तत्र[2] सद्यः परीक्षणस्य विहितत्वात्। तथा च व्यासः—

'चर्म-काष्ठेष्टका-सूत्र-धान्या-ऽऽसव-रसस्य च।
वस्त्र-रूप्य-हिरण्यानां सद्य एव परीक्षणम्'॥

इति। क्रीतानां पण्यानां द्रव्यविशेषेण परीक्षणकालावधिमाह स एव—

'[3]त्र्यहाद्दोह्यं परीक्षेत पञ्चाहाद्वाह्यमेव तु।
मणि-मुक्ता-प्रवालानां सप्ताहात् स्यात् परीक्षणम्।
द्विपदामर्धमासं[4] स्यात् पुंसां तद्द्विगुणं स्त्रियाः॥
दशाहात् सर्वबीजानामेकाहाल्लोह-वाससाम्।
अतो[5]ऽर्वाक् पण्यदोषस्तु यदि संज्ञायते[6] क्वचित्।
विक्रेतुः प्रतिदेयं[7] तत् क्रेता मूल्यमवाप्नुयात्'॥

इति। यथोक्तपरीक्षाकालातिक्रमे तु न प्रतिदेयमित्याह[8] कात्यायनः—

'अविज्ञातं तु यत् क्रीतं दुष्टं पश्चा[9]द्विभावितम्।
क्रीतं तत् स्वामिने देयं पण्यं[10] काले[11]ऽन्यथा न तु'॥

---

१. B. reads चर्मादिविषयः for सावधिविषयः; while C. येन अर्पणाभावश्चादिविषयः for पुनरर्पणाभावः सावधिविषयः २. B. and C. read तत् सद्यः for तत्र सद्यः; while A. originally reads तस्माद्यः and D. in margin reads अन्येषां सद्यः. ३. B. and C. read वाह्यं for दोह्यं. ४. अर्धमासे for अर्धमासं. ५. B. and C. read यतो for अतो. ६. B. C. read संजायते for संज्ञायते. ७. B. C. read प्रतिदानम् for प्रतिदेयम्. ८. C. reads °यं मिथ्येत्याह for °मित्याह. ९. C. reads यच्च for पश्चात्. १०. C. reads वर्णं for पण्यं. ११. B. originally reads क्रीत्वा for काले.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

इति । [1]अविज्ञातं परीक्षया तत्वतोऽपरिज्ञातं यस्य द्रव्यस्य [2]तद्यावत्परीक्षाकालः उक्तः [3]तस्मिन् काले प्रतिदेयम् । अन्यथा तत्कालाऽतिक्रमे दुष्टतया परिज्ञातमपि क्रीतं तत्स्वामिने न देयमित्यर्थः । पण्यानां देश-कालवशादुपचयापचयौ प्रथमतो [4]ज्ञातव्यावित्याह नारदः—

'क्षयं वृद्धिं च जानीयात् पण्यानामागमं तथा' ।
(ना. स्मृ. ९. ५.)

इति । [5]अश्वादिपण्यानामस्मिन् काले अस्मिन् देशे च वृद्धिर्भविष्यतीति जानीयात् तथा आगमनं [6]कुलीनत्वादिज्ञानार्थमुत्पादक-जन्म[7]भूम्यादिकं च जानीयादित्यर्थः । एवं सम्यक्परीक्ष्य [8]गुण-दोषदर्शनादि[9]कालमन्तरेण नानु[10]शयः कार्य इत्याह याज्ञवल्क्यः—

'[11]क्षयं वृद्धिं च वणिजा पण्यानामविजानता ।
क्रीत्वा नाऽनुशयः कार्यः कुर्वन् षड्भागदण्डभाक्' ॥
(या. स्मृ. २. २५८.)

---

१. B. reads आविज्ञातं परीक्षादौर्बल्यात्; while C. अविज्ञानं परीक्षा for अविज्ञातं परीक्षया. २. B. C. read यावान् for तत् यावत्. ३. C. read यस्मिन् for तस्मिन्. ४. C. reads ज्ञातत्वादित्याह for ज्ञातव्यावित्याह. ५. C. reads अवश्यादि° for अश्वादि.° ६. C. reads कुलीनत्वात् द्विजानामर्थं for कुलीनत्वादिज्ञानार्थम्. ७. B. reads °भूम्यादि for °भूम्यादिकं. ८. B. and C. read ज्ञानादोष° for गुणदोष°; while B. originally reads दासदोष for गुण-दोष°. ९. B. C. D. read °कारण° for °काल.° १०. C. reads ननु शयः for नानुशयः. ११. C. reads—

'ज्ञेयं वृद्धिं च वणिजां पण्यानामपि जानताम् ।
for क्षयं वृद्धिं च वणिजा पण्यानामविजानता ।.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

इति । परीक्षितपण्यानां[1] क्रयकालोत्तरकालं । परिमाणतोऽर्घकृतां वृद्धिमपश्यता क्रेत्राऽनुशयो न कार्यः । विक्रेत्रा च महार्घनिबन्धनं पण्यक्षयमपश्यता नानुशयितव्यम् । क्षयवृद्धिकालपरिज्ञाने[2] पुनः क्रेतुर्विक्रेतुरनुशयो[3] भवतीति व्यतिरेकादुक्तं भवति । पण्यदोष-तद्वृद्धि-क्षयकारणत्रितयाभावेऽनुशयकालाभ्यन्तरेऽपि यद्यनुशयं करोति तदा पण्यषड्भागं दण्डनीयः । अनुशयकारणसद्भावेऽप्यनुशयकालातिक्रमेण योऽनुशयं करोति सोऽप्येवं दण्डनीयः ।

एतच्चोपभोगाविनश्वरवस्तुविषयम् । उपभोगेन विनश्वर[4]-वस्तुविषये प्रत्यर्पणे ऽवधिमाह[5] नारदः—

'क्रीत्वा मूल्येन यः पण्यं दुष्क्रीतं मन्यते क्रयी[6] ।
विक्रेतुः[7] प्रतिदेयं तत् तस्मिन्नेवाह्न्यविक्षतम्[8]' ॥

(ना. स्मृ. ९. २.)

इति । द्वितीयादिदिवसप्रत्यर्पणे तु विशेषस्तेनैवोक्तः—

'द्वितीयेऽह्नि ददत् क्रेता मूल्यात् त्रिंशांशमावहेत् ।
द्विगुणं तु तृतीयेऽह्नि परतः क्रेतुरेव च[9]' ॥

(ना. स्मृ. ९. ३.)

इति । परतोऽनुशयो न कर्तव्य इत्यर्थः । यत्तु पुनर्मनुनोक्तम्—

---

१. B. C. read परीक्षित-क्रीतपण्यानां for परीक्षितपण्यानां. २. B. वृद्धिक्षय° for क्षयवृद्धिकाल°; while क्रयकाल°. ३. B. C. read क्रेतृ विक्रेत्रोः for क्रेतुर्विक्रेतुः. ४. B. reads. अशेषु for °विनश्वर°. ५. B. reads प्रत्यर्पणावधिं and C. प्रत्यर्पणबुद्धिं for प्रत्यर्पणेऽवधि°. ६. B. C. read दुष्क्रीतां मन्यते क्रियाम् for दुष्क्रीतं मन्यते क्रयी. ७. A. reads विक्रेयं for विक्रेतुः. ८. B. C. read तस्मिन्नवाविवक्षितम् for तस्मिन्नेवाह्न्यविक्षतम्. ९. B. C. read तु for च.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

'क्रीत्वा विक्रीय वा किञ्चिद्यस्येहा[1]नुशयो भवेत्।
सोऽन्तर्दशाहात्तद्द्रव्यं दद्याच्चैवाददीत वा' ॥

इति तदुपभोगेनाविनश्वरगृह-क्षेत्र-यान[2]-शयनादिविषयम्। तत्रैव[3] दशाहादिरुक्तत्वात्। तथा च कात्यायनः—

'भूमेर्दशाहे[4] विक्रेतुरायस्तत्क्रेतुरेव च।
द्वादशाहः[5] सपिण्डानामपि चाल्पमतः परम्' ॥

इति। अविनश्वरेषु स्थिरार्घेषु अनुशयकालातिक्रमेणानुशयं कुर्वतो मनुनोक्तो दंडो वेदितव्यः—

'परेण तु दशाहस्य न दद्यान्नापि दापयेत्।
आददानो ददच्चैव राज्ञा दण्ड्यः शतानि षट्' ॥

इति। बीजादिव्यतिरिक्तोपभोगः—

वासोविषयेऽपि नारदः—

'परिभुक्तं च यद्वासः क्लिष्टरूपं मलीमसम्।
सदोषमपि तत्क्रीतं विक्रेतुर्न भवेत् पुनः' ॥

(ना. स्मृ. ९. ७.)

इति। इति क्रीतानुशयः।

---

१. A. reads यस्यैवा° for यस्येहा°. २. B. and C. read °यानशयनादि° for क्रयानुशयनादि.° ३. B, and C. read this portion
तत्रैव दशाहादिरुक्तत्वात्। तथा च कात्यायनः-
भूमेर्दशाहे विक्रेतुरायस्तत्क्रेतुरेव च। द्वादशाहः सपिंडानामपि चाल्पमतःपरम्' ॥
after
वासोविषयेऽपि नारदः-
परिभुक्तं तु यद्वासः क्लिष्टरूपं मलीमसम्।
सदोषमपि तत्क्रीतं विक्रेतुर्न भवेत्पुनः' ॥.

४. B. reads
भूमेर्दशाहोनुशयः क्रेतुर्विक्रेतुरेवच।
and C.
भूमेर्दशाहोनुशयः क्रेतुरेव च यद्भवेत्।
for भूमेर्दशाहे विक्रेतुरायस्तत्क्रेतुरेव च।.

५. B. and C. read द्वादशाहं for द्वादशाहः.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

अथ विक्रीयासम्प्रदानम् ।

तस्य स्वरूपं नारदेनोक्तम्—

'विक्रीय पण्यं मूल्येन क्रेत्रे यन्न प्रदीयते ।
विक्रीयासम्प्रदानं तद्विवादपदमुच्यते' ॥

(ना. स्मृ. ८. १.)

इति । पण्यद्वैविध्यमुक्तं तेनैव—

'लोकेऽस्मिन्द्विविधं द्रव्यं स्थावरं जङ्गमं तथा ।
क्रय-विक्रयधर्मेषु सर्वं तत्पण्यमुच्यते ॥
षड्विधस्तस्य तु बुधैः[१] दाना-ऽऽदानविधिः स्मृतः ।
गणिमं[२] तुलिमं मेयं[३] क्रियया रूपतः श्रिया' ॥

(ना. स्मृ. ८. २–३.)

इति । गणिमं[४] सङ्ख्येयं क्रमुकफलादि । तुलिमं तुलया-[५]धाप्यं हेमचन्दनादि । मेयं[६] व्रीह्यादि । क्रियया वाहन-दोहनादिक्रियोपलक्षितमश्व-महिष्यादि । रूपतः पण्याङ्गनादि । श्रिया पद्मरागादि । तदेतत्षट्प्रकारमपि पण्यं विक्रीया[७]ऽप्रयच्छन् सोदयं दाप्य इत्याह याज्ञवल्क्यः—

'गृहीतमूल्यं यः पण्यं क्रेतुर्नैव प्रयच्छति ।
सोदयं तस्य दाप्योऽसौ दिग्लाभं वा दिगागते' ॥

(या. स्मृ. २. २५४.)

---

१. B. reads विधः for बुधैः. २. C. reads अलिमं for गणिमं. ३. C. reads नेयं for मेयं. ४. C. reads अणिमं for गणिमं. ५. B. reads तुलाधार्यं and C. तुलया धार्यं for तुलयाधाप्यं. ६. B. reads मेयं प्रस्यादिना व्रीह्यादि and C. omits मेयं and for व्रीह्यादि reads वाह्यादि. ७. B. reads विक्रीयासंप्रयच्छन् and C. विक्रीयाद्यं प्रयच्छन्.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

इति । गृहीतमूल्यं पण्यं विक्रेता यदि प्रार्थयमानाय स्वदेशवणिजे क्रेत्रे न समर्पयति त[1]च्च पण्यं य[2]दि क्रयकाले बहु-मूल्यं सत् कालान्तरे स्वल्पमूल्येनैव लभ्यते तदा सोदयं वृद्ध्या सहितं विक्रेता क्रेत्रे दापनीयः । य[3]दा मूल्यह्रासकृतः पण्यस्योदयो नास्ति किन्तु क्रयकाले या[4]वदेव यतो मूल्यस्य यत्पण्यमिति प्रतिपन्नं तावदेव तदा तत्पण्यमादा[5]य त[6]स्मिन् देशे विक्रीणा[7]नस्य यो लाभस्तेनोदयेन सहितं द्वि[8]कं त्रिकमित्यादिना-प्रतिपादितवृद्धिरूपोदयेन सहितं दापनीयः । यथाह नारदः—

'अ[9]र्घश्चेदवहीयेत सोदयं पण्यमावहेत् ।
स्थायिनामेष नियमो दिग्लाभो दिग्विचारिणाम्' ॥
(ना. स्मृ. ८. ९.)

इति । य[10]दा त्वर्घमहत्त्वेन पण्यस्य न्यूनभावस्तदा तस्मिन्पण्ये वस्त्र-गृहादिके य[11] उपभोगः तदाच्छादनसुखनिवासादिरूपो विक्रेतुः तत्सहितं पण्यमसौ दाप्यः । यथाह नारदः—

---

१. B. originally reads यच्च for तच्च. २. A. reads प्रति° and D. reads परि°. ३. B. reads तदा for यदा. ४. C. reads यावदेवास्य ततो for यावदेव यतो; while B. reads यावतो for यावदेव यतो. ५. C. reads °मावहेत् for °मादाय. ६. C. omits the following:—

तस्मिन्देशे विक्रीणानस्य यो लाभस्तेनोदयेन सहितं द्विकं
त्रिकं इत्त्यादिना प्रतिपादितवृद्धिरूपोदयेन सहितं
दापनीयः । तथाह नारदः—
अर्घश्चेदवहीयेत सोदयं पण्यमावहेत् ।.

७. B. reads विक्रीतस्य for विक्रीणानस्य. ८. A. C. D. omit this—द्विकं त्रिकमित्यादिना प्रतिपादितवृद्धिरूपोदयेन सहितं. ९. B. reads अर्थश्चेत् for अर्घश्चेत्. १०. B. reads यदात्यर्थ सहत्त्वेन for यदा त्वर्घमहत्त्वेन. ११. B, C. read यदुपभोगः for य उपभोगः.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

'विक्रीय पण्यं मूल्येन क्रेत्रे [1]यन्न प्रयच्छति ।
स्थावरस्यो[2]दयं दाप्यो जङ्गमस्य क्रियाफलम्' ॥
(ना. स्मृ. ८. ४.)

इति । क्षयशब्देन गतभोग उक्तः । यद्यपि तस्य दानमशक्यं तथापि तदनुगुणद्रव्यं देयम् । जङ्गमानां तु तत्कर्मनिमित्तं मूल्यं दाप्यः । यदा त्वसौ क्रेता देशान्तरात्पण्यग्रहणार्थमागतस्तदा तत्पण्यमादाय देशान्तरे विक्रीतस्य यो लाभस्तेन सहितं पण्यं विक्रेता क्रेत्रे दापनीयः । विष्णुस्तु वि[3]क्रेतुर्दण्डमप्याह—

'गृहीतमूल्यं यः पण्यं क्रेतुर्नैव दद्यात् तस्यासौ सोदयं दाप्यो राज्ञा चापि पणशतं दण्ड्यः' ।

इति । यस्तु विक्रीयाऽनुशयवशान्न समर्पयति यश्च क्रीत्वाऽनुशयवशान्न गृह्णाति [4]तं प्रत्याह कात्यायनः—

'क्रीत्वा प्राप्तं न गृह्णीयाद्यो न दद्याददूषितम् ।
स मूल्याद्द[5]शभागं तु दत्वा स्वं द्रव्यमाप्नुयात् ॥
अप्राप्तेऽर्थे [6]कृच्छ्रकाले कृते नैव प्रदापयेत् ।
एवं धर्मो दशाहात्तु परतोऽनुश[7]यो न तु' ॥

इति । अदूषितं जलादिनेति शेषः । दो[8]ह्य-वाह्यादिपण्यस्य दोहनादिनेति शेषः । दोह्य-वाह्यादिपणस्य दो[9]हनादिका[10]-

१. B. C. and D. read यःक्रेतुर्न for क्रेत्रे यन्न. २. The text of Narada and C. read क्षयं for उदयं. ३. C. wrongly reads विप्रे तु for विक्रेतुः. ४. B. and C. read तौ for तं. ५. B. and C. read दशमं भागं for दशभागं तु. ६. B. reads क्रियाकाले and C. कृतं कालं for कृच्छ्रकाले. ७. C. reads ऽनुशयोचितम् for ऽनुशयो न तु. ८. B. and C. omit दोह्य-वाह्यादिपण्यस्य दोहनादिनेति शेषः. ९. B. C. read दोहन-वाहनादि° for दोहनादि°. १०. B. and C. read °काले for °कालो°.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

लोऽर्थक्रियाकालः । तस्मिन् प्राप्ते सति अग्रहणे अदाने वा कृती दशमभागं प्रदापयेत् । किन्तु तमदत्त्वैव स्वयं द्रव्यमवाप्नुयात् । एष धर्मो दशाहात्प्राग्वेदितव्यः । ततः परमनुशयो न कर्तव्यः । विक्रीयाऽसम्प्रयच्छतोऽपि विक्रीतं पण्यं विक्रेतृपार्श्वे स्थितं तस्य यदि दैवादिना नाशः स्यात्तदा विक्रेतुरेव हानिरित्याह याज्ञवल्क्यः—

'*दैवराजोपघातेन पण्ये दोषमुपागते ।
हानिर्विक्रेतुरेवासौ याचितस्याप्रयच्छतः' ॥

(या. स्मृ. २. २५६.)

इति याचितस्येति विशेषणेन अयाचने न विक्रेतुर्हानिरित्यर्थादवगम्यते । नारदोऽपि—

'उपहन्येत वा पण्यं दह्येतापाह्रियेत वा ।
विक्रेतुरेव सोऽनर्थो विक्रीयाऽसम्प्रयच्छतः' ॥

(ना. स्मृ. ८. ६.)

---

* यदा पुनः क्रेत्रा प्रार्थ्यमानमपि पण्यं विक्रेता न समर्पयति अजातनुशयोऽपि तच्च राज-दैविकेनोपहतं भवति तदाऽसौ हानिर्विक्रेतुरेव । अतोऽन्यददुष्टं पण्यं विनष्टसदृशं क्रेत्रे देयम् इत्याशयः ।

---

१. B. C. read अप्राप्ते for प्राप्ते. २. B. C. read न प्रदापयेत् for प्रदापयेत्. ३. C. reads तत् for स्वं. ४. C. reads प्रागेव for प्राक्. ५. B. reads विक्रेतुःपार्श्वे and C. विक्रेतृपात्रे for विक्रेतृपार्श्वे. ६. B. and C. read दैवात् for दैवादिना. ७. B. D. read पण्यदोष उपागते, C. पण्यशेष उपागते, for पण्ये दोषमुपागते. ८. C. reads याचितस्य for याचितस्येति. ९. B. reads विशेषणात् C. विशेषेण, for विशेषणेन. १०. B. reads आयाचिते and C. wrongly reads देयाने for अयाचने. ११. B. reads इत्याद्य for इत्यर्था॰ १२. C. reads विक्रीतायां for विक्रीयास॰

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

इति । यथा याचितस्याप्रयच्छतो विक्रेतुर्हानिः तथा दीयमानपण्यमगृह्णतः क्रेतुरपीत्याह स एव—

'दीयमानं न गृह्णाति क्रीतं पण्यं च यः क्रयी ।
स एवास्य भवेद्दोषो विक्रेतुर्योऽप्रयच्छतः' ॥

(ना. स्मृ. ८. ९.)

याज्ञवल्क्योऽपि—

'विक्रीतमपि विक्रेयं पूर्वं क्रेतर्यगृह्णति ।
हानिश्चेत् क्रे[1]तृदोषेण क्रेतुरेव हि सा भवेत्' ॥

(या. स्मृ. २. २५९.)

इति । यस्तु नि[2]र्दोषं पण्यं दर्शयित्वा सदोषं विक्रीणीते यश्चान्यहस्ते विक्रीय तद[3]न्यस्मै तत् प्रयच्छति तयोः समानो दण्ड इत्याह [4]नारदः—

'निर्दोषं दर्शयित्वा तु सदोषं यः प्रयच्छति ।
मूल्यं तद्द्विगुणं दाप्यो विनयं तावदेव च ॥
अ[5]न्यहस्ते च [6]विक्रीय तथान्यस्मै प्रयच्छति ।
सोऽपि तद्द्विगुणं दाप्यो विनयं तावदेव तु' ॥

(ना. स्मृ. ८. २१-२२.)

इति । यत्तद्बुद्धिपूर्वकविषयम्—

---

† यदा पुनर्जातानुशयः क्रेता पण्यं न जिघृक्षति तदा विक्रीतमपि पण्यं अन्यत्र विक्रेयम् । यदा पुनर्विक्रेत्रा दीयमानं क्रेता न गृह्णाति तच्च पण्यं राज-दैविकेनोपहतं तदा क्रेतुरेवासौ हानिर्भवेत् । पण्याग्रहण-रूपेण क्रेतृदोषेण नाशितत्वात् इति तात्पर्यम् ।

---

१. C. reads कर्तृ° for क्रेतृ°. २. C reads विशेषं for निर्दोषं. ३. B. reads अन्यस्मै, and C. तदान्यस्मै for तदन्यस्मै. ४. B. C. and D. omit नारद. ५. B. and C. read तथान्यहस्ते for अन्यहस्ते च. ६. B. and C. read योन्यहस्ते for तथान्ये च: while D. reads तत् for च.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS Project Grant-2 Equipment Heritage Foundation, Jalgaon

'ज्ञात्वा सदोषं पण्यं यो विक्रीणीतेऽविचक्षणः ।
तदेव द्विगुणं दाप्यस्तत्समं विनयं तथा' ॥

इति बृहस्पतिनोक्तत्वात् । अबुद्धिपूर्वके तु केतुः अपरावर्तनमेव । अत एव एवंविधक्रयपरावर्तनं स एवाह—

'मत्तोन्मत्तेन विक्रीतं हीनमूल्यं भयेन वा ।
अस्वतंत्रेण मूढेन त्याज्यं तस्य पुनर्भवेत्' ॥

इति । अत एवंविधनियमो दत्तमूल्ये क्रये द्रष्टव्यः । अदत्तमूल्ये पुनः पण्ये वाङ्मात्रक्रये क्रेतृ-विक्रेत्रोः समयादृते प्रवृत्तौ वा न कश्चिद्दोषः । तथाच नारदः—

'दत्तमूल्यस्य पण्यस्य विधिरेष प्रकिर्तितः ।
अदत्तेऽन्यत्र समयान्न विक्रेतुरतिक्रमः' ॥

(ना. स्मृ. ८. १०.)

इति । यत्र पुनर्वाङ्मात्रेण क्रयो मा भूदिति विक्रेतृहस्ते क्रेत्रा यत्किञ्चिद्द्रव्यं दत्तं तत्र क्रेतुर्दोषवशेन क्रयासिद्धौ आह व्यासः—

'सत्यंकारं च यो दत्वा यथाकालं न दृश्यते ।
पण्यमेव निसृष्टं तद्दीयमानमगृह्णतः' ॥

१, B. reads °पूर्वे for °पूर्वके. २. B. reads क्रयपरावर्तनमेव for क्रेतुरपरावर्तनमेव; while C. omits क्रेतुः. ३. A. C. D. omit—

क्रयपरावर्तनं स एवाह ।
मत्तोन्मत्तेन विक्रीतं हीनमूल्यं भयेनवा ।
अस्वतंत्रेण मूढेन त्याज्यं तस्य पुर्नभवेत् ॥.

४. B. reads सर्वत्रायं विधिः for अत एव एवंविधनियमो and C. अत एवं विधः क्रम° for अत एवंविधनियमो. ५. D. omits वाङ्मात्रक्रये. ६. C. reads °रिति for °रति°.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

इति । अत्र पण्यद्रव्यस्योत्सर्गः सत्यंकारद्रव्यस्योत्सर्गोऽभिमतः । अस्मिन्नेव विषये विक्रेतृदोषवशेन क्रयासिद्धौ आह याज्ञवल्क्यः—

'सत्यंकारकृतं द्रव्यं द्विगुणं प्रतिदापयेत्'* ॥

इति । क्रीत्वानुशयानुत्पत्त्यर्थं कतिपयपण्यानां विक्रयानर्हत्वमाह मनुः—

'नान्यदन्य संसृष्टरूपं विक्रयमर्हति ।
न चासारं न च न्यूनं न दूरे न तिरोहितम्'‡ ॥
(म. स्मृ. ८. २०३.)

इति । इति क्रयविक्रयानुशयाख्यं विवादपदम् ।

---

* नेदं वचनमुपलभ्यते याज्ञवल्क्यस्मृतौ । A. चिह्नितपुस्तके कात्यायनवचनत्वेनोद्धृतमिदम् । कात्यायनव्यवहारस्य अनुपलब्धत्वान्न निश्चेतुं शक्यमिदं कात्यायनीयं नवेति विदांकुर्वन्तु धर्मशास्त्रपारंगताः सुधियः ।

‡ अत्रेदमनुसन्धेयम्—अन्यत् अन्येन संसृष्टरूपं यथा कुङ्कुमादिद्रव्यं कुसुम्भादिना मिश्रीकृत्य न विक्रेतव्यम् । न च असारं सारमित्यभिधाय । न च तुलादिना न्यूनम् । न परोक्षावस्थितम् । न रागादिना स्थगितरूपम् । एतादृशविक्रये अस्वामिविक्रयसादृश्यात् अस्वामिविक्रयसदृशो दण्डः स्यात् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अथ स्वामिपालविवादपदविधिः ।

तत्र तु तदभिधानप्रतिज्ञा मनुना कृता—

'पशुषु स्वामिनां[1] चैव पालानां च व्यतिक्रमे ।
विवादं संप्रवक्ष्यामि यथावद्धर्मतत्त्वतः[2]' ॥
(म. स्मृ. ८. २२९.)

इति । विवादं विवादापनोदमित्यर्थः । स्वामि-पालयोः कर्तव्यमाह नारदः—

'उपानयेद्गाः गोपालः प्रत्यहं रजनीक्षये[3] ।
चीर्णा पीताश्च ता गावः सायाह्ने प्रत्युपानयेत्' ॥
(ना. स्मृ. ६. ११.)

इति । गोग्रहणं पशुमात्रोपलक्षणार्थम् । अत एव याज्ञवल्क्यः—

'[4]यथार्पितान् पशून् गोपः सायं प्रत्यर्पयेत्तथा' ।
(या. स्मृ. २. १६४.)

इति । यावन्तः प्रातः समर्पिताः तावन्तः सायं प्रत्यर्पणीया इत्यर्थः । गवादिपरिपालकस्य भृतिपरिमाणमाह नारदः—

---

१. C. reads स्वामिना for स्वामिनां. २. C. reads धर्मसंकटे for धर्मतत्त्वतः.
३. The text of Narada and A. reads—
उपानयति या गोपः प्रत्यहं रजनाक्षयं.
४. A. C. and D. omit '.. ....
प्रत्यहं रजनीक्षये ।
चीर्णा पीताश्च ता गावः सायाह्ने प्रत्युपानयेत् ॥
इति गोग्रहणं पशुमात्रोपलक्षणार्थम् अत एव याज्ञवल्क्यः—
यथार्पितान्पशून् सायं....................।.
५. C. omits पुनः.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

igitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

'गवां शताद्वत्सतरी धेनुः स्यात् द्विशतात् भृतिः ।
प्रतिसंवत्सरं गोपे सन्दोहो वाऽष्टमेऽहनि ' ॥
(ना. स्मृ. ६. १०.)

इति । प्रतिसंवत्सरं वत्सतरी द्विहायनी गौः भृतिः भृतके कल्पनीया । द्विशते तु सवत्सा गौः । अष्टमे दिवसे दोहश्च भृतित्वेन कल्पनीय इत्यर्थः । सन्दोहः सर्वदोहः ।

'तया धेनुभृतः क्षीरं लभेतैवाष्टमेऽखिलम्' ॥

इति बृहस्पतिस्मरणात् । इयं च भृतिकल्पना परिभाषितभृतिविशेषाभावविषये । परिभाषिते तु भृतिविशेषे स एव देयः । मनुस्तु प्रकारान्तरेण भृतिमाह—

'गोपः क्षीरभृतो यस्तु स दुह्याद्दशतो वराम् ।
गोस्वाम्यनुमते भृत्यः सा स्यात् पालेऽभृते भृतिः' ॥
(म. स्मृ. ८. २३१.)

इति । दशतो दशदोग्ध्रीणां मध्ये वरामुत्कृष्टां गां स्वीकृत्य तत्क्षीरं क्षीरभृतो गृह्णीयात् । क्षीरशून्यानां तु क्षीरमूल्यतो भृतिः कल्पनीया । यद्यसौ द्रव्यान्तरेण भृतः न तत्रैषा भृतिरित्यर्थः । यस्त्वेवं परिकल्पितं वेतनं गृहीत्वा पशून्

---

१. B. reads द्विशते for द्विशतात्. २. Text of Narada and C. read संदोहश्चाष्टमे for संदोहो वाष्टमे. ३. C. reads ऽनुवत्सा for तु सवत्सा. ४. B. reads दोहस्तत् for दोहश्च. ५. C. reads °विशेषः for विशेषे. ६. B. reads भृतियत्तां for भृतिं. ७. D. reads गवां for गोपः. ८. C. reads संदुह्याद्दशतो वरः for संदुह्याद्दशतो वराम्. ९. B. C. and D. read ऽनुमतो for अनुमते. १०. B. reads पालोवर्ते भृतिः. C. reads तस्य भृते भृतिः, for पालेऽभृते भृतिः. ११. A. reads दुह्यात् for गृह्णीयात्: while B. and C. add भृत्यो arfer क्षीरभृतो. १२. B. and C. read द्रव्यान्तरेणाभृतः for द्रव्यान्तरेण भृतः. १३. B. and C. omit न.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

पालयन् भृत्यः[1] स्वदोषेण पशून् मारयेद्विनाशयति वा तं प्रत्याह याज्ञवल्क्यः—

'प्रमादमृतनष्टांश्च प्रदाप्यः कृतवेतनः' ।
(या. स्मृ. २. १६४.)

इति । प्रमादग्रहणं[2] पालकदोषोपलक्षणार्थम् । प्रमादश्च मनुना स्पष्टीकृतः—

'नष्टं विनष्टं[3] कृमिभिः[4] श्वहतं विषमे मृतम् ।
हीनं पुरुषकारेण प्रदद्यात् पाल एव तु' ॥
(म. स्मृ. ८. २३२.)

इति । प्रसह्य चोरैरपहृतो[5] न दाप्यः । तथा च स एव—

'विघुष्य[6] तु हृतं चौरैर्न पालो दातुमर्हति ।
यदि देशे च काले च स्वामिनः स्वस्य शंसति' ॥
(म. स्मृ. ८. २३३.)

इति । व्यासोऽपि—

'पालग्राहे ग्रामघाते तथा राष्ट्रस्य विप्लवे[7] ।
यत्प्रणष्टं हृतं वा स्यान्न पालेऽवत्र[8] किल्बिषम्' ॥

इति । एतत्पुरुषकारकरणे वेदितव्यम् । पुरुषकाराकरणे[9] तु भवत्येव किल्बिषी । पुरुषकारस्य स्वरूपं नारदेन दर्शितम्—

१. B. reads भृत्यैः for भृत्यः. २. B. and C. read प्रमापणं for प्रमादग्रहणं. ३. B. C. read दृष्टं च for विनष्टं. ४. D. reads कृमिणा दंशितं for कृमिभिः श्वहतं. ५. B. and C. read ऽपहृता for ऽपहृतो. ६. B. and C. read विधृष्य; while D. विशिष्य for विघुष्य. ७. B. and C. read विभ्रमे for विप्लवे. ८. B. C. read पालस्तत्र किल्बिषी for पालेऽवत्र किल्बिषम्. ९. C. omits °कारा°.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

‘कृमि-चोर-व्याघ्रभयात् दरी-श्वभ्राच्च* पालयेत् ।
व्यायच्छेच्छक्तितः क्रोशेत्[1] स्वामिने तु निवेदयेत्’॥
(ना. स्मृ. ६. १२.)

इति । व्यायच्छेत् निवारणार्थं[2] प्रयतेतेत्यर्थः । यः[3] प्रस्तुतार्थे न यतते तं प्रत्याह स एव—

‘अव्यायच्छन्नविक्रोशन् स्वामिने चाऽनिवेदयन् ।
वोढुं[4]मर्हति गोपस्तां[5] विनयं[6] चैव राजनि’ ॥
(ना. स्मृ. ६. १३.)

इति । विनयप्रमाणमाह याज्ञवल्क्यः—

‘पालदोषविनाशे तु पाले दण्डो विधीयते ।
अर्धत्रयोदशपणैः[7] स्वामिनो[8] द्रव्यमेव च’ ॥
(या. स्मृ. २. १६५.)

इति । अर्धत्रयोदशपणः† सार्धद्वादशकार्षापणः । पालदोषमाह मनुः—

* श्वभ्रात् गर्तात् । निवारणासामर्थ्ये क्रोशेत् आक्रोशेत् सहायार्थमन्यानाह्वयेदित्यर्थः ।

† विज्ञानेश्वरस्तु—‘अर्धाधिकत्रयोदशपणं’ इति व्याख्यातवान् । तन्न । अर्धत्रयोदशपण इति अर्धरहितत्रयोदशपणः सार्धद्वादशपण इति यावत् ।

‘तास्तृतीयपूर्वपदाः समानाधिकरणेन
समस्यन्त उत्तरपदलोपश्च’ ।

इति वार्तिकादुत्तरपदलोपी कर्मधारयोऽत्र भवति ।

‘सार्धद्विमात्रादिषु अर्धत्रिमात्रात्’ ।

इति महाभाष्यकारप्रयोगदर्शनात् विज्ञानेश्वरव्याख्यानमुपेक्षणीयमिति भाति ।

१. B. and C. read क्रोशन् for क्रोशेत्. २. B. C. omit निवारणार्थं. ३. B. and C. read यस्तु तत्र for यः प्रस्तुतार्थे. ४. D. reads दातुं for वोढुं. ५. B. and D. read °स्तान्. ६. C. reads स्वामिने for विनयं. ७. D. reads °पणाः for °पणैः; ८. B. C. and D. read स्वामिने for स्वामिनो.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

'अजाविके† तु संरुद्धे वृकैः¹ पाले त्वनायति ।
यां प्रसह्य वृको हन्यात्पाले तत्किल्बिषं भवेत्' ॥
(म. स्मृ. ८. २३९.)

इति । अनायति । उपद्रवनिराकरणाय अनागच्छतीत्यर्थः² । यां अजाविकजातीयाम्³,⁴ । एतत्सुगमस्थलस्थविषयम् । दुर्गमस्थलविषये⁵ तु न⁶ दोष इत्याह स एव—

'तासां चेदवरुद्धानां चरन्तीनां मिथो वने ।
यामुत्प्लुत्य⁷ वृको हन्यान्न पालस्तत्र किल्बिषी' ॥
(म. स्मृ. ८. २३६.)

इति । अवरुद्धानां पालकेन एकत्र स्थापितानामित्यर्थः । दैवमृतानां पुनः कर्णादिकं दर्शनीयम् । तथा च मनुः—

'कर्णौ चर्म च वालांश्च वस्त्यस्थिस्नायुरोचनम्⁸ ।
पशुषु स्वामिनां⁹ दद्यान्मृतेष्वङ्गानि¹⁰ दर्शयेत्‡' ॥
(म. स्मृ. ८. २३४.)

---

† अजाश्च अविकाश्च अजाविकम् । 'गवाश्वप्रभृतीनि च' इति द्वन्द्वैकवद्भावः ।

‡ स्वयं मृतेषु पशुषु कर्ण-चर्म-लाङ्गूलप्रवालान् नाभेरधोभागस्नायु-रोचनाः स्वामिनां दद्यात् । अन्यानि च चिह्नानि शृङ्गखुरादीनि दर्शयेत् इत्यर्थः ।

---

१. B. C. read वृक्षैः for वृकैः. २. C. reads नागच्छति for अनागच्छति. ३. B. reads अजाविवकजातीयां and C. अजाविकविजातीयां for अजाविकजातीयाम्. ४. B. adds °व्यक्ति after °जातीयाम्. ५. B. reads दुर्मलस्थल°, C. दुर्भगस्थल°, for दुर्गमस्थल°. ६. A. omits न. ७. B. C. and D. read उपेत्य for उत्प्लुत्य. ८. B. reads वस्ति(अस्थि)स्नायुनिरोधनम्, C. does the same, and the text वस्ति स्नायुं च रोचनाम् for वस्त्यस्थि-स्नायुरोचनम्. ९. A. and C. read पशुस्वामिषु for पशुषु स्वामिनां. १०. C. reads अंकाभि°; while B. originally अंकाति° and in margin शंकाभि° for अंगाभि° and B. °दर्शनम् for दर्शयेत्.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

इति । स्मृत्यन्तरमपि —

'कर्णौ चर्म च वालांश्च शृङ्ग-स्नाय्व[1]स्थि-रोचनम् ।
पशुस्वामिषु दद्यात्तु मृतेष्व[2]ङ्गानि दर्शयेत्' ॥

इति । गोप्रचारभूमिमाह याज्ञवल्क्यः—

'ग्रामेच्छया गोप्र[3]चारो भूमी राजे[4]च्छयाऽपि वा' ॥

(या. स्मृ. २. १६६.)

इति । ग्रामेच्छया ग्रामाल्पत्व-महत्वापेक्षया राजेच्छया वा गवां तृणादिभक्षणार्थं कियानपि भूभागोऽ[5]कृष्टः कल्पनीयः । गवां प्रचारस्थानासन्नसौ[6]कर्यार्थं ग्रामक्षेत्रयोरन्तरमाह स एव—

'धनुःशतं परीणाहो ग्रा[7]मे क्षेत्रान्तरं भवेत् ।
द्वे शते ख[8]र्वटस्य स्यान्नगरस्य चतुःशतम्' ॥

(या. स्मृ. २. १६७.)

इति । ग्राम-क्षेत्रयोरन्तरं धनुःशतपरिमितम् । स[9]र्वदैवं-विधिना शस्यं कार्यम् । खर्वटस्य प्रचुरकण्टकसन्तानस्य ग्रामस्य द्वे शते अ[10]न्तरे शस्यम् । नगरस्य च बहुजनसङ्कीर्णस्य[11] चतुःशतपरिमि[12]ते अन्तरे शस्यं कार्यमिति ।

---

१. B. C. read शृंगस्नायुनिरोचनम् for शृंगस्नाय्वस्थिरोचनम्. २. C. reads मृते शंकानिराश्रयामिति and B. मृते शंकानिरा (म) श्रयमिति for मृतेष्वङ्गानि दर्शयेत्. ३. D. reads °प्रचारि for °प्रचारो. ४. The text reads राजवशेन वा for राजेच्छयापि च; A. reads यदृच्छया for राजेच्छया. ५. B. C. and the text read ऽकृतः for ऽकृष्टः. ६. C. reads °सनयोः कार्यार्थं for °सनसौकर्यार्थं. ७. C. reads ग्रामक्षेत्रान्तरा; while B. and D. ग्रामक्षेत्रान्तरं for ग्रामे क्षेत्रान्तरं. ८. D. reads खर्वटे शस्यं for खर्वटस्य स्यात्. ९. B. C. read सर्वतोदिक्षु अनुप्रशस्यं for सर्वदैवंविधिना शस्यं. १०. B. and C read अनुप्रशस्ये कार्ये for अन्तरे शस्यं. ११. B. and C. add धनुषां after संकीर्णस्य. १२, B. and C. °परिमितमनुप्रशस्यं for °परिमिते अन्तरे शस्यं.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding: IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तत्र पशुनिवारणाय वृतिरपि कल्पनीयेत्याह कात्यायनः—

'आजातेष्वेव शस्येषु कुर्यादावरणं सदा[1] ।
दुःखेन विनिवार्यन्ते लब्धस्वादुरसा मृगाः' ॥

इति नारदोऽपि—

'पथि क्षेत्रे वृतिः कार्या यामुष्ट्रो नावलोकयेत् ।
न[2] लङ्घयेत्पशुर्वा[3]श्वो न भि[4]न्द्यात् यां च सूकरः' ॥

(ना. स्मृ. ११. ४१.)

इति । एवं च पशुनि[5]वारणे कृतेऽपि ता[6]मातिक्रम्य शस्यादि विनाशे सति मनुराह—

'प[7]थि क्षेत्रे परिवृते ग्रामान्तीयेऽथवा पुनः ।
सपालः शतदण्डार्हो वि[8]पालान् वारयेत् पशून्' ॥

(म. स्मृ. ८. २४०.)

इति । पथि क्षेत्रे परिवृते सति तां वृतिमतिक्रम्य शस्यघा[9]ते सपालः प[10]शुकार्ये पणशतदण्डार्हः । एवं ग्रामान्तीये ग्रामसमीपवर्तिनि क्षेत्रे परिवृते सति तां वृतिमतिक्रम्य शस्यघाते स पालः

---

१. C. reads महत् for सदा. २. B. C. read अलंघ्या या च पशुना for न लंघयेत्पशुर्वाश्वो. ३. D. reads नाश्वो for वाश्वो. ४. B. reads भिद्याद्या च and C. नियच्छेच्च for भिन्द्याद्यां च. ५. C. reads °निवारणोपाये for °निवारणे. ६. B. and C. read तं for ताम् ७. C. omits the verse,

'पथि क्षेत्रे परिवृते ग्रामान्तीयऽथवा पुनः ।
सपालः शतदण्डार्हो विपालान् वारयेत्पशून्' ॥

८. B. reads विपालं for विपालान् ९. B. and C. read °घाती for °घाते. १०. B. and C. read पशुः कार्षापण° for पशुकार्ये.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

शतपणदण्डार्हः । तत्पशुपालकः शतदण्डेन दण्डनीय इत्यर्थः । विपालं पालकरहितं पशुं क्षेत्रिको लगुडादिना निवारयेत् । नारदोपि—

'उत्क्रम्य तु वृतिं यत्र सस्यघातो गवादिभिः ।
पालः शास्यो भवेत्तत्र न चेच्छक्त्या निवारयेत्' ॥

(ना. स्मृ. ६. ४२.)

इति । अनावृतक्षेत्रघातविषये स एवाह—

'ग्रामोपान्ते च यत् क्षेत्रं विवीतान्ते महापथे ।
अनावृतं चेत्तन्नाशे न पालस्य व्यतिक्रमः' ॥

(ना. स्मृ. ६. ४३.)

इति । विवीतशब्देन तृणकाष्ठसमृद्धः परपरिगृहीतः प्रदेश उच्यते । व्यतिक्रमनिषेधेनार्थाद्दण्डाभावः सूचितः । तदनेन अपरिवृते पालस्य दण्डाभावः सूचितः । मनुस्तु साक्षाद्दण्डं निषेधति—

---

१. B. omits—

तत्पशुपालकः शतदण्डेन दण्डनीय इत्यर्थः ।
विपालं पालकरहितं पशुं क्षेत्रिको लगुडादिना निवारयेत् ॥ नारदोपि—
दुकूरयति कृतं यत्स्यात्सस्यघातो गवादिभिः ॥
पालः शास्यो भवेत्तत्र न चेच्छक्त्या निवारयेत् ॥
अनावृतक्षेत्रघातविषये स एवाह—
ग्रामोपान्ते च यत्क्षेत्रं विवीतांते महापथे ॥
अनावृतं चेत्तन्नाशे न पालस्य व्यतिक्रमः ।

इति । विवीतशब्देन तृणकाष्ठसमृद्धः परपरिगृहीतः प्रदेश उच्यते । व्यतिक्रमनिषेधेनार्थाद्दण्डाभावः सूचितः । तदनेन अपरिवृते पालस्य दण्डाभावः सूचितः. C. also omits this.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant-2 Equipment Heritage Foundation, Jalgaon

'तत्रापरिवृतं धान्यं विहिंस्युः[1] पशवो यदि ।
न तत्र प्रणयेद्दण्डं नृपतिः पशुरक्षिणाम्[2]' ॥
(म. स्मृ. ८. २३८.)

इति । एतददीर्घकालप्रचारविषयम् । दीर्घकालप्रचारे तु दण्डमर्हति । अत एवाल्पकालप्रचारे दोषाभावमाह विष्णुः—

'पथि ग्रामप्रान्ते[3] च न दोषोऽल्पकालम्' ।
(वि. स्मृ. ३. १९.)

इति । दण्डपरिमाणं तु पशुविशेषेण दर्शितं याज्ञवल्क्येन—

'माषानष्टौ तु महिषी शस्यघातस्य कारिणी ।
दण्डनीया तदर्धं तु गौस्तदर्धमजाविकम् ॥
भक्षयित्वोपविष्टानां यथोक्तात्[4] द्विगुणो दमः ।
सममेषां[5] विवीतेऽपि[6] खरोष्ट्रं महिषीसमम्' ॥
(या. स्मृ. २. १५९–१६०.)

इति । परशस्यघातकारिमहिषीस्वामी[7] प्रतिमहिष्यष्टौ[8] माषान् दण्डनीयः । चतुरो माषान् गोस्वामी । मेषस्वामी[9] द्वौ द्वौ माषौ । एषामेव पशूनां शस्यभक्षणादारभ्य यावच्छयनमनिवारितानां स्वामी यथोक्तदण्डात् द्विगुणं दण्डनीयः ।

---

१. D. reads प्रहिंस्युः for विहिंस्युः. २. C. and D. read °रक्षिणं for °रक्षिणाम्. ३. B. reads विपीतांते, and C. पतिते for °प्रांते; while the original text and B. read पतिमामसीमांते न दोषोऽनावृते चाल्पकानामिति for पथि ग्रामप्रान्ते च न दोषोऽल्पकालम्. ४. D. reads यथोक्त° for यथोक्तात्. ५. C. reads साम° for सम°. ६. C. reads विवीतोऽपि for विवीतेऽपि. ७. B. and C. read °कारिण्या महिष्या for °कारिमहिषी.° ८. C. omits प्रति, and reads महिष्या for °महिषि. ९. B. adds छाग before मेष.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

विवीतस्थ‡तृणाद्युपघाते पशुस्वामी शस्यक्षेत्रोपघातवद्दण्डनीयः। खरोष्ट्रस्वामी† महिषीस्वामिवद्दण्डनीयः । एतदज्ञानविषयम्।

'पणस्य पादौ द्वौ गां तु द्विगुणं महिषीं तथा ।
तथाऽजाविक-वत्सानां पादो दण्डः प्रकीर्तितः' ॥

इति स्मृत्यन्तरोक्तं वेदितव्यम् । माषाश्चात्र ताम्रिकपणस्य विंशतितमो भागः ।

'माषो विंशतिमो भागः पणस्य परिकीर्तितः' ।
(ना. स्मृ. ३. ७.)

इति नारदस्मरणात् । भक्षयित्वोपविष्टसवत्सविषये यथोक्ताच्चतुर्गुणो दण्डः । तदुक्तं स्मृत्यन्तरे—

'वत्सानां द्विगुणः प्रोक्तः सवत्सानां चतुर्गुणः' ।

इति । यत्पुनर्नारदेनोक्तम्—

'माषं गां दापयेद्दण्डं द्वौ माषौ महिषं तथा ।
तथाऽजाविक-वत्सानां दण्डः स्यादर्धमाषिकः' ।
(ना. स्मृ. ११. ३१.)

---

‡ विशेषेण वीतः प्रचुरतृण-काष्ठो रक्ष्यमाणः परिगृहीतो भूप्रदेश विवीत इत्युच्यते । तत्रस्थितस्य तृणादिकस्योपघाते इति व्याख्येयम् ।

† खरोष्ट्रं खराश्च उष्ट्राश्च खरोष्ट्रम् । सस्योपरोधकत्वेन खरोष्ट्रयोः प्रत्येकं महिषीतुल्यत्वात् दण्डस्य चापराधानुसारित्वात् खरोष्ट्रमिति समाहारो न विवक्षितः । तयोः स्वामी ।

१, A. C. and D. omit—

विवीतस्थतृणाद्युपघाते पशुस्वामी शस्यक्षेत्रोपघातवद्दण्डनीयः । खरोष्ट्रस्वामी महिषीस्वामीवद्दण्डनीयः । एतदज्ञानविषयम् ।

पणस्य पादौ द्वौ गां तु द्विगुणं महिषीं तथा ।.

२. C. reads विंशतिको for विंशतिमो. ३. B. and C. read वसतां for वत्सानां. ४. The text of नारद reads अजाविके सवत्से तु for तथाऽजाविक-वत्सानां.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

इति तन्मुहूर्तमात्रभक्षणविषयम्* । अतएवाहतुः शङ्ख-लिखितौ—

'रात्रौ चरन्ती गौः पञ्च माषान् ।
दिवा त्रीन् । मुहूर्ते माषम् । दण्डं ग्रासे' ॥

इति । आतुरपशुविषये तु न दण्ड इत्याह नारदः—

'राजग्रहगृहीतो वा वज्राशनिहतोऽपि वा ।
अपि सर्पेण वा दष्टो वृक्षाद्वा पतितो भवेत् ॥
व्याघ्रादिभिर्हतो वाऽपि व्याधिभिर्वाप्युपद्रुतः ।
न तत्र दोषः पालस्य न च दोषोऽस्ति गोमिनाम्' ॥

(ना. स्मृ. ११. ३६–३७.)

इति । अनातुरेष्वपि केषुचित्पशुषु दण्डाभावमाह स एव—

'गौः प्रसूता दशाहं च महोक्षो वाजि-कुञ्जरौ ।
निवार्याः स्युः प्रयत्नेन तेषां स्वामी न दण्डभाक्' ॥

(ना. स्मृ. ११. ३०.)

---

*विज्ञानेश्वरस्तु—पुनःप्ररोहयोग्यमूलावशेषभक्षणविषयमेतन्नारद-वाक्यमिति मन्यते ।

---

१. D. reads त्रिमुहूर्ते for दिवा त्रीन् मुहूर्ते. २. B. C. and D. read जरा° for राज°. ३. B. reads वृक्षाद्वापतितो for वृक्षाद्वा पतितो. ४. B. reads दण्डमाह for दण्डाभावमाह. ५. B. C. and D. read तु for च. ६. C. reads महोर्जेष्वपि कुञ्जरः for महोक्षो वाजि-कुञ्जरौ. ७. B. and D. read वाऽपि° for वाजि°. ८. B. and C. read °कुञ्जरः; while D. °कुञ्जराः.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

इति । मनुरपि—

'अनिर्दशाहां गां सूतां वृषान् देवपशूंस्तथा ।
[1]सपालान् वा विपालान् वा न दण्ड्यान्मनुरब्रवीत्' ।

(म. स्मृ. ८. २४२.)

इति । वृषा महोक्षाः । अथवा वृषो[2]त्सर्गविधानेनोत्सृष्टाः । याज्ञवल्क्योऽपि—

'महोक्षोत्सृष्टपशवः सूतिकाऽऽग[3]न्तुकादयः ।
पालो येषां न[4] ते मोच्या दैवराजपरि[5]प्लुताः' * ॥

(या. स्मृ. २. १६६.)

इति । [6]आगन्तुकः स्वयूथात् परिभ्रष्टः । आदिशब्देन मृतवत्सादयो गृह्यन्ते । अत एवोशनाः—

---

* महांश्चासौ उक्षा च महोक्षः वृषः सेक्ता । उत्सृष्टपशवः वृषोत्सर्गादिविधानेन देवतोद्देशेन वा त्यक्ताः । सूतिका प्रसूता अनिर्दशाहा । आगन्तुकः स्वयूथात् परिभ्रष्टो देशान्तरादागतः । अत्र आदिशब्दग्रहणात् हस्त्यश्वादयो गृह्यन्ते । ते च उशनसा दर्शिताः—

'अदण्ड्या हस्तिनो ह्यश्वाः प्रजापाला हि ते स्मृताः ।
'अदण्ड्यौ काण–कुब्जौ च ये शश्वत् कृतलक्षणाः' ॥

---

१. C. wrongly reads अपालत्वात् विपालत्वान्न दण्ड्यान्मनुरब्रवीत् for सपालान्वा विपालान्वा न दण्ड्यान्मनु रब्रवीत्. २. B. and C. read वृषोत्सर्जनविधानेनोत्सृष्टाः and D. वृषोत्सर्जनविधाने तु सृष्टाः. ३. C. reads °मनुकादयः for °गंतुकादयः. ४. B. originally, C. and D. read च for न. ५. C. reads °परिभ्रष्टः for °परिप्लुतः. ६. B. and D. omit आगन्तुकः स्वयूथात् परिभ्रष्टः; while C. reads °शकात् for °यूथात्.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

'अदण्ड्या मृतवत्सा च खंजा[1] रोगवती कृशा ।
अदण्ड्याऽऽगन्तुकी[2] गौश्च सूतिका चाभिसारिणी[3] ॥
अदण्ड्याश्चोत्सवे गावः श्राद्धकाले तथैव च' ।

इति । परशस्यविनाशे न केवलं स्वामी दण्डनीयः अपि तु शस्यमपि[4] दापनीयः । तथा च बृहस्पतिः—

'शस्यान्निवारयेद्[5]गास्तु चीर्णे[6] दोषद्वयं[7] भवेत् ।
स्वामी शतदमं[8] दाप्यः पालस्ताडनमर्हति ॥
शदश्च[9] सदमं चीर्णे समूले कार्षभक्षिते' ॥

इति । अतएव नारदः—

'समूलशस्यनाशे तु तत्स्वामी प्राप्नुयाच्छतम्[10] ।
वधेन गोपो मुच्येत दण्डं स्वामिनि पातयेत्' ॥

(ना. स्मृ. ११. ३१.)

इति । तत्स्वामी शस्यस्वामी शदश्च सामन्तादिभिः[11] परिकल्पितो[12] देयः । तथा च स एव—

---

१. C. and D. read संज्ञा for खंजा. २. C. reads गन्तुका for गन्तुकी. ३. B. and C. read चाति° for चाभि°. ४. B. reads दशदम् while C. शदम् for शस्यम्. ५. C. wrongly reads सभ्यां for शस्यात्. ६. C. reads चीर्णो for चीर्णे. ७. B. C. read दोषौ द्वयोर् for दोषद्वयम्. ८. B. and C. read शवदमं for शतदमं, ९. B. reads शदश्च दमश्च शददमं । चीर्णे समूलघातं भक्षिते सतीत्यर्थः and C. शदश्च सदमं चीर्णे समूलकर्षे भक्षिते सतीत्यर्थः for शदश्च सदमं चीर्णे समूले कार्षभक्षिते. १०. B. reads शदम् for शतम्. ११. B. reads समन्तादिभिः for सामन्तादिभिः. १२. B. reads कल्पितो for परिकल्पितः.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

'गोभिस्तु भक्षितं शस्यं यो नरः प्रतियाचते ।
सामन्तानुमते देयं धान्यं यत्तत्र भक्षितम्' ॥
(ना. स्मृ ११. ३८.)

इति । यस्तूशनसा शदयाचननिषेधोऽर्थात्कृतः—

'गोभिर्विनाशितं धान्यं यो नरः प्रतियाचते ।
पितरस्तस्य नाश्नन्ति नाश्नन्ति त्रिदिवौकसः' ॥

इति स ग्रामादिसमीपस्थानावृतक्षेत्रविषयः ।

इति स्वामिपालाख्यं विवादपदम् ।

अथ सीमाविवादनिर्णयः ।

तत्र तावत् सीमा चतुर्विधा । जनपदसीमा ग्रामसीमा गृहसीमा क्षेत्रसीमा च इति । सा च यथाक्रमं पञ्चलक्षणा । तदुक्तं नारदेन—

'ध्वजिनी मत्स्यिनी चैव नैधानी भयवर्जिता ।
राजशासननीता च सीमा पञ्चविधा स्मृता' ॥
(ना. स्मृ. १२. ३.)

इति । ध्वजिनी वृक्षादिलक्षिता । मत्स्यिनी जललिङ्गान्विता । नैधानी निखाततुषाङ्गारादिमती भयवर्जिता अर्थिप्र-

---

१. B. and C. read धान्यं यत्तत्र वापितम् and D. धान्यं यत्तत्र कल्पितम् for धान्यं यत्तत्र भक्षितम्. २. C. reads नैधिनी for नैधानी. ३. C. reads नैधिनी for नैधानी. ४. A. reads तुषारांगारा° for तुषांगारा°. ५. B. reads भयरहिता for भयवर्जिता.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

त्यर्थिपरस्परविषयोपत्तिनिर्मिता[1] । राजशासननीता ज्ञातृचिह्नाद्यभावे राजेच्छया निर्मिता[2]* । तथा च व्यासः—

' ग्रामयोरुभयोः सीम्नि वृक्षा यत्र समुन्नताः[3] ।
समुच्छ्रिता ध्वजाकारा ध्वजिनी सा प्रकीर्तिता ॥
स्वच्छन्दगा बहुजला मत्स्य-कूर्म-समन्विता ।
प्रत्यक्[4]प्रवाहिनी यत्र सा सीमा मत्स्यिनी मता ॥
तुषाङ्गारकपालैस्तु कुम्भै[5]रायतनैस्तथा ।
सीमाऽत्र[6] चिह्निता कार्या नैधानी सा निगद्यते ' ॥

इति । वृक्षाश्च न्यग्रोधादयः । तदाह मनुः—

---

* एवंभूतायां सीमायां षोढा विवादः संभवति । यथाह कात्यायनः
' आधिक्यं न्यूनता चांशे अस्तिनास्तित्वमेव च ।
अभोगभुक्तिः सीमा च षड् भूवादस्य हेतवः' ॥

तथाहि—ममात्र पञ्चनिवर्तनाया भूमेरधिका भूरस्ति'—इति केनचिदुक्ते पञ्चनिवर्तनैव नाधिका—इति आधिक्ये विवादः । चतुरस्रद्विशतपरिमितभूभागस्य निवर्तनमिति संज्ञा । पञ्चनिवर्तना मदीया भूमिरित्युक्तेन ततो न्यूनैवेति न्यूनतायां विवादः । पञ्चनिवर्तनो ममांश इत्युक्ते अंश एव नास्ति इति अस्तिनास्तित्वविवादः संभवति । मदीया भूः प्रागविद्यमानभोगैव भुज्यते इत्युक्तेन संतता चिरंतन्येव मे भुक्तिः इति अभोगभुक्तौ विवादः । इयं मर्यादा इयं वा ? इति सीमाविवादः । इति षट्प्रकार एव विवादः संभवति ।

---

१. B. reads संप्रतिप्रत्यन्विता; while C. संवितिपत्तिनिर्मिता for विषयापत्तिनिर्मिता. २. B. reads निर्णीता for निर्मिता. ३. B. and C. read समन्ततः for समुन्नताः. ४. B. C. read नित्यं for प्रत्यक्; while B. and C. read प्रवाहिणी for प्रवाहिनी. ५. D. reads कुब्जैः for कुंभैः. ६. B. and C. read प्रचिह्निता for अत्र चिह्निता.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

'सीमावृक्षांस्तु कुर्वीत न्यग्रोधा-ऽश्वत्थ-किंशुकान् ।
शाल्मली-साल-तालांश्च क्षीरिणश्चैव पादपान्' ॥
(म. स्मृ. ८. २४६.)

इति । प्रत्यक्प्रवाहिनीत्यनेन वाप्यादीनि प्रकाशचिह्नान्युपलक्ष्यन्ते । तानि च बृहस्पतिना दर्शितानि—

'वापी-कूप-तडागानि चैत्या-ऽऽराम-सुरालयाः ।
स्थलनिम्न-नदीस्रोतः-शर-गुल्म-नगादयः ॥
प्रकाशचिह्नान्येतानि सीमायां कारयेत् सदा' ।

इति । तुषाङ्गार-कपालैरिति करीषादीनां गुप्तलिङ्गानामप्युपलक्षणम् । तानि च तेनैव दर्शितानि—

'करीषा-ऽस्थितुषाङ्गारशर्करा-ऽश्म-कपालिकाः ।
सिकते-ऽष्टक-गोवाल-कार्पासा-ऽस्थीनि भस्म च ॥
प्रक्षिप्य कुम्भेष्वेतानि सीमान्तेषु निधापयेत्' ।

इति । तानि च सीमालिङ्गानि स्थविरैर्बालानां दर्शनीयानि । तथा च बृहस्पतिः—

---

१. D. reads शालवृक्षांश्च for सालतालांश्च. २. B. C. read नित्य° for प्रत्यक्°. ३. B. C. read तटाकानि for तडागानि. ४. B. C. read स्थल निम्नं for स्थल-निम्न°. ५. B. in margin reads °लता°. ६. C. reads करीषादीनांगुल° for करीषादीनां गुप्त°. १०. C. omits—

करीषास्थितुषांगारशर्कराश्मकपालिकाः ।
सिकतेष्टकगोवालकार्पासास्थीनि भस्म च ॥
प्रक्षिप्य कुंभेष्वेतानि सीमान्तेषु निधापयेत् ।

इति । B. originally reads °शर्वभस्म° and in margin दावभस्म for शर्कराश्मक°.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

‘ ततः पौगण्ड-बालानां प्रयत्नेन प्रदर्शयेत् ।
वार्धके च शिशूनां ते दर्शयेयुस्तथैव च ॥
एवं परंपराज्ञाते सीमाभ्रान्तिर्न जायते ’ ।

इति । एवं निरूपितैर्लिङ्गैः सीमा-विवादनिर्णयं कुर्यादित्याह मनुः —

‘ एतैर्लिङ्गैर्नयेत् सीमां राजा विवदमानयोः ।
पूर्वभुक्त्या च सततमुदकस्यागमेन च ॥
यदि संशय एव स्याल्लिङ्गानामपि दर्शने ।
साक्षिप्रत्यय एव स्यात् सीमावादविनिर्णयः ॥
साक्ष्यभावे तु चत्वारो ग्रामाः सामन्तवासिनः† ।
सीमाविनिर्णयं कुर्युः प्रयता राजसंनिधौ ’ ॥

(म. स्मृ. ८. २५२–३, २५८.)

इति । प्रथमं तावदर्थि-प्रत्यर्थिप्रदर्शितैः लिङ्गैः सीमाविवादनिर्णयः । अथात्राप्यविश्वासस्तदा लिङ्गविषयकात् सीमाविषयकाद्वा साक्षिप्रत्ययान्निर्णयः । यदा साक्षिनामभावस्तदा सामन्तैर्विनिर्णय इत्यर्थः ।

---

† चतुर्दिशं समन्तभवाः सामन्ताः तद्वासिनश्चत्वारो ग्रामवासिनः ।

---

१. B. and C. read °ज्ञाने for °ज्ञाते. २. B. and D. omit पूर्वभुक्त्या च सततमुदकस्यागमेन च ॥. ३. B. reads सीमान्त° for सामन्त°. ४. C. reads अर्थिप्रदर्शितैः for अर्थिप्रत्यर्थिप्रदर्शितैः; while D. omits °प्रदर्शितैः. ५. B. reads अथार्थिन्यपि and C. अर्थार्थिनि for अथात्रापि.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

'तेषामभावे सामन्ताः'—

इति कात्यायनेनोक्तत्वात् । के पुनः सामन्ता‡ इत्यपेक्षिते स एवाह—

'[1]संसक्तकास्तु सामन्तास्तत्संसक्तास्तथोत्तराः ।
संसक्तसक्तसंसक्ताः पद्माकाराः प्रकीर्तिताः' ॥

इति । विप्रतिपन्नसीमकस्य क्षेत्रस्य च[2]तसृषु दिक्षु सन्निहितग्रामादिभोक्तारः सं[3]सक्ताः । एत एव सामन्तशब्दाभिधेयाः । यदा पुनरदुष्टसंसक्तका न सन्ति तदा संसक्तसं[4]सक्ततत्संसक्तैः निर्णयः कार्यः । तदाह स एव—

'स्वार्थसिद्धौ च दु[5]ष्टेषु सामान्तेष्वर्थगौरवात् ।
तत्संसक्तैस्तु कर्तव्य उद्धारो नात्र संशयः ॥
संसक्तसक्तदोषे तु तत्संसक्ताः प्रकीर्तिताः ।
[6]कर्तव्यास्त्वविदुष्टास्तु राज्ञा धर्मं विजानता ॥

‡ समन्ताद्भवाः सामन्ताः । चतसृषु दिक्षु अनन्तरग्रामादयः । ते च प्रतिसीमं व्यवस्थिताः ।

यथाह कात्यायनः—

'ग्रामो ग्रामस्य सामन्तः क्षेत्रं क्षेत्रस्य कीर्तितम् ।
गृहं गृहस्य निर्दिष्टं समन्तात् परिरभ्य हि' ॥

इति । ग्रमादिशब्देन तत्स्थाः पुरुषा लक्ष्यन्ते ।

१. C. omits संसक्तकास्तु सामन्तास्तत्°. २. B. reads चतुर्षु for चतुसृषु. ३. C. reads संसक्तकाः for संसक्ताः. ४. B. reads संसक्तसंसक्तैः for संसक्तसंसक्ततत्संसक्तैः; while D. संसक्तमसंसक्तैः. ५. B. reads प्रदुष्टेषु for च दुष्टेषु. ६. B. reads कर्तव्यानुप्रदुष्टास्तु. C. reads कर्तव्यास्तु प्रदुष्टास्तु for कर्तव्यास्त्वाविदुष्टास्तु.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तेषामभावे सामन्ता मौल-वृद्धोद्धृतादयः ।
स्थावरे षट्प्रकारे-पि कार्या नाऽत्र विचारणा ' ॥

इति । वृद्धादिलक्षणं तत्रैवोक्तम्—

'निबध्यमानं यैर्दृष्टं तत्कार्यं सुगुणान्वितैः[१] ।
वृद्धा वा यदि वाऽवृद्धास्ते च वृद्धाः प्रकीर्तिताः ॥

ये तत्र पूर्वं सामन्ताः पश्चाद्देशान्तरं गताः ।
तन्मूलत्वात्तु ते मौला ऋषिभिः परिकीर्तिताः ॥

उपश्रवण-संभोग-भयस्थानोपचिह्निताः[२] ।
उद्धरन्ति पुनर्यस्मादुद्धृतास्ते ततः स्मृताः' ॥

इति । साक्षिप्रभृत्युद्धृतपर्यन्तानामभावे मनुराह—

'सामन्तानामभावे तु मौलानां सीमसाक्षिणाम्[३]* ।
इमानप्यनुयुञ्जीत पुरुषान् वनगोचरान् ॥

---

* साक्षिधर्मेण राजसमक्षमनुभवेन निर्णयमकुर्वतां ग्रामवासिनां ग्रामनिर्माणकालादारभ्य मौलानां पुरुषक्रमेण तद्ग्रामस्थानां सिमासाक्षिणामभावे इमान् वक्ष्यमाणान् व्याधशाकुनिकादीन् संनिहितवनचारिणः पुरुषानपि अनुयुञ्जीत पृच्छेदित्यर्थः । मृगवधेनाजीवन्तो व्याधाः, शकुनिनां पक्षिणां वधेन जीवन्तः शाकुनिकाः, कैवर्तान् धीवरान्, वृक्षगुच्छादीनां मूलखननेनाजीवन्तो मूलखानकाः, व्यालग्राहान् अहितुण्डिकान्, क्षेत्रापणमार्गादिषु पतितधान्यकणग्रहणमुञ्छम् । तेन वृत्तिर्येषां ते उञ्छवृत्तयो वानप्रस्थाः ।

१, B. reads नृगुण° for सुगुण°; while C. त्रिगुण° for सुगुण°. २. B. originally reads °कार्याख्यानोप° and in margin °यथास्थानो प° also C. °यथास्थानोप° for °भयस्थानोप°. ३. C. and the text of Manu read सीम्नि for सीम°.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

व्याधान् शाकुनिकान् गोपान् कैवर्तान् मूलखानकान् ।
व्यालग्राहानुञ्छवृत्तीनन्यांश्च वनगोचरान्' ॥
(म. स्मृ. ८. २५९–२६०.)

इति । अन्यांश्चेति चकारेण सीमाकर्षका[1] उपलक्ष्यन्ते । तथा च याज्ञवल्क्यः—

'सीम्नो विवादे क्षेत्रस्य सामन्ताः स्थविरादयः ।
गोपाः सीमाकृषाणा*[2] ये[3] सर्वे च वनगोचराः ।
नयेयुरेते सीमानं स्थला-ऽङ्गार-तुष-द्रुमैः ।
सेतु-वल्मीक-निम्नास्थि-चैत्याद्यैरुपलक्षिताम्' ॥
(या. स्मृ. २. १५०–१५१.)

इति । नारदोऽपि—

'ग्रामसीमासु च बहिर्ये च[4] स्युः कृषिजीविनः ।
गोपाः शाकुनिका व्याधा ये चान्ये वनगोचराः' ॥
(ना. स्मृ. ११. ३.)

इति । ते[5] च शपथैः[6] शापिता एव निर्णयं ब्रूयुः । तथा च बृहस्पतिः—

---

* सीमाकृषाणाः सीमासंनिहितक्षेत्रकर्षका इत्यर्थः ।

---

१. C. Reads °कर्षकान् for °कर्षकाः and omit उपलक्ष्यन्ते, instead of which reads °ऽन्यतरान्. २. C. reads °कषाणाश्च for °कृषाणा ये. ३. B. and D. substitute च for ये ४. The text of Nârada reads

'............ ये स्युस्तत्कृषिजीविनः ॥
गोपशाकुनिकव्याधा ये चान्ये वनजीविनः' ॥

for

'......... ....ये च स्युः कृषिजीविनः ।
गोपाः शाकुनिका व्याधा ये चान्ये वनगोचराः' ॥

५. B. and C. read एते च for ते च. ६. C. adds स्तैः after शपथैः.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

'शापिताः शपथैः स्वैः स्वैर्ब्रूयुः सीमाविनिर्णयम् ।
दर्शयेयुश्च लिङ्गानि तत्प्रमाणमिति स्थितिः' ॥

इति । स्वैः स्वैरिति—

'सत्येन शापयेद्विप्रं क्षत्रियं वाहना-ऽऽयुधैः' ।

इत्यादिलोकव्यवस्थया प्रतिपादितैः इत्यर्थः । मनुरपि—

'ग्रामीयैककुलानां च समक्षं सीम्नि साक्षिणः ।
प्रष्टव्याः सीमलिङ्गानि तयोश्चैव विवादिनोः ॥
ते पृष्टास्तु यथा ब्रूयुः समस्ताः सीम्नि निश्चयम् ।
निबध्नीयात्तथा सीमां सर्वांस्तांश्चैव नामतः ॥

(म. स्मृ. ८. २५४–२५५.)

इति । सीमासाक्षिणां तु लक्षणमाह बृहस्पतिः—

'आगमं च प्रमाणं च भोगं कामं च नाम च ।
भूभागलक्षणं चैव ये विदुस्तेऽत्र साक्षिणः ॥

इति । यदा पुनश्चिह्नानि न सन्ति विद्यमानानि वा लिङ्गा-लिङ्गतया संदिग्धानि तदा निर्णयोपायमाह याज्ञवल्क्यः—

---

१. C. omits शापिता. २. B. reads इत्यादिनोक्तव्यवस्थया for इत्यादिलोकव्यवस्थया. ३. C. and D. read ग्रामेयक° for ग्रामयिक°. ४. B. C. and D. read तु for च. ५. B. C. and D. read सीम° for सीम्नि. ६. D. reads तथैव च for तयोश्चैव. ७. B. C. and D. read

'...... ... सीमासंधिषु लक्षणम् ।
तत्तथाख्यापयेत् रजा धर्मेण ग्रामयोर्द्वयोः' ॥
for 'समस्ताः सीम्नि निश्चयम् ।
निबध्नीयात्तथा सीमां सर्वांस्तांश्चैव नामतः' ॥

But D. substitutes स्थापयेत् for ख्यापयेत्. ८. B. reads कालं for कामं. ९. B. originally reads भिन्नतया for लिङ्गालिङ्गतया. १०. C. reads तथा for तदा.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

'सामन्ता वा समग्रामांश्चत्वारोऽष्टौ दशापि वा ।
रक्तस्रग्वसनाः सीमां नयेयुः क्षितिधारिणः' ॥

(या. स्मृ. २. १५२.)

इति । सामन्ता वेति विकल्पाभिधानं स्मृत्यन्तरोक्तसाक्ष्याद्यभिप्रायम् । समग्रामाः प्रत्यासन्नग्रामीणाः चत्वारोऽष्टौ दश वेत्येव समसंख्याका रक्तस्रग्विणो रक्ताम्बरधरा मूर्ध्न्यारोपितक्षितिखण्डाः सीमां प्रदर्शयेयुः । स्वैः स्वैः शपथैः शापिताः सन्तः सीमां नयेयुः । तथा च मनुः—

'शिरोभिस्ते गृहीत्वोर्वीं स्रग्विणो रक्तवाससः ।
†सुकृतैः शापिताः स्वैः स्वैर्नयेयुस्ते समञ्जसम्' ॥

(म. स्मृ. ८. २५६.)

इति । नयेयुरिति बहुवचनमपि अविवक्षितम् । एकस्याऽपि सीमाप्रदर्शकस्य बृहस्पतिना दर्शितत्वात् ।

'ज्ञातृचिह्नैर्विना साधुरेकोऽप्युभयसंमतः ।
रक्तमाल्याम्बरधरो मृदमादाय मूर्धनि ॥
सत्यव्रतः सोपवासः सीमानं दर्शयेन्नरः' ।

इति । यत्तु नारदेनोक्तम्—

---

† यदस्माकं सुकृतं तन्निष्फलं स्यात् इत्येवमात्मीयैः सुकृतैः शापिताः सन्तः समञ्जसम् यथाज्ञानतः सत्येन सीमां निर्णयेयुरित्यर्थः ।

---

१. B. originally and C. read °ग्रावा for °ग्रामाः. २. A. and D. omit

सामन्ता वेति विकल्पाभिधानं स्मृत्यन्तरोक्तसाक्ष्याद्यभिप्रायम् । समग्रामाः प्रत्यासन्नग्रामीणाः चत्वारोष्टौ दश वेत्येव समसंख्याकाः.

३. B. reads धर्मा° for मूर्ध्न्या°.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

'नैकः समुन्नयेत् सीमां नरः प्रत्ययवानपि ।
[1]गुरुत्वादस्य कार्यस्य क्रियै[2]षो बहुषु स्थिता ' ॥
(ना. स्मृ. ११. ९.)

इति । तदुभयानुमतधर्मविद्व्यतिरिक्तविषयम् । स्थलादिचिह्नाभावेऽपि साक्षिसामन्तादीनां सीमाज्ञान उपायविशेषमाह नारदः—

'निम्नगाऽपहृतोत्सृष्टनष्टचिह्नासु भूमिषु ।
तत्प्रदेशानुमानाच्च प्रमाणा[3]द्भोगदर्शनात् ' ॥
(ना. स्मृ. ११. ६.)

इति । नि[4]म्नगया नद्या अपहारेणोत्सृष्टानि नष्टानि स्वस्थानाच्च्युतानि यासु मर्यादाभूमिषु तत्र तत्र देशानुमानात् दृष्टस्वचिह्नानां प्राचीनप्रदेशानुभावात् प्रयोगात् ग्रामादारभ्य सहस्रदण्डपरिमितं क्षेत्रमस्य ग्रामस्य पश्चिमो भाग इत्येवंविधात् परिमाणात्, भोगदर्शनात् प्रत्यर्थिसमक्षमविप्रतिप[5]न्नाया अस्मार्तकालोपलक्षितभुक्तेर्वा निश्चिनुयुरित्यर्थः । एतेषां साक्षिसामन्तप्रभृतीनां सीमाचङ्क्रमणदि[6]नादारभ्य यावत्त्रिपक्षं य[7]दि

---

१. C. and D. read महत्वात् for गुरुत्वात्. २. B. originally and A. in margin read नित्यैषा, for क्रियेषा, but it seems wrong. ३ The text of Nârada and B. read प्रमाणैर्भोगदर्शनैः. ४. A. C. and D. omit

निम्नगया नद्या अपहारेण उत्सृष्टानि नष्टानि स्वस्थानाच्च्युतानि यासु मर्यादाभूमिषु तत्र तत्र देशानुमानात् दृष्टस्वचिह्नानां प्राचीनप्रदेशानुभावात् प्रयोगात् ग्रामादारभ्य सहस्रदण्डपरिमितं क्षेत्रमस्य ग्रामस्य पश्चिमो भाग इत्येवंविधात्परिमाणात् भोगदर्शनात्.

५. B. reads °विप्रतिपन्नाया: for °विप्रतिपन्नायाः. ६. B. reads °दाना° for °दिना°. ७. B. C. omit यदि.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

राज-दैविकव्यसनं नोत्पद्यते तदा तत्प्रदर्शनात् सीमानिर्णयः। तथा च कात्यायनः—

'सीमाचङ्क्रमणे कोशे पादस्पर्शे तथैव च।
[1]त्रिपक्ष-पञ्चसप्ताहं दैव-राजकमि[2]ष्यते'॥

इति। य[3]स्तत्र निषेधः स्मृत्यन्तरेऽभिहितः—

'वाक्पारुष्ये महीवादे दिव्यानि परिवर्जयेत्'॥

इति स[4] उक्तलक्षणपुरुषाभावविषय इत्यविरोधः। कथं तर्ह्यत्र निर्णय इत्यपेक्षिते आह नारदः—

'[5]यदा तु न स्युर्ज्ञातारः सीमायाश्च न[6] लक्षणम्'॥
तदा राजा द्वयोः सीमामुन्नयेदिष्टतः स्वयम्'॥

(ना. स्मृ. ११. ११.)

इति। इष्टतः इच्छातः। याज्ञवल्क्योऽपि—

'अभावे ज्ञातृचिह्नानां राजा सीम्नः प्रवर्तिता'।

(या. स्मृ. २. १५३.)

इति। ज्ञातॄणां सामन्तादीनां चिह्नानां वृक्षादीनामभावे राजैव सीम्नः प्र[7]वर्तयिता। ग्रामद्वयमध्यवर्तिनीं विवादास्पदीभूतां भुवं समं प्रविभज्य उभयोर्ग्रामयोः समर्प्य तन्मध्ये सीमालिङ्गानि कारयेत्। यदा तस्या भूमेर्य[8]त्रैवोपकारातिशयो दृश्यते तदा तस्यैव ग्रामस्य सकला भूः समर्पणीया। त[9]थाह मनुः—

---

१. C. reads मासत्रिपक्ष° for त्रिपक्षपञ्च°; while B. त्रिपक्षपक्ष°. २. B. reads °राजिकम् for °राजकम्; while C. reads राज-दैविकम्. ३. D. reads यस्त्वत्र for यस्तत्र. ४. C. reads सीमाया for स. ५. Text of Nârada and C. reads यदि च for यदा तु. ६. B. reads न च, and D. °श्चापि for °श्च न. ७. C. reads प्रवर्तयितव्यः for प्रवर्तयिता. ८. B. reads यत्रैषों° for यत्रैवो°. ९. C. reads यथाह for तथाह.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant-2 Equipment Heritage Foundation, Jalgaon

'सीमायामविषह्यायां स्वयं राजैव धर्मवित् ।
प्रदिशेद्भूमिमेकेषां उपकारादिति स्थितिः' * ॥

(म. स्मृ. ८. २६५.)

इति । अविषह्यायां ज्ञातृज्ञापकशून्यायामित्यर्थः । ऋणादिनिर्णयवत् सीमानिर्णयो नावेदनानन्तरमेव कार्यः । किन्तु प्रकाशितेषु सेत्वादिषु । तदाह स एव—

'सीमां प्रति समुत्पन्ने विवादे ग्रामयोर्द्वयोः ।
ज्येष्ठे मासे नयेत् सीमां सप्रकाशेषु सेतुषु' † ॥

(म. स्मृ. ८. २४५.)

इति । ग्रामग्रहणं नगरादेरप्युपलक्षणार्थम् । अतएव कात्यायनः—

---

* धर्मवित् पक्षपातरहितो राजा ग्रामद्वयमध्यवर्तिनीं विवादविषयां भूमिं येषामेव ग्रामवासिनां उपकारातिशयो भवति तद्व्यतिरेकेण च न निर्वाहः तेषामेव दद्यादिति शास्त्रव्यवस्था इत्याभिप्रायः ।

† द्वयोर्ग्रामयोः मर्यादां प्रति विप्रतिपत्तौ उत्पन्नायां ज्येष्ठे मासि ग्रीष्मरवितापसंशुष्कतृणत्वात् प्रकटीभूतेषुं सीमालिङ्गेषु राजा सीमां निश्चिनुयात् । यस्मिन् देशे ज्येष्ठमासि पर्जन्यबाहुल्येन सेत्वादीनां न सम्यक् ज्ञानं भवितुं शक्यं तत्र वैशाखेऽपि कार्यम् । सर्वथा सेत्वादीनां स्पष्टतया ज्ञानं यस्मिन् काले भवति तत्रैव सीमानिर्णयः कर्तव्य इत्यपेक्षितम् । न ज्येष्ठादिमासापेक्षा इत्यलं पल्लवितेन ।

---

१. C. wrongly reads प्रविरोद्भामेकेषां for प्रदिशेद्भूमिमेकेषां. २ C. reads प्रविषह्यायां for अविषह्यायां. ३. °ज्ञापकाशून्या° for ज्ञापकशून्या°. ४. C. reads सम्यगावेदना° for आवेदना.° ५. D. reads ज्यैष्ठे for ज्येष्ठे.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

'सीमान्तवासिसामन्तैः कुर्यात् क्षेत्रादिनिर्णयम् ।
ग्रामसीमादिषु तथा तद्वन्नगर-देशयोः' ॥

इति । यदा रागलोभादिवशात् सीमासाक्षिणो निर्णयं न कुर्युः तदा दण्डनीया इत्याह स एव—

'बहूनां तु गृहीतानां न सीमानिर्णयं यदि ।
कुर्युर्भयाद्वा लोभाद्वा दाप्यास्तूत्तमसाहसम्' ॥

इति । एतज्ज्ञानविषयम् अज्ञानविषये तु नारदः ।

'अथचेदनृतं ब्रूयुः सामन्ताः सीमनिर्णये ।
सर्वे पृथक् पृथक् दण्ड्या राज्ञा मध्यमसाहसम्' ॥ (७)
सामन्तात्परतो ये स्युस्तत्संसक्ता मृषोदितैः ।
संसक्तसक्तसक्तास्तु विनेयाः पूर्वसाहसम् ॥ (८)
मौलवृद्धादयस्त्वन्ये दण्डं दाप्याः पृथक् पृथक् ।
विनेयाः प्रथमेनैव साहसेन व्यवस्थिताः' ॥ (९)

(ना. स्मृ. ११. ७–९.)

इति । साक्षिणां मिथो वैमत्याभिधाने दण्डमाह कात्यायनः—

'कीर्तिते यदि भेदः स्याद्दण्ड्यास्तूत्तमसाहसम्' ॥

इति । सीमाचङ्क्रमणकर्तॄणामपि दण्डमाह स एव—

---

१. B. C. and D. read सामन्तभावे for सीमान्तवासि°. २. C. wrongly reads स्वर्णयं for सीमानिर्णयं. ३, B. and C. omit तु. ४. The text of Nârada and C. read तद्विनिश्चये for सीमानिर्णये. ५. B. C. and D. read मृषोदिते for मृषोदितैः.६, The text of Narada and B. read गण°for मौल°. ७. B. reads दण्डगत्या for दंडं दाप्याः while the text of Narada दण्डं दद्युः for दण्डं दाप्याः ८. The text of Narada and D. read साहसेनानृते स्थिताः for साहसेन व्यवस्थिताः. ९. C. reads साक्षिणो for साक्षिणां. १०. B. and C. read वैमत्येनाभिधाने for वैमत्याभिधाने. ११. B. and C. read कारिते for कीर्तिते.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

'यथोक्तेन नयन्तस्ते पूयन्ते सत्यसाक्षिणः ।
विपरीतं नयन्तस्तु दाप्यास्तु[1] द्विशतं दमम्' ॥

इति । आज्ञानादनृतवचने[2] साक्ष्यादीन् दण्डयित्वा पुनर्विचारः प्रवर्तयितव्यः । तथा च कात्यायनः—

'अज्ञानोक्तान्[3] दण्डयित्वा पुनः सीमां विचारयेत् ।
त्यक्त्वा दुष्टांस्तु सामन्ताननन्यैन्[4]मौलादिभिः सह ॥
संमील्य[5] कारयेत् सीमामेवं धर्मविदो विदुः' ॥

इति । नद्युत्सृष्ट[6]क्षेत्रविषये निर्णयमाह बृहस्पतिः—

'अन्यग्रामात्समाहृत्य दत्तान्यस्य यदा मही ।
महानद्या ऽथवा राज्ञा कथं[7] तत्र विचारणा ? ॥
नद्योत्सृष्टा राजदत्ता यस्य तस्यैव सा मही ।
अन्यथा न भवेल्लाभो नराणां राजदैवकः ॥
क्षयोदयौ जीवनं च दैव-राजवशान्नृणाम् ।
तस्मात् सर्वेषु कार्येषु तत्कृतं न विचालयेत्[8] ॥
ग्रामयोरुभयोर्यत्र मर्यादा कल्पिता नदी[9] ।
कुरुते[10] दानहरणं भाग्याभाग्यवशान्नृणाम्' ॥

---

१. B. reads स्युः for °स्तुः. २. B. reads अनृतवादिनः and C, अनृतवदने for अनृतवचने. ३, B. reads अज्ञानोक्ते and C, अज्ञानोक्तौ for अज्ञानोक्तान्. ४, C. and D. read तस्मात् or अन्यान्. ५, B. originally reads समीक्ष्य and in margin संप्रीत्या for संमील्य; while विज्ञानेश्वर reads सम्मित्र्य for the same. ६. B. reads नद्याद्युत्सृष्ट° and C. तथाद्युत्सृष्ट for नद्युत्सृष्ट.° ७. B. in margin and C. read कार्या for कथं. ८. B. and C. read विचारयेत् for विचालयेत्. ९. C. reads कुरुते तदा for कल्पिता नदी. १०. C. reads.

दानहरणं न कर्तव्यं भाग्याभाग्यवशं यतः ।
for
कुरुते दानहरणं भाग्या भाग्यवशात् नृणाम् ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

'एकत्र कूलपातं[1] तु भूमेरन्यत्र संस्थितिम्[2] ।
नदीतीरे प्रकुरुते तस्य तां न विचालयेत्' ॥

इति । एतदभ्युप्तशस्यतीरविषयम्[3] । उप्तशस्यविषये तु स एवाह—

'क्षेत्रशस्यं समुल्लङ्घ्य[4] भूमिश्छिन्ना यदा भवेत् ।
नदीस्रोतःप्रवाहेण पूर्वस्वामी लभेच्च[5] ताम्' ॥

इति । तां सशस्यां भूमिं पूर्वस्वामी यावदुप्तशस्यफलप्राप्तिस्तावल्लभेतेत्यर्थः । फलप्राप्तेरूर्द्ध्वं तु पूर्ववचनविषयसमानता । राजदत्तविषये क्वचिदपवादमाह स एव—

'या राज्ञा क्रोध-लोभेन छलान्यायेन[6] वा हृता ।
प्रदत्ताऽन्यस्य[7] तुष्टेन न सा सिद्धिमवाप्नुयात्' ॥

इति । एतच्च[8] स्वत्वहेतुप्रमाणवत्क्षेत्रविषयम् । प्रमाणाऽभावे तु स एवाह—

'प्रमाणरहितां भूमिं[9] भुंञ्जतो[10] यस्य या हृता ।
गुणाधिकाय वा दत्ता तस्य तां न विचालयेत्'

इति । गृहादिविषये निर्णयस्तेनैव दर्शितः,—

'निवेशकालादारभ्य[11] गृहवार्यापणादिकम् ।
येन यावद्यथा भुक्तं तस्य तन्न[12] विचालयेत् ॥

१. B. originally reads जलपात्रं for कूलपातम्. २. B. reads संस्थितम् for संस्थितिम्. ३. B. and C. read अनुप्त° for अभ्युप्त°. ४. B. and C. read क्षेत्रं ससस्यमुल्लंघ्य for क्षेत्रशस्यं समुल्लंघ्य. ५. B. and C. read लभेत for लभेच्च. ६. D. reads छलन्यायेन; while B. originally reads छलेनान्येन for छलान्यायेन. ७. C. reads अन्यत्र for अन्यस्य. ८. B. omits च. ९. C. reads प्रमाणरहिता भूमिः for प्रमाणरहितां भूमिं. १०. B. and C. read भजतो for भुंजतो. ११. B. originally reads विशेष°, but in margin reads निवेश°. १२. C. reads तेन for तन्न.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

वातायनं प्रणालीश्च तथा निर्यूहवेदिकाः ।
चतुःशालं स्यन्दनिकां प्राङ्निविष्टां न चालयेत् ' ॥

इति । वातायनं गवाक्षः । प्रणाली काष्टादिमयो जलनिर्गमोपायः । निर्यूहो गृहकोणो नागदन्तको वा । वेदिका रथ्यादिप्रदेशसंस्कृता उन्नता भूमिः । चतसृणां शालानां समाहारश्चतुःशालम् । तस्मात्स्यन्दनिका वृष्टिजलनिपातः ।

निवेशकालादूर्ध्वं प्रातिवेश्यानिष्टकारि वातायनादिकं न कार्यमित्याह कात्यायनः—

'निवेशसमयादूर्ध्वं नैते योज्याः कदाचन ।
दृष्टिपातं प्रणालीं च न कुर्यात् परवेश्मसु ' ॥

इति । दृष्टिपातो गवाक्षः । परवेश्मसु परवेश्माभिमुख्येन । बृहस्पतिरपि—

'वर्चःस्थानं वह्निचयं गर्तोच्छिष्टाम्बुसेचनम् ।
अत्यारात् परकुड्यस्य न कर्तव्यं कथंचन ' ॥

इति । अरत्निद्वयमुत्सृज्य कर्तव्यमित्याह कात्यायनः—

'विण्मूत्रोदकचक्रं च वह्निश्वभ्रनिवेशनम् ।
अरत्निद्वयमुत्सृज्य परकुड्यान्निवेशयेत् ' ॥

इति । अवस्करादिभिश्चतुष्पथादिकं न रोधयेदित्याह नारदः—

---

१. The whole portion from here to वह्निश्वभ्रनिवेशनम् in l. 14 inclusive is omitted in A. C. and D. २. C. reads अटवि° for अरत्नि°.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

'†अवस्कर-स्थल-श्वभ्र-भ्रम-स्यन्दनिकादिभिः ।
चतुष्पथ-सुरस्थान-राजमार्गान्न रोधयेत् ' ॥
(ना. स्मृ. ११. १९.)

इति । बृहस्पतिः—

' यान्त्यायान्ति जना येन पशवश्चानिवारिताः ।
तदुच्यते संसरणं न रोद्धव्यं तु केनचित् ' ॥

इति । यस्तु संसरणे श्वभ्रादिकं करोति तस्य दण्डमाह स एव—

' यस्तत्र संसरे श्वभ्रं वृक्षारोपणमेव वा ।
कामात् पुरीषं कुर्याच्चेत्तस्य दण्डस्तु माषकः' ॥

इति । राजमार्गे तु पुरीषकर्तुर्दण्डमाह मनुः—

' समुत्सृजेद्राजमार्गे यस्त्वमेध्यमनापदि ।
स द्वौ कार्षापणौ दद्यादमेध्यं चाशु शोधयेत् ॥

---

† अवस्करो पुरीषाद्यमेध्यम् । स्थलं कौशल्यनिबद्धं स्थानम् । श्वभ्रो गर्तः । भ्रमः जलानयनाद्यर्थयोजितनालिकादिः । स्यन्दनिका पटलप्रान्तः । इत्यादिभिः चतुष्पथादीनि न रोधयेत् इत्यर्थः ।

---

१. C. स्यन्दनका°. २. B. and C. read राजमार्गे, while the text or Nârada reads रथ्यामार्गान् for राजमार्गान्. ३. C. reads संसरणं for संसरणे. ४. B. reads संकरं and C. संकरश्वभ्रं for संसरे श्वभ्रं. ५. C. reads पुरीषं for पुरीष°. ६. B. reads दण्डाधिक्यम् for दण्डम्.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

आपद्गतोऽथवा वृद्धो गर्भिणी बाल एव वा ।
परिभाषणमर्हन्ति* तच्च शोध्यमिति स्थितिः' ॥

(म. स्मृ. ९. २८२–२८६.)

इति । अमेध्यादिना तडागादिषु दोषं कुर्वतां दण्डमाह[1] कात्यायनः—

'तडागोद्यान-तीर्थानि[2] योऽमेध्येन विनाशयेत् ।
अमेध्यं शोधयित्वा तु दण्डयेत् पूर्वसाहसम् ॥
दूषयन्[3] सिद्धतीर्थानि स्थापितानि[4] महात्मभिः ।
पुण्यानि पावनीयानि प्राप्नुयात् पूर्वसाहसम् ॥

इति । मर्यादाभेदनादौ दण्डमाह याज्ञवल्क्यः—

'मर्यादायाः प्रभेदे च[5] सीमातिक्रमणे[6] तथा ।
क्षेत्रस्य हरणे दण्डा अधमोत्तम-मध्यमाः[7] ' ॥

(या. स्मृ. २. १५५.)

इति । अनेकक्षेत्रव्यवच्छेदिका साधारणी भूर्मर्यादा । तस्याः प्रकर्षेण भेदने सीमानमतिलङ्घ्य कर्षणे क्षेत्रस्य तथा[8] निन्दितप्रदर्शनेन हरणे यथाक्रमेणाधमोत्तम-मध्यमसाहसा

---

* परिभाषणं पुनस्त्वयेदृशं कर्म न कर्तव्यमित्याज्ञाकरणम् । एतेन आपद्गतादीनां दण्डो न कर्तव्यः इति सूचितं भवति ।

---

१. C. reads तडागादिदूषकस्य for तडागादिषु दोषं कुर्वतां. २. C. reads दशकोट्यानि, for तडागोद्यान°, while B. originally reads तथा कोट्यानि, in margin दशकोट्यानि, and in correction तटाका नानि. ३. B. and C. read दूषयेत् for दूषयन्. ४. B. and C. read ख्यापितानि for स्थापितानि. ५. B. C. and D. read तु for च. ६. C. reads संगाति° for सीमाति°. ७. D reads °मध्यमम् for °मध्यमाः. ८. B. reads भयादिप्रदर्शनेन for तथा निन्दित-प्रदर्शनेन.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

दण्डा वेदितव्याः। क्षेत्रग्रहणं गृहारामाद्युपलक्षणार्थम्। अज्ञानात् क्षेत्रादिहरणे[1] अधम एव दण्डो वेदितव्यः। अत[2] एव मनुः—

'गृहं तडागमारामं क्षेत्रं वा भीषया हरन्।
शतानि पञ्च दण्ड्यः स्यादज्ञानाद्विशतो[3] दमः'॥

(म. स्मृ. ८. २६४.)

गृहारामादिषु याज्ञवल्क्य आह—

'आरामायतनग्राम-निपानोद्यान-वेश्मसु।
एष एव विधिर्दृष्टो वर्षाम्बुप्रवहादिषु'॥

(या. स्मृ. २. १५४.)

इति। आरामः पुष्प—फलोपचयहेतुभूभागः। आयतनं निवेशनं पलालादिककुट्टणाद्यर्थं विभक्तो भूप्रदेशः। ग्रामः प्रसिद्धः। ग्रामग्रहणेन नगराद्युपलक्ष्यते निपानं पानीयस्थानं वापी—कूपतडागादि। उद्यानं क्रीडावनम्। वेश्म गृहम्। एतेष्वारामादिष्वयमेव पूर्वोक्तः सामन्त—साक्ष्यादिलक्षणो विधिर्ज्ञातव्यः। तथा प्रवर्षणोद्भुतजलप्रवाहेषु अनयोर्गृहयोर्मध्येन जलौघः प्रवहति अनयोर्वा इत्येवंप्रकारे विवादे आदिग्रहणात् प्रासादादिष्वपि प्राचीन एव विधिर्वेदितव्यः। तथा च कात्यायनोऽपि—

'क्षेत्र-कूप-तडागानां केदाराऽऽरामयोरपि।
गृह-प्रासादा-ऽवसथ-नृप-देवगृहेषु च'॥

इति। प्राचीन एव विधिरिति भावः।

---

१. C. reads क्षेपणादि° for क्षेत्रादि°. २. B. omits अधम एव दंडो वेदितव्याः; अत एव मनुः. while C. अधम एव मनुः and D. स एवाह for अधम एव दण्डो वेदितव्यः। अत एव मनुः. ३. B. reads द्विशतोद्यमः and C. द्विशतं दमः.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

इति। ये[1] तु बलादपह्रियमाणक्षेत्रादिभूमयस्तेषामुत्तमो[2][3] दण्डः प्रयोक्तव्यः। उत्तमसाहसं यथा—

'वधः[4] सर्वस्वहरणं पुरान्निर्वासनाङ्कने।
तदङ्गच्छेद इत्येको[5] दण्ड उत्तमसाहसः'॥

इति स्मरणात्। यत्तु शङ्ख-लिखिताभ्यां सीमातिक्रमणे[6] दण्डाधिक्यमुक्तम्—

'सीमाव्यतिक्रमे त्वष्टसहस्रम्'।

इति तत् समग्रसीमातिक्रमविषयम्। सीमासन्धिषूत्पन्न-वृक्षादिविषये कात्यायनः—

'सीमामध्ये तु जातानां वृक्षाणां क्षेत्रयोर्द्वयोः।
फलं पुष्पं च सामान्यं क्षेत्रस्वामिषु निर्दिशेत्'॥

इति। अन्यक्षेत्रे जातवृक्षादिविषये स एव—

'अन्यक्षेत्रे[7] तु जातानां शाखा यत्रान्यसंस्थिता[8]।
स्वामिनं तं[9] विजानीयाद्यस्य क्षेत्रे तु संस्थिता[10]'॥

इति। परक्षेत्रे प्रार्थनया क्रियमाणसेतु-कूपादिकं[11] क्षेत्रस्वा-मिना न[12] निषेद्धव्यम्। तदाह याज्ञवल्क्यः—

---

१. B. C. omit ये तु बलात्. २. B. reads भूमयस्त्वे and °भूमयस्ते for °भूमयस्तेषां. ३. B. C. read उत्तमोपि for उत्तमो. ४. B. reads बलात् for वधः. ५. B. reads इत्युक्ते for इत्येको. ६. B. reads सीमातिक्रमे for सीमातिक्रमणे. ७. B. reads अन्वक्षेषु for अन्यक्षेत्रे तु. ८. B. originally reads °संश्रिताः. ९. B. reads त्वं and C. तत्. १०. B. originally reads संश्रिताः. ११. B. and C. read क्रियमाणं for क्रियमाण°. १२. B. reads नासेद्धव्यं and C. नासंबद्धव्यम् for न निषेद्धव्यम्.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

'न निषेध्योऽल्पबाधस्तु सेतुः कल्याणकारकः ।
परभूमिं[1] हरन् कूपः स्वल्पक्षेत्रो बहूदकः '* ॥

(या. स्मृ. २. १५६.)

इति । यत् स्वल्प[2]बाधकं महोपकारकं क्षेत्रादिकं च भवति तत्क्षेत्रं स्वामिना न निषे[3]द्धव्यम् । यत् पुनर्बहुबाधकं स्वल्पोपकारकं च त[4]न्निषेद्धव्यं भवति । । नारदोऽपि—

'प[5]रक्षेत्रस्य मध्ये तु सेतुर्न प्रतिबध्यते ।
महागुणोऽल्पबाध[6]श्चे[7]द्वृद्धिरिष्टा [8]क्षये सति' ॥

(ना. स्मृ. ११. १७.)

इति । सेतुश्च द्विविधः । तथा च स एवाह—

---

* परकीयां भूमिमपहरन्नपि सेतुर्जलप्रवाहबन्धः क्षेत्रस्वामिना न प्रतिषेध्यः स चेत् ईषत्पीडाकरो बहूपकारकश्च भवति । कूपश्चाल्पक्षेत्रव्यापित्वेन अल्पबाधो बहूदकत्वेन कल्याणकारकश्च अतो बहूदको नैव निवारणीयः । कूपग्रहणं च वापी-पुष्करिण्याद्युपलक्षणार्थम् । यदा पुनरसौ समग्रक्षेत्रप्रवर्तिया बहुबाधो नद्यादिसमीपक्षेत्रवर्तितया वा अल्पोपकारकः तदाऽसौ निषेध्य इत्यर्थादुक्तं भवति इति भावः ।

---

१. D. reads °भूमौ for °भूमिं. २. C. reads यद्यस्य for यत्स्वल्प°. ३. B. and C. read नासेद्धव्यं for न निषेद्धव्यम्. ४. B. and C. read तदासेद्धव्य for तन्निषेद्धव्यं. ५. C. reads परक्षेत्रे सस्यमध्ये for परक्षेत्रस्य मध्ये तु. ६. B. C. and D. read °दोष° for °बाध° ७. B. in margin read सृष्टिः for वृद्धिः. ८. B. originally क्षयासति and in margin जये सति; while C. जये सति for क्षये सति.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant-2 Equipment Heritage Foundation, Jalgaon

'सेतुस्तु द्विविधौ ज्ञेयः खेयो बन्ध्यस्[1]तथैव च ।
तोयप्रवर्तनात् खेयो[2] बन्ध्यः[3] स्यात्तन्निवर्तनात्' ॥

(ना. स्मृ. ११. १८.)

इति । सेत्वादि[4]संस्कारविषये नारदः—

'पूर्वप्रवृत्त[5]मुत्सन्न[6]मपृष्ट्वा[7] स्वामिनं तु यः ।
सेतुं प्रवर्तयेत् कश्चिन्न स तत्फलभाग्भवेत् ॥
मृते तु स्वामिनि पुनस्तद्वंश्ये वाऽपि मानवे ।
राजानमामन्त्र्य ततः प्रकुर्यात् सेतुकर्म तत्[8] ।

(ना. स्मृ. ११. २०–२१.)

इति । क्षेत्रस्वामिनमनभ्युपगम्य[9] तदभावे राजानं वा, सेत्वादिप्रवर्तने याज्ञवल्क्यः—

'स्वामिने योऽनिवेद्यैव क्षेत्रे[10] सेतुं प्रवर्तयेत् ।
उत्पन्ने स्वामिनो भोगः तदभावे महीपतेः' ॥

(या. स्मृ. २. १५७.)

इति । प्रार्थनयार्थदानेन वा[11] लब्धानुज्ञः सन्नेव परक्षेत्रे सेतुं प्रवर्तयेदित्यस्य तात्पर्यम् । न तु[12] सेतुप्रवर्तकस्य फल[13]-

---

१. B. originally reads बद्ध while D. reads बध्य; and C. सेध्यः. २. C. wrongly reads तोयो for खेयो. ३. B. C. and D. read बध्यः for बंध्यः. ४. B. reads जीर्णत्वादि° for सेत्वादि°. ५. B. and D. read °प्रवृत्ति° for °प्रवृत्त°. ६. C. reads उत्संभं and D. उच्छिन्नं. ७. B. and D. read न पृष्ट्वा for अपृष्ट्वा; while C. न दृष्टस्वामिनं for अपृष्ट्वा स्वामिनं. ८. B. C. and D. read कुर्यात् सेतुप्रवर्तनम् for प्रकुर्यात् सेतुकर्म तत्. ९. B. reads अभ्युपगमय्य, and C. उपगमय्य for अनभ्युपगम्य १०. C. reads क्षेत्रसेतुं for क्षेत्रे सेतुं. ११. C. reads बलाच्चानुज्ञानान्नैव for वा लब्धानुज्ञः सन्नेव. १२. C. reads ननु for न तु. १३. B. reads पालनाकृषिनिषेधे. C. reads पालनाच्चानिषेधे for फलभाक्त्वनिषेधे.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

भाक्त्वनिषेधे तात्पर्यम्* । तस्याप्रसक्तत्वात् । अथ वा दृष्टला-भफलभोक्तृत्वनिषेधे तात्पर्यमस्तु । कात्यायनोऽपि—

‘अस्वाम्यनुमतेनैव संस्कारं कुरुते तु यः ।
गृहोद्यान-तडागानां संस्कर्ता लभते न तु ॥
व्ययं स्वामिनि चायाते न निवेद्य नृपे यदि ।
अथावेद्य प्रयुक्तस्तु तद्गतं लभते व्ययम्’ ॥

इति । क्षेत्रस्वामिपार्श्वे क्षेत्रमिदमहं कर्षामीतीदमङ्गीकृत्य प-श्चाद्यो न कर्षति अन्येन वा न कर्षयति तं प्रत्याह याज्ञवल्क्यः—

‘फालाहतमपि क्षेत्रं न कुर्याद्यो न कारयेत् ।
स प्रदाप्यः कृष्टफलं क्षेत्रमन्येन कारयेत्’ ॥
(या. स्मृ. २. १५८.)

इति । यद्यपि फालाहतं ईषद्धलेन विदारितं न सम्यग्बी-जावापार्हं तथाप्यकृष्टक्षेत्रस्य फलं यावद्यत्रोत्पत्त्यर्हं सामन्तादि-

* विज्ञानेश्वरस्त्वत्र ‘क्षेत्रस्वामिनमनभ्युपगम्य तदभावे राजानं वा यः परक्षेत्रे सेतुं प्रवर्तयति असौ फलभाङ् न भवति । अपि तु तदुत्पन्न-फले क्षेत्रस्वामिनो भोगः । तदभावे ‘राज्ञः’ इति व्याचख्यौ ।

१. B. and C. read दृष्टरूपफलभाक्त्वनिषेधे and दृष्टरूपफलभाक् च निषेधे respectively for दृष्टलाभफलभोक्तृत्वनिषेधे. २. C. reads अनुगतेनैव for अनुमतेनैव. ३. B. originally reads स्वयं in margin व्ययं; while C. स्वयं and some other books देयं for व्ययं. ४. B. originally reads वा-ऽऽयाते and in margin राजा वा; while C. राजा तत् for चायाते. ५. B. and C. read निवेद्यं for निवेद्य. ६. B. reads कर्षिष्यामि for कर्षामि. ७. C. B. read कृषाति for कर्षति. ८. C. omits न. ९. B. C. and D. read यो न कुर्यान्न कारयेत् for न कुर्याद्यो न कारयेत्. १०. B. and C. read तं प्रदाप्याऽकृष्टशदं; while D. स प्रदाप्योऽकृष्टशदं for स प्रदाप्यः कृष्टफलं. ११. B. originally and D. read ईषत्फलेन for ईषद्धलेन. १२. B. and C. read सम्यक् for सम्य°. १३. B. C. read प्याकृष्ट° for प्यकृष्ट°. १४. C. and D. read उत्पत्त्यर्थं for उत्पत्त्यर्हं.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant-2 Equipment Heritage Foundation, Jalgaon

कल्पितं तावदसौ स्वामिने दापनीयः । तच्च क्षेत्रं पूर्वकर्ष-[1]कादाच्छिद्यान्येन तत्कारयेत् । बृहस्पतिरपि—

‘ क्षेत्रं गृहीत्वा यः कश्चिन्न कुर्यान्न च कारयेत् ।
स्वामिने स शदं[2] दाप्यो राज्ञे दण्डं च तत्समम् ’ ॥

इति । स्वामिने कियान् शदो देय इत्यपेक्षिते स एवाह—

‘ चिरावसन्ने[3] दशमं कृष्यमाणे[4] तथाऽष्टमम् ।
सुसंस्कृते तु[5] षष्ठं स्यात् परिकल्प्य यथाविधि ’ ॥

इति । चिरावसन्ने चिरकालमकृष्टे[6] क्षेत्रे कर्षामीति[7] स्वीकृत्योपेक्षिते यावत्फलमनुपेक्षिते[8] लभ्यते तस्य दशमं भागं दाप्यः[9] । कृष्यमाणे[10] सुचिरावसन्ने[11] स्वीकृत्योपेक्षिते त्वष्टमं भागं दाप्यः । सुसंस्कृते क्षेत्रे उपेक्षिते तु षष्ठं[12] भागं दाप्य इत्यर्थः । अशक्त-प्रेत-नष्टक्षेत्रविषये[13] नारदः—

‘ अशक्त[14]-प्रेत-नष्टेषु क्षेत्रिकेष्वनिवारितैः[15] ।
क्षेत्रं चोद्विकृषेत् कश्चिदश्नुवीत[16] स तत्फलम् ’ ॥

---

१. B. and C. read °कर्षकादाकृष्य and D. कर्षकादौ विधाय for कर्षकाराच्छिद्य. २. B. C. and D. read शतं for शदं. ३. C. reads चिरावलंबने for चिरावसन्ने. ४. C. reads अकृष्यमाणे for कृष्यमाणे. ५. B. and C. read सुसंस्कृतेषु for सुसंस्कृते तु. ६. B. reads चिरकालाकुष्टे for चिरकालमकृष्टे. ७. B. reads कृष्यामि and C. कृषामि for कर्षामि. ८. C. reads अनुपेक्षितं for अनुपेक्षिते. ९. C. reads मूल्यद्वारेण before दाप्यः. १०. A. C. D. omit कृष्यमाणे सुचिरावसन्ने स्वीकृत्योपेक्षिते त्वष्टमं भागं दाप्यः. ११. B. reads अचिरावसन्ने for सुचिरावसन्ने. १२. C. reads सप्तमं for षष्ठं. १३. B. reads अशक्त-प्रेतनष्ट-क्षेत्रिक° and C. अशक्तके प्रेते नष्टे क्षेत्रे° for असक्तप्रेतनष्टक्षेत्र°. १४. B. and C. read असक्त° for अशक्त°. १५. B. reads क्षेत्रिकेषु निवापितः while C. क्षेत्रिकेषु निवारितः for क्षेत्रिकेष्वनिवारितः. १६. B. reads अनर्हति च. and C. अश्नुवीत स for अश्नुवीत स.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

'कृष्यमाणेषु क्षेत्रेषु क्षेत्रिकः पुनरावजेत् ।
खिलोपचारं तत्सर्वं दत्वा क्षेत्रमवाप्नुयात्' ॥
(ना. स्मृ. ११. २१–२२.)

इति । खिलोपचारः खिलमञ्जनार्थो व्ययः । तस्येयत्तावधारणार्थं विचारं तस्याह स एव—

' संवत्सरेणार्धखिलं खिलं स्याद्वत्सरैस्त्रिभिः ।
पञ्चवर्षावसन्नं तु क्षेत्रं स्यादटवीसमम्' ॥
(ना. स्मृ. ११. २६.)

इति । यदा पुनः खिलोपचारं स्वामी न ददाति तदाप्याह कात्यायनः—

' अशक्तितो न दद्याच्चेत् खिलार्थे यः कृतो व्ययः ।
तदष्टभागहीनं तु कर्षकः फलमाप्नुयात् ॥
वर्षानष्टौ स भोक्ता स्यात्परतः स्वामिने तु तत् ' ।

इति ॥ इति सीमाविवादनिर्णयः समाप्तः ॥

अथ दण्डपारुष्यम् । तत्स्वरूपं नारदेनोक्तम्—

' परगात्रेष्वभिद्रोहो हस्त-पादाऽऽयुधादिभिः ।
भस्मादिनामुपक्षेपैर्दण्डपारुष्यमुच्यते ' ॥
(ना. स्मृ. १९. ४.)

---

१. B. reads विकृष्यमाणे क्षेत्रे तु, and C. कृष्यमाणे च क्षेत्रे तु for कृष्यमाणेषु क्षेत्रेषु. २. C. reads खिलोपचारतः सर्वं for खिलोपचारं तत्सर्वं. ३. B. reads खिलतारतम्य; while C. wrongly reads विलवारतस्य for विचारं. ४. C. reads दद्याद्यो for दद्य चेत्. ५. C. reads खिलार्थो for खिलार्थे. ६. C. reads तदर्थ° for तदष्ट°; while D. reads तदाष्ट° for तदष्ट°. ७. B. reads वर्षाण्यष्टौ° for वर्षानष्टौ. ८. B. C. and D. read भस्मादिभिश्चोपघातां for भस्मादीनामुपक्षेपैः.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

इति। *पर गात्रेषु [1]स्थावरजङ्गमादेरनेकद्रव्येषु। [2]हस्त-पादायुधादिभिरित्यादि[3]ग्रहणाद्ग्रावादिभिः । द्रोहो हिंसनम्। तथा [4]भस्मादिभिः भस्म-रजः-पङ्क-पुरीषाद्यैः उपघातः संस्पर्शरूपं मनोदुःखोत्पादनम्। तदुभयं दण्डपारुष्यम्। तस्य त्रैविध्यमाह स एव—

‘तस्याऽपि दृष्टं त्रैविध्यं हीन-मध्योत्तमक्रमात्।
अव[6]गूरण-निः[7]शङ्कपातन-क्षतदर्शनैः॥
[5]हीनमध्योत्तमानां तु द्रव्याणामनतिक्रमात्।
त्रीण्येव साहसान्याहुस्तत्र कण्टकशोधनम्’॥

(ना. स्मृ. १९. ५–६.)

इति। नि[8]ःशङ्कपातनं निःशङ्कप्रहरणम्। त्रीण्येव साहसानि [9]साहसीकृतानि दण्डपारुष्याणीत्यर्थः। दण्डपारुष्ये पञ्च प्रकारा विधयस्तेनैवोक्ताः—

‘विधिः पञ्चविधस्तूक्तः एतयोरुभयोरपि।
पारुष्ये सति संरम्भादुत्पन्ने [10]क्षुब्धयोर्द्वयोः॥

---

* दण्ड्यतेऽनेनेति दण्डो देहः तेन यत् पारुष्यं विरुद्धाचरणं जङ्गमादेर्द्रव्यस्य तद्दण्डपारुष्यम्।

१, B. reads स्थावरजंगमात्मकद्रव्येषु and C. स्थावरजंगमानेकद्रव्येषु for स्थावरजंगमादेरनेकद्रव्येषु. २. B. reads हस्त-पादायुधैः and C. हस्त-पादायुधः for हस्त-पादायुधादिभिः. ३. B. reads आदिग्रहणेन for आदिग्रहणात्. ४. D. reads भस्मभिः for भस्मादिभिः. ५. The text of Narada reads मृदुमध्योत्तमं for हीनमध्योत्तम°. ६. The text of Narada reads अवगोरण; while C. अवस्तरण° for अवगूरण°. ७. B. and C. read निःसंग° for निःशंक°. ८. B. and C. read निःसंगपातनं for निःशंकपातनं. ९. B. and C. read सहसाकृतानि for साहसीकृतानि. १०, B. originally reads लुब्धयोः and in margin क्रुद्धयोः for क्षुब्धयोः; while C. तु द्वयोः for क्षुब्धयोः.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

स मान्यते यः क्षमते दण्डभाग्योऽतिवर्तते[1] ।
पूर्वमाक्षारयेद्यस्तु[2]† नियतं[3] स्यात् स दोषभाक् ॥
पश्चाद्यः सोऽप्यसत्कारी पूर्वे तु विनयो गुरुः ।
द्वयोरापन्नयोस्[4]तुल्यमनुबध्नाति[5] योऽधिकम्[6] ॥
स तयोर्दण्डमाप्नोति पूर्वो वा यदि वोत्तरः[7] ।
पारुष्यदोषावृतयोर्युगपत् संप्रवृत्तयोः ॥
विशेषश्चेन्न लक्ष्येत[8] विनयः स्यात् समस्तयोः ।
श्वपाक-षण्ढ[9]-पाषण्ड-व्यङ्गेषु बधिरेषु[10] च ॥
हस्तिप-व्रात्य-दासेषु[11] गुर्वाचार्यान्तिकेषु[12] च ।
मर्यादातिक्रमे सद्यो घात एवाऽनुशासनम् ॥
यमेव ह्यतिवर्तेत[13] नीचः सन्तं जनं नृषु ।
स एव विनयं कुर्यान्न तद्विनयभाङ् नृपः ॥

---

† आक्षारणं प्रहरणम् । यः पूर्वमाक्षारयेत् स नियमेन दोषभाग्भवति । नायं नियमः । यदि मया प्रथमं प्रहारो न कृतश्चेत् प्रतिपक्षी मां मारयिष्यति इति निश्चयेनानुमितं कृत्वा तेन पूर्वमाक्षारणं कृतं चेत् स दोषभाजनं भवितुं नार्हं इति गम्यते ।

---

१. B. originally and C. read निवर्तते for ऽतिवर्तते. २. C. reads आसारयेत् आक्षारयेत्. ३. C. reads नियतः for नियतं. ४ C. reads आपतयोः for आपन्नयोः. ५. C. reads अनुवन्नाति for अनुबध्नाति. ६. B. reads पुनः for ऽधिक्रम्. ७. B. and C. read वेतरः for वोत्तरः. ८. The text of Narada reads दृश्येत for लक्ष्येत. ९. Text of Narada reads °मेद° for षण्ढं. १०. B. C. read °वधवृत्तिषु for °बधिरेषु च. ११. B. originally and Narada text read दारेषु for दासेषु. १२. B. C. read अंतकेषु; while Narada text अंतिगेषु for अंतिकेषु. १३. B. reads ह्यतिवर्तेरन्नेते; while D. व्यतिरेकेरन्नेते for ह्यतिवर्तेत नीचः.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

मला ह्येते मनुष्याणां[1] धनमेषां मलात्मकम् ।
अतः[2]स्तान् घातयेद्राजा नार्थदण्डेन दण्डयेत् ' ॥
(ना. स्मृ. १६. ७–१४.)

इति । यस्तु पश्चात्[3]प्रवृत्तस्यापराधाभावो[4] बृहस्पतिना दर्शितः–
' आक्रुष्टस्तु समाक्रोशन् ताडितः प्रतिताडयन् ।
हत्वाऽपराधिनं चैव नाऽपराधी[5] भवेन्नरः ' ॥

इति । [6]योऽपि पश्चात्प्रवृत्तस्य दण्डः कात्यायनेन दर्शितः–
' अभीषणेन दण्डेन प्रहरेद्यस्तु मानवः ।
पूर्वं वा पीडितो वाऽथ स दण्डयः परिकीर्तितः' ॥

इति । सोऽपि पूर्वप्रवृत्तदण्डादल्पदण्डार्थः । दण्डपारुष्यसँन्देहे[7] निर्णयकारणमाह याज्ञवल्क्यः—
' असाक्षिकहते[8] चिह्नैर्युक्तिभिश्चागमेन च ।
द्रष्टव्यो व्यवहारस्तु कूटचिह्नकृतो भयात् ' ॥
(या. स्मृ. २. २१२.)

इति । यदा कश्चिद्रहस्यनेनाहं ताडितः इति राज्ञे निवेदयति तदा चिह्नैस्तद्गात्रगत[9]श्रमादिभिः कारणप्रयोजनप-

---

१. The text of Narada reads मनुष्येषु for मनुष्याणां. २. Narada text reads अपि for अतः. ३. C. reads एतत्° for पश्चात्°. ४. B. reads °प्रवृत्तस्यापराभवो, and C. °प्रवृत्तस्य पराभवो for °प्रवृत्तस्यापराधाभावो. ५. C. wrongly reads मापराध्यो for नापराधी. ६. B. and C. omit– योपि पश्चात्प्रवृत्तस्य दण्डः कात्यायनेन दर्शितः—

' अभीषणेन दण्डेन प्रहरेद्यस्तु मानवः ।
पूर्वं वा पीडितो वाथ स दण्डयः परिकीर्तितः '।.

७. B. originally reads °संदेहनिर्णयकरणं for संदेहे निर्णयकारणम्. ८. C. wrongly reads °रज्ञे for °हते. ९. B. reads °गतैः for °गत°. B. reads °चिन्हैः for °श्रमादिभिः; while C. wrongly reads °गते श्रियमभि कारण्य° for °गतश्रमादिभिः कारण°.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

र्यालोचनरूपाभिर्युक्तिभिः आगमेन जनप्रवादेन च शब्दादिव्येन च कूटचिह्नकरण[1]सम्भावनाभयात् परीक्षा कार्या[2]इत्यर्थः । राजशासन[3]द्रव्यविशेषेण दण्डविशेषमाह स एव—

'भस्म[4]-पङ्क-रजःस्पर्शे दण्डो दशपणः स्मृतः ।
अमेध्य-पार्ष्णि-निष्ठ्यूत[5]स्पर्शने द्विगुणः स्मृतः[6] ॥
समेष्वेवं[7] परस्त्रीषु द्विगुणस्तूत्तमेषु च ।
हीनेष्वर्धदमो मोह-मदादिभिरदण्डनम्' ॥

(या. स्मृ. २. २१३–२१४.)

इति । अमेध्यशब्देन[8] श्लेष्म-नख-कर्णादिदूषिका-शुक्रोच्छिष्टादिकं गृह्यते * । पुरीषादिस्पर्शे कात्यायनः—

'छर्दि-मूत्र-पुरीषाद्यैः पादादौ[9] च चतुर्गुणः ।
षड्गुणः कायमध्ये तु मूर्ध्नि त्वष्टगुणः[10] स्मृतः' ॥

---

* पार्ष्णिः पादस्य पश्चिमो भागः । निष्ठ्यूतं मुखनिःसारितं जलम् । तैः स्पर्शने ततः पूर्वात् दशपणाद्द्विगुणो विंशतिपणो दण्डो वेदितव्यः ।

---

१. B. reads °कारण° for करण°. २. B. reads परीक्षां कारयेत् for परीक्षा कार्या. ३. B. reads साधन° for राजशासन°. ४. C. reads समे and D. न्यूने for भस्म°. ५. D. reads °देशादि° for °निष्ठ्यूत°. ६. C. D. read ततः for स्मृतः. ७. C. and D. read समेष्वेव for समेष्वेवं. ८. B. reads. अश्रुश्लेष्मनखकर्णकेशविड्दूषिकाभुक्तोच्छिष्टादिकं, and C. अप्सु श्लेष्मणः सकर्णानिदूषका भुक्तोच्छिष्टादिकं, for श्लेष्मनखकर्णादिदूषिकाशुक्रोच्छिष्टादिकं. ९. B. reads originally आपाद्यः स चतुर्गुणम् and in margin पादाद्यैश्च चतुर्गुणम् while C. कार्यापाद्यां चतुर्गुणम् for पादादौ च चतुर्गुणः. १०. C. reads °गुणं स्मृतम् for °गुणः स्मृतः.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

इति । आदिशब्देन वसाशुक्रासृङ्मज्जानो गृह्यन्ते †। ताडनार्थं हस्तोद्यमने ताडने च दण्डमाह स एव—

'उद्गूरणे तु हस्तस्य कार्यो द्वादशको दमः ।
स एव द्विगुणः प्रोक्तः पातनेषु स्वजातिषु ' ॥

इति । याज्ञवल्क्योऽपि—

'उद्गूर्णे हस्तपादे तु दश-विंशतिकौ दमौ ।
परस्परं तु सर्वेषां शस्त्रे मध्यमसाहसः' ॥

(या. स्मृ. २. २१६.)

इति । हस्ते पादे वा ताडनार्थमुद्यते सति यथाक्रमं दश-विंशतिपणकौ दमौ । परस्परवधार्थं शस्त्रे उद्यते सति सर्वेषां वर्णानां मध्यमसाहसो दण्ड इत्यर्थः । काष्ठादिभिस्ताडने स एव—

---

† एवंभूतः पूर्वोक्तो दण्डः सवर्णविषये द्रष्टव्यः । परभार्यासु चाविशेषेण । तथोत्तमेषु स्वापेक्षयाऽधिकश्रुत-वृत्तेषु पूर्वोक्ताद्दशपणात् विंशतिपणाच्च दण्डात् द्विगुणो दण्डो वेदितव्यः । हीनेषु स्वापेक्षया न्यूनवृत्त-श्रुतादिषु पूर्वोक्तस्यार्धो दमः पञ्चपणो दशपणश्च वेदितव्यः । मोहश्चित्तवैकल्यम् । मदो मद्यपानजन्योऽवस्थाविशेषः । आदिग्रहणात् ग्रहावेशादिकम् । एतैर्युक्तेन भस्मादिस्पर्शने कृतेऽपि दण्डो न कर्तव्य इति भावः ।

---

१. B. reads वसाशुक्रमज्जानो for वसा-शुक्रा-ऽसृङ्-मज्जानो. २. A. and D. omit स एव द्विगुणः प्रोक्तः पातनेषु स्वजातिषु । याज्ञवल्क्योपि— उद्गूर्णे हस्तपादे तु दश विंशतिकौ दमौ ।. ३. B. in margin reads °विंशतिकः क्रमात्. ४. B. reads शस्त्रमध्यम° for शस्त्रे मध्यम°, and C. शास्ता मध्यमसाहसम् for शस्त्रे मध्यमसाहसः. ५. C. reads शुध्यते for उद्यते. ६. B. C. read अवधार्य for वधार्थं. ७. B. reads शस्त्र उद्गते; while C. wrongly reads अर्थशास्त्रे उच्यते for शस्त्रे उद्यते.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

'शोणितेन विना दुःखं कुर्वन् काष्ठादिभिर्नरः ।
द्वात्रिंशतं पणान्[1] दण्ड्यो द्विगुणं दर्शनेऽसृजः' ॥
(या. स्मृ. २. २१८.)

इति । त्वगादि[2]भेदे दण्डमाह[3] मनुः—

'त्वग्भेदकः शतं दण्ड्यो लोहितस्य च दर्शकः ।
मांसच्छेदे[4] शतं[5] निष्कान् प्रवास्यस्त्वस्थिभेदकः'* ॥
(म. स्मृ. ८. २८४.)

इति । पदाद्याकर्षणादौ याज्ञवल्क्यः—

'पाद-केशांशुक[6]-करोल्लुञ्चनेषु[7] पणान् दश ।
पिण्डा[8]कर्षांशुकावेष्टपादाध्यासे† शतं दमः ॥
कर-पाद-दतो[9] भङ्गे छेदने कर्ण-नासयोः ।
मध्यो दण्डो[10] व्रणोद्भेदे मृतकल्पहते तथा ॥

---

* चर्ममात्रभेदकर्ता समानजातिः। न तु शूद्रः । ब्राह्मणस्य दण्डलाघवम् । पणशतं दण्ड्यः । एवमेव रक्तोत्पादकोऽपि शतमेव । मांसभेदी षण्निष्कान् दण्ड्यः । अस्थिभेदकस्तु देशान्निर्वास्यः । एतत्सर्वं समानजातीयानामेव ।

† पीडा च कर्षश्च अंशुकावेष्टश्च पादाध्यासश्च पीडाकर्षांशुकावेष्टपादाध्यासम् । तस्मिन् समुच्चिते सति शतं दण्ड्यः इति व्याख्येयम् ।

---

१. B. and C. read पणं for पणान्. २. C. reads अंगादि° for त्वगादि°. ३. B. C. omit दण्डमाह. ४. B. reads °भेत्ता and C. °भेदः. ५. B. originally reads षण्निष्कान् and C. स वै निष्कान्; while the text of Manu reads मांसभेत्ता तु षण्निष्कान् for मांसच्छेदे शत निष्कान्. ६. D. °केशादिषु for °केशांशुक°. ७. B. originally, and C. D. read °कराकर्षणे तु for °करोल्लुञ्चनेषु. ८. B. in margin, and D. read पीडा° for पिण्डा°. ९. D. reads °दन्त° for °दतो. १०. B. C. read मध्य दण्डो for मध्यो दण्डः.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant-2 Equipment Heritage Foundation, Jalgaon

चेष्टा-भोजनवाग्रोधे नेत्रादिप्रतिभेदने ।
क[2]न्धरा-बाहु-सक्थ्नां च भङ्गे मध्यमसाहसः ॥
एकं घ्नतां बहूनां च यथोक्ताद्द्विगुणो दमः’ ।
(या. स्मृ. २. २१७–२२१.)

इति । अ[3]वमत्य केशं गृहीत्वा यो झटित्याकर्षति असौ दशपणं दण्ड्यः स्यात् । य[4]ः पुनरंशुकेनावेष्ट्य गाढमापीड्याऽऽकृष्य पादेन घ[5]ट्टयति असौ शतपणान्[6] दण्ड्यः । कर-पाददन्तानां प्रत्येकं भङ्गे कर्ण-नासिकयोश्च च्छेदने मृतकल्पहते च मध्यमसाहसो दण्डः§। गमन-भोजन-भा[7]षणनिरोधे नेत्रप्रतिभेदने ग्रीवा-हस्त-व्रणभङ्गे मध्यमसाहसो दण्डः । मिलित्वैकस्याङ्गभङ्गं कुर्वतां बहूनां ए[8]कस्यापराधे यो दण्ड उक्तः तत्र तस्माद्द्विगुणो दण्डः प्रत्येकं वेदितव्य इत्यर्थः‡ । कात्यायनोऽपि—

§ अनुबन्धादिना विषयस्य साम्यमत्रापादनीयम् ।

‡ अतिक्रूरत्वात्तेषां प्रातिलोम्यानुलोम्यापराधयोरप्येतस्यैव सवर्णविषयेऽभिहितस्य दण्डजातस्य वाक्पारुष्योक्तक्रमेण हानिं वृद्धिं च कल्पयेत्—

‘वाक्पारुष्ये य एवोक्तः प्रातिलोम्यानुलोमतः ।
स एव दण्डपारुष्ये दाप्यो राज्ञा यथाक्रमम्’ ॥

इति स्मरणात् ।

१. C. reads वेश्याभोजनवातोये for चेष्टा-भोजन-वाग्रोधे. २. B. originally reads कर्ण-नास-स्कंध-बाहु° and D. ग्रीवादित्रणभंगे च दण्डो for कंधरा-बाहु-सक्थ्नां च भङ्गे. and C. कंधराबाहुसक्तां च दण्डो for कंधरा-बाहु-सक्थ्ना च भङ्गे. ३. B. reads पाद-केश-वस्त्र-करणानामन्यतमं for अवमत्य केशं; while D. wrongly reads मत्यं तसं. ४. C. omits यः. ५. B. C. read चार्दयति for घट्टयति. ६. B. C. read शतपणं for शतपणान्. ७. C. reads °भाषणादिविधे° for° भाषणनिरोधे. ८. B. reads यस्मिन् for एकस्य; while C. यत्किंचन for एकस्य.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

'कर्णौष्ठ-घ्राण-पादादिजिह्वा-नासा-करस्य च ।
छेदने चोत्तमो दण्डो भेदने मध्यमो भृगुः ॥
मनुष्याणां पशूनां च दुःखाय प्रहृते सति ।
यथा यथा भवेद्दुःखं दण्डं कुर्यात्तथा तथा ' ॥

इति । प्रातिलोम्येन प्रहारे दण्डमाह याज्ञवल्क्यः—

'विप्रपीडाकरं छेद्यमङ्गमब्राह्मणस्य तु ।
उद्गूर्णे प्रथमो दण्डः संस्पर्शे तु तदर्धिकः' ॥

(या. स्मृ. २. २१५.)

इति । ब्राह्मणपीडाकरमब्राह्मणस्य क्षत्रियादेरङ्ग-करचरणादिकं छेत्तव्यम् । ब्राह्मणग्रहणमुत्तमवर्णोपलक्षणार्थम् ** । अत-एव मनुः—

'येन केनचिदङ्गेन हिंस्याच्चेच्छ्रेष्ठमन्त्यजः
छेत्तव्यं तत्तदेवास्य तन्मनोरनुशासनम्' ॥

(म. स्मृ. ८. २७९.)

** तेन क्षत्रिय–वैश्ययोरपि पीडां कुर्वतः शूद्रस्य अङ्गच्छेदनमेव । अग्रिममनुवाक्येन द्विजातिमात्रस्यापराधे शूद्रस्य अंगच्छेदविधानात् ब्राह्मणस्य क्षत्रिय–वैश्य–शूद्रापराधे, क्षत्रियस्य वैश्य–शूद्रापराधे, वैश्यस्य शूद्रापराधे अयमेव येनाङ्गेन उत्तमवर्णस्य पीडां करोति तदङ्गच्छेदनरूपो दण्डः समान एव । तुल्यन्यायत्वात् इति तात्पर्यम् ।

१. B. and C. read प्रहृते for प्रहते. २. B. reads महादुःखं, and C. महद्दुःखं for भवेद्दुःखं. ३. B. reads प्रातिलोम्यापराधे, and C. प्रातिलोम्यापकारे for प्रातिलोम्येन प्रहारे. ४. C. reads विप्रपीडाकरच्छेद्यम् for विप्रपीडाकरं छेद्यम्. ५. B. and C. read तदर्धकं for तदर्धिकः; while D. तदर्धकः. ६. C. omits °आदिकं छेत्तव्यम् । ब्राह्मणग्रहणम्. ७. C. reads अंशेन for अङ्गेन. ८. B. C. and D. read °च्छ्रेयांसम् for °च्चेच्छ्रेष्ठम्. ९. C. omits तत्.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

इति । उद्गूर्णे वधार्थे[1]मुद्यते शस्त्रादिके प्रथमसाहसो वेदितव्यः । शूद्रस्य तत्रापि च्छेदनमेव हस्तादेः । तदाह मनुः—

'पाणिमुद्यम्य दण्डं वा पाणिच्छेदनमर्हति ।
पा[2]देन प्रहरन् कोपात् पादच्छेदनमर्हति' ॥

(म. स्मृ. ८. २८०.)

इति । उद्गूरणार्थं शस्त्रा[3]दिसंस्पर्शे प्रथमसाहसादर्धदण्डो वेदितव्यः । भ[4]स्मादिस्पर्शने तु पुनः क्षत्रिय-वैश्ययोः प्रातिलोम्यापवादेषु द्विगुणो दम[5]ः । यथाह याज्ञवल्क्यः—

'प्रातिलोम्यापवादेषु द्विगुणत्रिगुणादमाः ।
वर्णानामानुलोम्येन तस्मादर्धार्धहानितः' ।

(या. स्मृ. २. २०७.)

इति वाक्पारुष्योक्तन्यायेन दण्डः कल्पनीयः । कात्यायनः—

'वाक्पारुष्ये य[6]थैवोक्तः प्र[7]तिलोमानुलोमतः ।
त[8]थैव दण्डपारुष्ये पा[9]त्यो दण्डो यथाक्रमम्' ॥

इति त[10]त्रापि शू[11]द्रविषये विशेषमाह मनुः—

'अवनिष्ठीवतो दर्पात् द्वावोष्ठौ छेदयेन्नृपः ।
अवमूत्रयतो मेढ्रमव[12]शर्धयतो गुदम् ॥

---

१. C. reads च वार्थ for वधार्थ°. २. C. and D. omit the following:—पादेन प्रहरन्कोपात्पादच्छेदनमर्हति ।.
३. B. reads शस्त्रादिदर्शने and C. शस्त्रादिना for शस्त्रादिसंस्पर्शे. ४. C. reads तस्मात् हनिस्पर्शने for भस्मादिस्पर्शने. ५. B. C. read द्विगुणा दमाः for द्विगुणो दमः. ६. B. C. read य एवोक्तः. for यथैवोक्तः. ७. C. reads प्राति° for प्रति°. ८. B. reads स एव for तथैव. while C. त एव for तथैव. ९. B. C. read दाप्यो दण्डो for पात्यो दण्डो. १०. B. originally reads अत्रापि; while C. omits this. ११. B. and C. read शूद्रस्य अंगच्छेद एव तदाह for शूद्रविषयेविशेषमाह. १२. D. reads पुरीषकरणे for अवशर्धयतो.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

केशेषु गृह्णतो हस्तौ छेदयेदविचारयन् ।
पादयोर्दाढिकायां[1] च ग्रीवायां वृषणेषु च ॥

सहासनमभिप्रेप्सुरुत्कृष्टस्याऽपकृष्टजः ।
कट्यां कृताङ्को निर्वास्यः स्फिचं[2] वाऽस्यावकर्तयेत्[3]'* ॥

(म. स्मृ. ८. २८१–२८३.)

इति । अङ्गच्छेदनादौ विशेषमाह कात्यायनः—

'देहेन्द्रियविनाशे तु यदा[4] दण्डं प्रकल्पयेत् ।
तदा[5] तुष्टिकरं देयं समुत्थानं च पण्डितैः' ॥

इति । तुष्टिकरं व्रणतुष्टिकरम्[6] । समुत्थानं व्रणारोपणम्[7] । तन्निमित्तकश्च व्ययो व्रणगुरुत्वानुसारेण पण्डितैरौषधार्थं व्ययार्थं[8] च कल्पितमानं व्रणारोपणं[9] देयम् ।

---

* अत्रायमभिसन्धिः—ओष्ठच्छेदनादि स्फिचोऽवकर्तनान्तोऽयं दण्डः दर्पेणावमानयत एव । न पुनः प्रमादादिना निष्ठीवनादि कुर्वतः । तथा शूद्रविषय एवाऽयं दण्डः । द्विजातिष्वपि उत्तमवर्णविषयः । तेन ब्राह्मणस्य क्षत्रिय–वैश्यनिष्ठीवने, क्षत्रियस्य वैश्यनिष्ठीवने च नास्य ओष्ठच्छेदनादिरूपस्य दण्डस्य प्रसक्तिरिति भावः । तप्तलोहकृतचिह्नापदेशो निर्वासनीयः । स्फिक् कटिभागस्थितो मांसपिण्डः तं अवकर्तयेत् यथा न म्रियेत तथा छेदयेत् । सर्वमप्यवयवच्छेदनं यथा मरणप्रयोजकं न भवेत् तथा विधेयमिति निष्कर्षः ।

---

१. B. reads नासिकायां originally, and नालिकायां, दाढिकायां in margin; while C. reads नालिकायां for नासिकायां. २. C. स्फिकं and D. स्फिचौ for स्फिचं. ३. B. C. and D. read वाऽस्य निकृन्तयेत् for वा स्यावकर्तयेत्. ४. B. C. read यथा for यदा. ५. B. C. read तथा for तदा. ६. C. wrongly reads पुष्टिकरं for तुष्टिकरम्. ७. C. reads व्रणरोपणं for व्रणारोपणं. ८. B. C. read पथ्यार्थं for व्ययार्थं. ९. B. reads कल्पित भात्रणरोपणं, and C. कल्पितमाज्यारोपणं for कल्पितमानं व्रणारोपणं.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding by MoE-IKS Grant-2 Equipment Heritage Foundation, Jalgaon

'[1]समुत्थानं व्ययं [2]चासौ दद्यादाव्रणरो[3]पणम्'।

इति तेनैवोक्तत्वात्। बृहस्पतिरपि—

'[4]अङ्गावपीडने चैव छेदने [5]पीडने तथा।
[6]समुत्थानव्ययं [7]दाप्यः कलहापहृतं च यत्'॥

इति। याज्ञवल्क्योऽपि—

'[8]कलहापहृतं देयं दण्डश्च द्विगुणस्तथा॥
दुःखमुत्पादयेद्यस्तु स [9]समुत्थानकं व्ययम्।
दाप्यो दण्डं च यो यस्मिन् कलहे समुदाहृतः'॥
(या. स्मृ. २. २२१–२२२.)

इति। ग्राम्यप[10]शुपीडायां दण्डमाह विष्णुः—

'ग्राम्यपशु[11]घाते कार्षापणं दण्ड्यः। पशुस्वामिने तु तन्मूल्यं दद्यात्'।

इति। मूल्यदानं तु मृतपशुविषयम्। मरणाभावे तु समुत्थानव्ययं दद्यात्। तथा च स एव—

'सर्वे च पुरुषपीडाकराः [12]समुत्थानव्ययं [13]दाप्या ग्राम्यपशुपीडाकराश्च'।

---

१. C. reads समुत्थान व्ययं for समुत्थानं व्ययं. २. C. reads वासौ for चासौ. ३. B. and C. read °रोपणात् for °रोपणम्. ४. C. reads अंसावपीडने for अङ्गावपीडने. ५. B. C. and D. read भेदने for पीडने. ६. B. reads समुत्थानं व्ययं for समुत्थानव्ययं. ७. B. C. read दाप्यं for दाप्यः. ८. B. and C. read कलहेऽपहृतं for कलहापहृतं. ९. B. originally reads समुत्थानजं for समुत्थानकं. १०. B. C. read °पश्वभिद्रोहे for °पशुपीडायां. ११. B. C. read °घाती for °घाते. १२. B. in margin reads तदुत्थान°. १३. B. in margin reads दद्युः for दाप्याः.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

इति । प्राणिघातनिमित्तको दण्डः क्वचिदशक्य[1]प्रतिकार-विषये नास्तीत्याह मनुः—

‘ [2]छिन्ननास्ये भग्नयुगे तिर्यक्प्रतिमुखागते ।
अक्षभङ्गे च यानस्य चक्रभङ्गे तथैव च ॥
[3]छेदने चैव यन्त्राणां योक्त्र-रश्म्योस्तथैव च ।
आक्रन्दे [4]चाप्यपैहीति [5]न दण्डं मनुरब्रवीत् ’* ॥
(म. स्मृ. ८. २९१–२९२.)

इति । शक्यप्रति[6]कारोपेक्षकस्य दण्डमाह स एव—

‘ यत्रापवर्तते युग्यं वैगुण्यात् [7]प्राजकस्य तु ।
तत्र स्वामी भवेद्दण्ड्यो हिंसायां द्विशतं दमम्’ ॥
(म. स्मृ. ८. २९३.)

---

* नासायां भवं नास्यम् । शरीरावयवत्वाद्यत् । सा चेह बलीवर्द-नासासम्बन्धिनी रज्जुः । छिन्ननास्यरज्जौ बलीवर्दादिके, भग्ने युगाख्ये काष्ठे, रथादौ भूमिवैषम्यादिना तिरश्चीनं वा गते, तथा चक्रान्तःप्रविष्टाक्षकाष्ठभङ्गे, यन्त्राणां चर्मबन्धनानां छेदने, योक्त्रस्य पशुग्रीवारज्जोः रश्मेः प्रहरणस्य च छेदने, अपसरापसरेत्युच्चैः शब्दे सारथ्यादिना कृते च यानेन प्राणिहिंसा–द्रव्यनाशयोः कृतयोः सारथ्यादेर्दण्डो नास्तीति मनुराह ।

---

१. B. in margin and C. read अन्यत्र for अशक्य°. २. B. originally reads छिन्ने नष्टे युगे भग्ने and in margin छिन्ने नास्ये युगे भुग्ने, C. छिन्ने नस्ये युगे भग्ने; while D. like B. originally, for छिन्ननास्ये भग्नयुगे. ३. B. C. and D. read भेदने for छेदने, while C. reads छेदनेनैव गात्राणां for छेदने चैव यन्त्राणां. ४. C. reads वा for च. ५. B. reads न दण्डवान्; while C. तमव्यात् for न दण्डं. ६. B. C. read °प्रतीकारे तूपेक्षकस्य for °प्रतिकारोपेक्षकस्य. ७. B. C. read व्राजकस्य for प्राजकस्य.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

इति। प्राजकः शकटादिनेता। वैगुण्यं नाम वैकल्यं वेतनलाघवार्थं स्वाम्यनुमतम्। यत्र समर्थप्राजकदोषेण प्राणिहिंसा तत्र न स्वामिनो दण्डः किन्तु प्राजकस्यैवेत्याह स एव—

'प्राजकश्चेद्भवेदाप्तः प्राजको दण्डमर्हति'।

(म. स्मृ. ८. २९४.)

इति। आप्तः समर्थ इत्यर्थः। पशुभिद्रोहे दण्डमाह याज्ञवल्क्यः—

'दुःखे च शोणितोत्पादे शाखाङ्गच्छेदने तथा।
दण्डः क्षुद्रपशूनां तु द्विपणप्रभृतिः क्रमात्॥
लिङ्गस्य छेदने मृत्यौ मध्यमो मूल्यमेव च।
महापशूनामेतेषु स्थानेषु द्विगुणो दमः'॥

(या. स्मृ. २. २२५–२२६.)

इति। क्षुद्रपशूनामजाविप्रभृतीनां दुःखोत्पादने शोणितोत्पादने। शाखाशब्देन शृङ्गादिकं लक्ष्यते। अङ्गानि करचरणादीनि। तेषां छेदे वा यथाक्रमं द्विपणप्रभृतिर्दण्डः।

---

१. B. C. read व्राजकः for प्राजकः. २. B. and C. read अङ्ग° before वैकल्यं, while in margin B. reads गोवैकल्यं for अङ्गवैकल्यं. ३. B. C. read व्राजक° for प्राजक°. ४. B. and C. read व्राजकस्य for प्राजकस्य. ५. B. and C. read व्राजकश्चेत् for प्राजकश्चेत्. ६. B. and C. read व्राजकः for प्राजकः. ७. B. reads दुःखे ताडनेन before दुःखोत्पादने. ८. B. reads शोणितोत्पादे for शोणितोत्पादने. ९. B. reads छेदने for छेदे. १०. B. and C. read द्विगुण° for द्विपण°.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

द्विपण-चतुष्पण-षट्पणा-ऽष्टपणे[1] इत्यादिरूपः[2] । तेषां लिङ्गच्छेदने मृत्युकरणे[3] वा[4] मध्यमसाहसो दण्डः मूल्यदानं च । महापशूनां गो-गज[5]-वाजि[6]प्रभृतीनामेतेषु स्थानेषु पूर्वोक्त[7]दण्डाद्द्विगुणदण्डो वेदितव्य इत्यर्थः । कार्षापणशतदण्ड[8] इत्यनुवृत्तौ विष्णुरपि—

‘ पशूनां पुंस्त्वोपघातकारी तथा गजाश्वोष्ट्र-गो-घाते[9]ऽप्येकपादः । मांसविक्रयी च ग्राम्यपशुघाती च कार्षापणम्[10][11] । पशु[12]स्वामिनश्च पशु[12]मूल्यं दद्यात् । आरण्यपशुघाती पञ्चाशतं[13] कार्षापणान् । पक्षिघाती मत्स्यघाती च दश कार्षापणान् । कीटोपघाती कार्षापणम् ’ ।

इति । कात्यायनोऽपि—

---

१. B. and C. read अष्टापण° for अष्टपण°. २. B. and C. read इत्येवं-रूपः for इत्यादिरूपः. ३. B. and C. read मरणे for मृत्युकरणे. ४. B. and C. substitute च for वा. ५. B. omits °गज°. ६. C. reads °गवादि° for °वाजि.° ७, B. and C. read पूर्वोक्तादण्डात् for पूर्वोक्तदण्डात्. ८. B. and C. read कार्षापणशतं दण्ड इति for कार्षापणशतदण्ड इति. ९. B. orignally reads °घातकारी एकपादः and in margin °घातीत्वेककरपादः; while C. °घातिष्वेकपादः for °घातेप्येकपादः. १०. B. and C. read कार्षापणशतं दण्ड्यः for कार्षापणम्. ११. A. and D. omit पशुस्वामिनश्च पशुमूल्यं दद्यात्। आरण्यपशुघाती पंचाशतं कार्षापणान् । पक्षिघाती मत्स्यघाती च दश कार्षापणान्' । कीटोपघाती कार्षापणम्' इति ।. १२. C. omits पशु°. १३. C. omits पंचाशतं.

54

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

'द्वि[1]पणो द्वादशपणो[2] वधे तु मृग-पक्षिणाम् ।
सर्प-मार्जार-नकुल-श्व-सूकरवधे नृणाम्' ॥

इति । मनुरपि—

'गो[3]कुमारी-देवपशूनक्षं[4]मं वृषभं तथा ।
वा[5]हयन् साहसं पूर्वं प्राप्नुयादुत्तमं वधे[6]* ॥
मनुष्यमारणे क्षिप्रं चौरवत् किल्बिषं भवेत् ।
प्राणभृत्सु महत्स्वर्धं[7] गो-गजोष्ट्र-हया[8]दिषु ॥
क्षुद्रकाणां पशूनां तु[9] हिंसा[10]यां द्वि[11]शतो दमः ।
पञ्चाशत्तु भवेद्दण्डः शुभेषु मृगपक्षिषु ॥

---

* नास्त्ययं श्लोकः मुद्रितमनुस्मृतिपुस्तकेषु । अस्मत्सङ्गृहीत प्राचीनतमपुस्तके वर्तते । तत्र तु—
'गां कुमारीं ग्राम्यपशूनुक्षाणं वाजिनं तथा ।
दारयन् साहसं त्वर्धं प्राप्नुयात् घातने समम्' ॥
इत्येवं पाठो दृश्यते ।

---

१. B. originally reads त्रिपणो; while C. विपणो. २. C. wrongly reads द्वादशपणो वधे उष्ट्रपक्षिणाम् for वधे तु मृगपक्षिणाम्. ३. B. and C. read य: for गो°. ४. C. reads रक्षिणं, and B. उक्षाणं for अक्षमं. ५. B. and C. read वाहयेत् for वाहयन्. ६. C. reads वधं for वधे. ७. B. C. and D. read महत्पूर्वं for महत्स्वर्धं. ८. B. originally reads °खरादिषु for °हयादिषु. ९. B. C. and D. read च for तु. १०. B. reads हिंसने and C. D. read हिंसतो for हिंसायां. ११. B. in margin reads द्वादशो; while C. द्वादशतो and D. दशतो for द्विशतो.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

गर्दभाजाविकानां तु दण्डः स्यात्पञ्चमाषिकः[1][2] ।
माषिकस्तु[3] भवेद्दण्डः श्व-सूकरनिपातने[4]'† ॥

(म. स्मृ. ८. २९६–२९८.)

इति । राज्ञो दण्डदानवत् स्वामिनः प्रतिरूपकं मूल्यं वा दद्यादित्याह कात्यायनः—

'प्रमापणे[5] प्राणभृतां दद्यात् तत्प्रतिरूपकम् ।
तस्यानुरूपं मूल्यं वा दद्यादित्यब्रवीन्मनुः' ॥

इति । स्थावरप्राणिपीडाकारिणां दण्डमाह मनुः—

'वनस्पतीनां सर्वेषामुपभोगो यथायथा[6] ।
तथातथा दमः कार्यो हिंसायामिति धारणा' ॥

(म. स्मृ. ८. २८५.)

---

† गोकुमारी वत्सतरी, देवपशुः देवोद्देशेनोत्सृष्टा वृषभादयः, अक्षमं अशक्तं वृषभं वाहयन् प्रथमसाहसरूपं दण्डं, वधे तु उत्तमसाहसं प्राप्नुयात् । मनुष्यमारणे प्राजकस्य अनवधानात् यानेन कृते शीघ्रमेव चौरदण्डोत्तमसाहसं भवेत् । न तु मारणरूपो दण्डः। 'प्राणभृत्सु महत्स्वर्धम्' इति स्मरणात् गोगजादिषु महत्सु प्राणिषु मारितेषु उत्तमसाहस्यार्धं पञ्चशतपणो दण्डो भवेत् । क्षुद्रकाणां पशूनां जातितो विशेषापदिष्टेतरेषां वनचरादीनां वयसा च किशोरादीनां मारणे द्विशतो दण्डः स्यात् । शुभेषु रुरुपृषतादिषु, पक्षिषु च शुक-हंस-सारसादिषु हतेषु पञ्चाशद्दण्डो भवेत् । गर्दभ-छागेडकादीनां पुनर्मारणे पञ्चरूप्यमाषकपरिमाणो दण्डः स्यात् । न चात्र हैरण्यमाषग्रहणम् । उत्तरोत्तरलघुदण्डाभिधानात् । श्व-सूकरमारणेषु रौप्यमाषपरिमाणो दण्डः भवेत् ।

---

१. B. C. and D. read च for तु. २. B. C. and D. °माषकः for °माषिकः. ३. B. C. and D. read माषकः for माषिकः. ४. B. reads °विपातने for °निपातने. ५. C. reads प्रमापणं for प्रमापणे. ६. B. originally reads तथा.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

इति। फल-पुष्पोपभोगतारतम्यानुरोधेनोत्तम-मध्यमादयो दण्डाः कल्पनीयाः। तथा च दण्ड्य[1] इत्यनुवृत्तौ विष्णुः—

'फलोपभोग[2]द्रुमच्छेदी[3] तूत्तमं साहसम्। पुष्पोपभोग[4]द्रुमच्छेदी मध्यमं साहसम्। वल्लीगुल्मलताच्छेदी[6] कार्षापणशतम्। तृणच्छेद्येकम्[7]। सर्वं च तत्स्वामिनां[8] तदुत्पत्तिम्'।

इति। फल[9]-पुष्पोपभोगद्रुमच्छेदकादयः छिन्न[10]द्रुमस्वामिनां तदुत्पत्तिं[11] पुनः प्रतिरोपितद्रुमफला[12]दिभोगकालपर्यन्तं दाप्या इति शेषः। अत्र विशेषमाह याज्ञवल्क्यः—

'प्ररोहिशाखिनां शाखास्कन्धसर्व[13]विदारणे।
उपजीव्यद्रुमाणां च विंशते[14]र्द्विगुणो दमः‡॥

---

‡ प्ररोहिशाखिनामिति। प्ररोहा अङ्कुराः तद्वन्त्यः शाखाः प्ररोहिण्यः याः शाखाः छिन्नाः पुनरुप्ताः प्रतिकाण्डं प्ररोहन्ति ता शाखा येषां वटादीनामिति व्याख्येयम्। यतो मूलशाखाः निर्गच्छन्ति स स्कन्धः।

---

१. B. reads दण्ड for दण्ड्य. २. D. reads° योग° for °भोग°. ३. B. omits °द्रुमच्छेदी; C. omits तु. ४. D. reads °योग°; while C. omits पुष्पोपभोगद्रुमच्छेदी मध्यमसाहसम्। वल्लीगुल्मलताच्छेदी कार्षापणशतम्। तृणच्छेद्येकम्। सर्वं च तत्स्वामिनां तदुत्पत्तिम् इति। फल°. ५. B. omits °द्रुमच्छेदी. ६. B. omits °गुल्म-लताच्छेदी. ७. एकैकम् for एकम्. ८. reads स्वामिना for स्वामिनाम्. ९. B. reads सर्वं फलो° for फलपुष्पो°. १०. B. adds तत्स्वामिनां before छिन्नद्रुम°; while C. reads स्वतः स्वामिनां before छिन्नद्रुम°; and for छिन्नद्रुमस्वामिनां, B. and C. both read छिन्नद्रुमादिस्वामिनाम्. ११. B. and C. respectively read फलपुष्पोपभोगद्रुमोत्पत्तिं and फलपुष्पोपभोगद्रुमादुत्पत्तिं after तदुत्पत्तिं. १२. B. C. read °द्रुमादि° for °द्रुमफलादि°. १३. B. C. read °पर्व° for °सर्व°. १४. C. reads विंशतोऽर्धगुणो दमः for विंशतेर्द्विगुणो दमः.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

चैत्यश्मशानसीमासु पुण्यस्थाने सुरालये ।
जातद्रुमाणां द्विगुणो दमो वृक्षेऽथ[1] विश्रुते ॥
गुल्म-गुच्छ-क्षुप-लता-प्रतानौषधि-वीरुधाम्[2] ।
पूर्वस्मृतादर्धदण्डः स्थानेषूक्तेषु कर्तने ' ॥
(या. स्मृ. २. २२७–२२९.)

इति । प्ररोहिशाखिनां वटादीनां शाखाच्छेदने स्कन्धच्छेदने[3] च यथाक्रमं विंशतिपणाद्दण्डादारभ्य पूर्वस्मात् पूर्वस्मादुत्तर उत्तरो दण्डो द्विगुणः । विंशतिपण-चत्वारिंशत्पणा-ऽशीतिपणा इत्येवंरूपः । [4]अप्ररोहिशाखिनामाम्रादीनामुपजीव्यद्रुमाणां[5] पूर्वोक्तेषु स्थानेषु चैत्यादिस्थानेषूत्पन्नानां वृक्षाणां शाखादिच्छेदने [6]अश्वत्थपलाशादीनां शाखादिच्छेदनेऽपि पूर्वोक्ताद्दण्डाद्विगुणो दण्डः[7] । [8]गुल्मा मालत्यादयः । गुच्छाः कुरण्टकादयः । क्षुपाः करवीरादयः । लता द्राक्षाऽतिमुक्तादयः । [9]प्रतानाः काण्डप्ररो-हैर्[10]रहिताः । ओषध्यः फलपाकान्ताः शालिप्रभृतयः । वीरुधो गुडूचिप्रभृतयः । एतेषु[11] स्थानेषु विकर्तने पूर्वोक्ताद्दण्डादर्धदण्डो वेदितव्यः । कुड्याभिघाते[12] गृहे कण्टकादिप्रक्षेपणे च दण्डमाह याज्ञवल्क्यः—

---

१. B. reads दण्डः स्यादथ, C. दण्डावृत्तोऽथ, D. दण्डो वृक्षेऽथ, and the text of Yâjñav. दमो वृक्षे च, for दमो वृक्षेऽथ. २. C. reads ओषधीनां च वीरुधाम् for °प्रतानौषधि-वीरुधाम्. ३. B. and C. add समूलछेदने after स्कन्धछेदने च. ४. C. reads आरोहि° for अप्ररोहि.° ५. C. adds तु after आम्रादीनाम्. ६. B. reads विश्रुताश्वत्थ° and C. विच्छित्याऽश्वत्थ°. ७. B. and C. omit दण्डः and read द्विगुणः before it. ८. C. reads गुल्मसातत्यादयः for गुल्मा मालत्यादयः. ९. C. reads प्रणवाः for प्रतानाः. १०. C. reads °प्ररोहि°. ११. B. reads एतेषां पूर्वोक्तस्थानेषू for एतेषु स्थानेषु. १२. B. and C. read कुड्यादिघाते for कुड्याभिघाते.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

'अभिघाते तथा छेदे[१] भेदे कुड्यावपातने ।
पणान् दाप्यः पञ्च दश विंशतिं तद्वयं[२] तथा ॥
दुःखोत्पादि गृहे द्रव्यं क्षिपन्[३] प्राणहरं तथा ।
षोडशाद्यः पणान्[४] दाप्यो द्वितीयो मध्यमं दमम्[५]' ॥
(या. स्मृ. २. २२३–२२४.)

इति । मुद्गरादिना कुड्यस्याभिघाते विदारणे द्वैधीकरणे यथाक्रमं पञ्चपणो दशपणो विंशतिपणश्च दण्डः । अवपातने पुनस्त्रयो[६] दण्डाः समुचिताः । कुड्यसंपादनार्थं धनमपि[७] देयम् । परगृहे कण्टकादिप्रक्षेपणे षोडशपणो दण्डः । विषभुजङ्गादिप्रक्षेपणे मध्यमसाहसो दण्ड इत्यर्थः ।

॥ इति दण्डपारुष्यम् ॥

अथ वाक्पारुष्यम् । तस्य लक्षणं[८] नारदेनोक्तम्—
'देश-जाति-कुलादीनामाक्रोश-न्यङ्गसंयुतम् ।
यद्वचः प्रतिकूलार्थं वाक्पारुष्यं तदुच्यते' ॥
(ना. स्मृ. १९. १.)

इति । कलहप्रिया गौडा इति देशाक्रोशः । अतिलोलुपा ब्राह्मणा इति जात्याक्रोशः । क्रूरचित्ता[९] वैश्वामित्रा इति कुला-[१०]

---

१. D. reads भेदे छेदे for छेदे भेदे. २. D. reads तद्दयं, C. तद्देयं, for तद्वयं. ३. B. originally reads क्षिप्तं. ४. D. reads पणं for पणान्. ५. B. C. D. read मध्यसाहसम् for मध्यमं दमम्. ६. C. reads पुनस्तु यो दण्डः समुचितः for पुनस्त्रयो दण्डाः समुचिताः. ७. C. reads बंधनम for धनम्. ८. C. reads च after लक्षणं. ९. B. and C. read क्रूरवित्ता for क्रूरचित्ताः. १०. C. reads वैश्वामित्रकुलाक्रोशः for वैश्वामित्रा इति कुलाक्रोशः

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

क्रोशः । आक्रोश उच्चैर्भाषणं[1] न्यङ्गमवद्यं[2] तदुभययुक्तं यदुद्वेगजननार्थं वाक्यं तद्वाक्पारुष्यमित्यर्थः । तस्य त्रैविध्यमाह स एव—

'निष्ठुरा-ऽश्लील-तीव्रत्वात्तदपि त्रिविधं स्मृतम् ।
गौरवानुक्रमात्तस्य दण्डोऽप्यत्र क्रमाद्गुरुः[3] ॥
साक्षेपं निष्ठुरं ज्ञेयमश्लीलं न्यङ्गसंयुतम् ।
पातनीयैरुपक्रोशैस्तीव्रमाहुर्मनीषिणः' ॥

(ना. स्मृ. १५.२–३.)

इति । कात्यायनोऽपि—

'[4]यस्त्वसत्संज्ञितैरङ्गैः [5]परस्याक्षिपति क्वचित् ।
[6]अमूलैर्वाऽथ मूलैर्वा निष्ठुरा वाक् स्मृता बुधैः ॥
न्यग्भावकरणं वाचा क्रोधात्तु कुरुते [7]यदा ।
[8]वृत्तैर्देश-कुलानां वाऽप्यश्लीला सा बुधैः स्मृता ॥
महापातकयोक्त्री च राग-द्वेषकरी च या ।
जातिभ्रंशकरी वाऽथ तीव्रा सा प्रथिता तु [9]वाक्' ।

इति । प्रथम-मध्यमोत्तमभेदेन[10] त्रैविध्यमाह बृहस्पतिः—

'देश-ग्राम-कुलादीनां क्षेपः पापेन योजनम् ।
[11]इष्टं विना तु प्रथमं वाक्पारुष्यं [12]तदुच्यते ॥

---

१. B. and C. omit आक्रोश उच्चैर्भाषगं. २. C. reads कर्मवद्यं for न्यङ्गमवद्यं. ३. B. C. and D. omit गौरवानुक्रमात्तस्य दण्डोऽप्यत्र क्रमाद्गुरुः. ४. C. reads यात्वसत्° for यस्त्वसत्°. ५. B. reads परमाक्षिपति for परस्याक्षिपति. ६, B. C. read अभूतैर्वाथ भूतैर्वा. for अमूलैर्वाथ मूलैर्वा. ७. B. C. read यथा for यदा. ८. C. reads वृत्तैर्देश for वृत्तैर्देश°. ९. C. reads वा for वाग्. १०. C. reads °भेदैः for °भेदेन. ११. B. and C. read हृद्यं for इष्टं. १२. B. C. and D. read तयोच्यते for तदुच्यते.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

भगिनी-मातृसम्बन्धमुपपातकशंसनम्[१] ।
पारुष्यं मध्यमं प्रोक्तं वाचिकं शास्त्रवेदिभिः ॥
अभक्ष्या-ऽपेयकथनं महापातकदूषणम् ।
पारुष्यमुत्तमं प्रोक्तं तीव्रं मर्माभिघट्टनम्' ॥

इति । निष्ठुराक्रोशे दण्डमाह याज्ञवल्क्यः—

'सत्यासत्यान्यथास्तोत्रैर्न्यूनाङ्गेन्द्रियरोगिणाम् ।
क्षेपं करोति चेद्दण्ड्यः पणानर्धत्रयोदशान्' * ॥
(या. स्मृ. २. २०४.)

इति । सत्येनासत्येनान्यथास्तोत्रेण न्यूनाङ्गादीनां तर्जनी-तर्जनं यः करोति असावर्धाधिकद्वादशपणं §दण्डनीयः । एतत्स-मेवर्णगुणविषयम्[२] । तथा च बृहस्पतिः—

'समजातिगुणानां तु वाक्पारुष्ये परस्परम् ।
विनयोऽभिहितः शास्त्रे पणानर्धत्रयोदश[३] ' ॥

इति । यत्तु मनुवचनम्—

---

* निष्ठुराक्रोशे सवर्णविषये दण्डमाह—सत्यासत्येति । न्यूनाङ्गाः कर-चरणादिविकलाः । न्यूनेन्द्रिया नेत्रश्रोत्रादिरहिताः । रोगिणो दुश्चर्मप्रभृतयः । तेषां सत्येन असत्येन वाऽन्यथास्तोत्रेण च निन्दार्थया स्तुत्या । यत्र नेत्रयुगुलहीन एषोऽन्ध इत्युच्यते तत्सत्यम् । यत्र पुनः चक्षुष्मानेव अन्ध इत्युच्यते तदसत्यम् । यत्र विकृताकृतिरेव दर्शनीय-स्त्वमसि इत्युच्यते तदन्यथास्तोत्रम् ।

§ विज्ञानेश्वरस्तु—अर्धत्रयोदशानित्यनेन अर्धाधिकत्रयोदशपणान् दण्डनीय इति वदति । तत्र अर्धसहिताः त्रयोदश इति व्याख्येयम् ।

---

१. B. reads °सम्बन्धात् for °सम्बन्धं; while C. reads °सम्बन्ध उपपातक° for °सम्बन्धमुपपातक°. २. B. C. read सवर्ण° for समवर्ण-गुण°. ३. B. reads पणाः for पणान्.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

'काणं वाऽप्यथ-वा खञ्जमन्यं वाऽपि तथाविधम् ।
तथ्येनापि ब्रुवन् दाप्यो दण्डं[1] कार्षापणावरम्[2]' ॥
(म. स्मृ. ८. २७४.)

इति तदपि दुर्वृत्त[3]विषयम् । मात्राद्याक्षेपकं प्रत्याह मनुः-

'मातरं पितरं जायां भ्रातरं श्वशुरं[4] गुरुम् ।
अक्षारयन् शतं दाप्यः पन्थानं वाऽददद्गुरोः[5]' ॥
(म. स्मृ. ८. २७५.)

इति । एतच्चापराधिषु मात्रादिषु जायायां वा[6] निरपराधायां[7] वेदितव्यम् । स्वस्राद्याक्षेपे[8] दण्डमाह बृहस्पतिः—

'क्षिपन् स्वस्रादिकं दद्यात् पञ्चाशत्पणिकं दमम्' ।

इति । प्रातिलोम्यानुलोम्याभ्यामाक्रोशे दण्डमाह मनुः—

'शतं ब्राह्मणमाक्रुश्य क्षत्रियो दण्डमर्हति ।
वैश्योऽप्यर्धशतं द्वे वा[9] शूद्रस्तु वधमर्हति† ॥
पञ्चाशद्ब्राह्मणो दण्ड्यः क्षत्रियस्याभिशंसने ।
वैश्ये स्यादर्ध[10]पञ्चाशत् शूद्रे द्वादशको दमः' ॥
(म. स्मृ. ८. २६७-२६८.)

---

† द्विजस्य चोर इत्याक्षेपरूपं परुषमुक्त्वा क्षत्रियः पणशतं दण्डमर्हति । एवं सार्धशतं द्वे वा शते लाघव-गौरवापेक्षया वैश्यः । शूद्रोऽप्येवं ब्राह्मणाक्रोशे ताडनादिरूपं वधमर्हति । एवं ब्राह्मणोऽपि क्षत्रिय-वैश्य-शूद्राक्रोशे क्रमेण पञ्चाशत् पञ्चविंशतिर्द्वादशपणात्मकं दण्डमर्हति इति भावः ।

---

१. D. reads दण्ड॰ for दण्डं. २. C. reads कार्षापिणं दश for कार्षापणावरम्. ३. C. reads दुर्वृत्त्य॰ for दुर्वृत्त॰. ४. Manu text तनयं for श्वशुरं. ५ B. reads चाऽददत् for वाऽददत्. ६. C. reads च for वा. ७. C. omits निरपराधायां. ८. B. reads स्वस्राद्यधिक्षेपे and C. स्वस्राद्यधिक्षेपे for स्वस्राद्याक्षेपे. ९. B. C. and D. read ॰ऽप्यर्धशतं देयः for ॰ऽप्यर्धशतं द्वे वा. १०. B. reads स्याच्चार्ध॰ for स्यादर्ध॰.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

इति । बृहस्पतिरपि—

'वैश्यस्य क्षत्रियाक्रोशे दण्डनीयः प्रदो भवेत् ।
तदर्धं क्षत्रियो वैश्यं क्षिपन् विनयमर्हति ॥
शूद्राक्रोशे क्षत्रियस्य पञ्चविंशतिको दमः ।
बृहत्त्वे द्विगुणं तत्र शास्त्रविद्भिरुदाहृतम् ॥
वैश्यमाक्षारयेन् शूद्रो दाप्यः स्यात् प्रथमं दमम् ।
क्षत्रियं मध्यमं चैव विप्रमुत्तमसाहसम्' ॥

इति । बाह्वादिच्छेदन-निष्ठुराभिभाषणे याज्ञवल्क्यः—

'बाहु-ग्रीवा-नेत्र-सक्थिविनाशे वाचिके दमः ।
शत्यस्तदर्धिकः पाद-नासा-कर्ण-करादिषु ॥
अशक्तस्तु वदन्नेवं दण्डनीयः पणान् दश ।
तथा शक्तः प्रतिभुवं दाप्यः क्षेमाय तस्य तु' ॥

(या. स्मृ. २. २०८–२०९.)

इति । बाह्वादीनां विनाशे तव बाहू छिनद्मीत्येवं वाचा प्रतिपादिते प्रत्येकं शतपरिमितो दण्डः । पाद-नासादिषु तु

---

१. C. and D. omit बृहस्पतिरपि—

वैश्यस्य क्षत्रियाक्रोशे दण्डनीयः प्रदो भवेत् ।
तदर्धं क्षत्रियो वैश्यं क्षिपन्विनयमर्हति ॥
शूद्राक्रोशे क्षत्रियस्य पञ्चविंशतिको दमः ।.

२. B. reads वैश्यस्य चैतत् द्विगुणं; while C. बृहस्यन्नेव द्विगुणं for बृहत्त्वे द्विगुणं तत्र. ३. B. C. read °माक्षारयेत् for °माक्षारयन्. ४. B. adds °विषये after °छेदन°. ५. B. originally and C. read चाधिको for वाचिके. ६. C. reads सत्यः for शत्यः. ७. C. and D. read तदधिकः for तदर्धिकः. ८. B. and C. read बाहुं for बाहू.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

वाचिके तदर्धिकः[1] पञ्चाशत्पणादिको[2] दण्डः । अशक्तस्त्वेवं वदन् दश-पणान्[3] दण्डनीयः । शक्तः पुनः क्षीणशक्तिं एवं वदन् शतपणाद्यात्मकं दण्डं दत्वा तस्य क्षेमाय प्रतिभुवं दद्यादित्यर्थः । अश्लीलभाषणे दण्डमाह स एव—

'अभिगन्ताऽस्मि भगिनीं मातरं वा तवेति च[4] ।
शपन्तं[5] दापयेद्राजा पञ्चविंशतिकं दमम्' ॥

(या. स्मृ. २. २०९.)

इति । तीव्राक्रोशे दण्डमाह स एव—

'पतनीयकृते[6] क्षेपे[7] दण्डो मध्यमसाहसः ।
उपपातकयुक्ते तु दाप्यः प्रथमसाहसम्'† ॥

(या. स्मृ. २. २१०.)

इति । मनुरपि—

'पापोपपापवक्तारो[8] महापातकशंसकाः ।
आद्यमध्योत्तमान्[9] दण्डान् दद्युस्त्वेते[10] यथाक्रमम्*' ॥

(म. स्मृ. ८. २६९.)

---

† तीव्राक्रोशे दण्डमाह—पातित्यहेतुभिर्ब्रह्महत्यादिभिः वर्णिनामाक्षेपे कृते मध्यमसाहसं दण्डः । उपपातकसंयुक्ते पुनः—गोघ्नः त्वमसि इत्येवमादिरूपे क्षेपे प्रथमसाहसं दण्ड्यः ।

* नास्त्ययं श्लोको मुद्रितमनुस्मृतिपुस्तकेषु । अस्मत्संगृहीतगोविन्दराजकृतटीकासहिते लिखितपुस्तके दृश्यते । व्याख्यातश्च तेन ॥ [मण्डलिकशोधितेऽस्मिन्ग्रन्थे तु नोपलभ्यते । (R. G. B.)].

---

१. D. reads तदधिकः for तदर्धिकः. २. B. and C. read पञ्चाशत्पणात्मकः; while D. पञ्चाशत्पणाधिकः for पञ्चाशत्पणादिकः. ३. C. reads दशपणं for दश पणान् ४. B. C. read ह for च. ५. D. reads शतं प्रदापयेत् for शपन्तं दापयेत्. ६ D. reads पतनीये कृते for पतनीयकृते. ७. C. read- क्षेत्रे for क्षेपे. ८. B. and C. read महापापोपवक्तारो for पापोपपापवक्तारो. ९. C. reads अधो° for आद्य°. १०. B. reads °स्ते तु and C. °स्ते ते for °स्त्वेते.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

इति। त्रैविद्याद्यधिक्षेपे याज्ञवल्क्यः—

'त्रैविद्य-नृप-देवानां क्षेपे उत्तमसाहसः।
मध्यमो जाति-पूगानां प्रथमो ग्राम-देशयोः'॥

(या. स्मृ. २. २११.)

इति। जातयः ब्राह्मणादयः। पूगाः संघाः। शूद्रमधिकृत्याहतुर्मनु-नारदौ—

'एकजातिर्द्विजातींस्तु वाचा दारुणया क्षिपन्।
जिह्वायाः प्राप्नुयाच्छेदं जघन्यप्रभवो हि सः॥
मध्यमो जाति-पूगानां प्रथमो ग्राम-देशयोः।
नामजातिग्रहं चैषामभिद्रोहेण कुर्वतः॥
निखेयोऽयोमयः शंकुर्ज्वलन्नास्ये दशाङ्गुलः'।

(म. स्मृ. ८. २७०–२७१.)

इति। बृहस्पतिरपि—

'धर्मोपदेशं धर्मेण विप्राणामस्य कुर्वतः।
तप्तमासिञ्चयेत्तैलं वक्त्रे श्रोत्रे च पार्थिवः'॥

इति। क्वचिद्वाक्पारुष्य-दण्डापवादमाह स एव—

'सच्छूद्रस्यायमुद्दिष्टो विनयोऽनपराधिनः।
गुणहीनस्य पारुष्ये ब्राह्मणो नापराध्नुयात्'॥

इति।

॥ इति वाक्पारुष्यम्॥

---

१. B. and C. read °द्याक्षेपे for °द्यधिक्षेपे. २. B. originally and D. read दण्ड for क्षेप; while C. दण्डा उत्तमसाहसाः for क्षेप उत्तमसाहसः. ३. C. reads विवदेत् गुणया for वाचा दारुणया. ४. C. reads प्रदात्य° for जघन्य°. ५. B. reads शूलं वाऽस्ये for ज्वलन्नाऽस्ये. ६. B. reads दर्पेण for धर्मेण. ७. D. reads आसेचयत् for आसिंचयेत्.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अथ स्तेयम् ।

तल्लक्षणमाह मनुः—

'स्यात् साहसं त्वन्वयवत् प्रसभं कर्म यत् कृतम् ।
निरन्वयं भवेत् स्तेयं हृत्वापव्ययते यदि' ॥

(म. स्मृ. ८. ३३२.)

इति । अस्यार्थः-द्रव्यरक्षक-राजाध्यक्षादिसमक्षं बलावष्टम्भेन यत् परद्रव्यापहारादिकं क्रियते तत् साहसम्।* स्तेयं पुनरसमक्षं वञ्चयित्वा यत् परद्रव्यग्रहणं तदिति । यत्तु राजाऽध्यक्षादिकमाहृत्य न मयेदमपहृतमिति भयान्निह्नुते तदपि स्तेयं भवति । अत एव नारदः—

'उपायैर्विविधैरेषां छलयित्वाऽपकर्षणम् ।
सुप्त-मत्त-प्रमत्तेभ्यः स्तेयमाहुर्मनीषिणः' ॥

(ना. स्मृ. १४. १७.)

इति तदपि क्षुद्रमध्योत्तमद्रव्यापेक्षया त्रिविधं । तदाह स एव—

---

* सहो बलं तद्भवं साहसमित्युच्यते.

---

१. C. reads तु त्वधवत् प्रशंसं for त्वन्वयवत् प्रसभं. २. B. reads °ध्यक्षादिसमक्षं for ध्यक्षादिकम्. ३. B. in margin and C. read तुलयित्वा for छलयित्वा. ४. A. C. and D. omit from स्तेयमाहुर्मनीषिणः to द्रव्याण्याह हारीतः.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

'तदपि त्रिविधं ज्ञेयं द्रव्यापेक्षं मनीषिभिः ।
'क्षुद्र-मध्यम-मुख्यानां द्रव्याणामपहारतः' ॥
(ना. स्मृ. १४. १३.)

इति । क्षुद्र-मध्योत्तमद्रव्याण्याह हारीतः—

मृद्भाण्डा-ऽऽसन-खट्वा-ऽस्थि-तन्तु-चर्म-तृणादि यत् ।
शमीधान्यं कृतान्नं च क्षुद्रं द्रव्यमुदाहृतम् ॥
वासः कौशेयवर्जं तु गोवर्जं पशवस्तथा ।
हिरण्यवर्जं लोहं च मद्य-व्रीहि-यवादिकम् ॥
हिरण्य-रत्न-कौशेय-स्त्री-पुंस-गज-वाजिनः ।
देव-ब्राह्मण-राज्ञां च विज्ञेयं द्रव्यमुत्तमम्' ॥
(ना. स्मृ. १४. १४–१६.)

इति । तस्करज्ञानोपायमाह याज्ञवल्क्यः—

'ग्राहकैर्गृह्यते चोरो लोप्त्रेणाथ पदेन वा ।
पूर्वकर्मापराधी च तथा चाशुद्धवासकः ॥
अन्येऽपि शङ्कया ग्राह्या जाति-नामादिनिह्नवैः ।
द्यूत-स्त्री-पानसक्ताश्च शुष्क-भिन्नमुखस्वराः ॥
परद्रव्य-गृहाणां च प्रच्छका गूढचारिणः ।
निराया व्ययवन्तश्च विनष्टद्रव्यविक्रयाः' ॥
(या. स्मृ. २. २६६–२६८.)

१. B. omits द्रव्याणामपहारतः. २. C. reads °श्चखुस्ति° for °खट्वास्थि°. ३. B. reads °दारु°: while C. °दातु° for °तन्तु°. ४. B. reads तत्समुदाहृतम् for द्रव्यमुदाहृतम्. ५. B. and C. read मध्यं for मद्य°. ६. B. reads यवानि च for यवादिकं ७. B. reads °पुंगो° for °पुंस°, while C. °पुंयो° for पुंस. ८ C. reads लोघ्रणा प्रपदेनवा. for लोप्त्रेणाथ पदेन वा ९. C. reads ऽनुद्धवासत्नः for चाऽशुद्धवासकः. १० D. reads °निह्नवे for °निह्नवैः. ११. C. reads महाणां for गृहाणाम्.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

इति। ग्राहकै राजपुरुषैर्लोप्त्रेणापहृतभाजनादिना चौर्य[1]-चिह्नेन नष्ट[2]द्रव्यदेशादारभ्य† चोरपादानुसारेण वा चोरा ग्रहीतव्याः। पूर्वकर्मापराधी प्राक् प्रख्यातचौर्यः। अशुद्धवासक अप्रज्ञातस्थानवासी। जातिनिह्नवो नाहं शूद्र इति। नामनिह्नवो नाहं डित्थ इति। आदिग्रहणात् स्वदेश-ग्राम-कुला-द्युप[3]लक्ष्यते। नष्टद्रव्यविक्रयाः भिन्नभाजनजीर्णवस्त्राद्यनिर्ज्ञातस्वामिकविक्रयकारिणः। एवंविधलिङ्गैः पुरुषान् गृहीत्वा चोरा भवन्ति न वा इति सम्यक् परीक्षेत। न तावता स्तेनं[4] निश्चिनुयात्। तदाह नारदः—

'अन्यहस्तात् परिभ्रष्टमकामा[5]दुत्थितं भुवि।
चोरेणापि परिक्षिप्तं लोप्त्रं[6] यत्नात् परीक्षयेत्॥
असत्याः सत्यसंकाशाः सत्याश्चाऽसत्यसन्निभाः।
दृश्यन्ते विविधा भावाः तस्मा[7]द्युक्तं परीक्षणम्'॥
(ना. स्मृ. १२. १०–११.)

इति। तस्करोऽपि द्विविधः[8]। तदाह बृहस्पतिः—

'प्रकाशाश्चाऽप्रकाशाश्च तस्करा द्विविधाः स्मृताः।
प्रज्ञा-सामर्थ्य-मायाभिः प्रभिन्नास्ते[9] सहस्रधा॥

† नाशदिवसादारभ्य चोरपदानुसारेण वेति विज्ञानेश्वरः।

१. B in margin and C. read °धैर्य° and °धौर्य° respectively for °चौर्य°. २. B. C. omit नष्ट°. ३. B. C. read कुलाद्यपलापो for कुलाद्युप°. ४. B. and C. read तावन्मात्रेण for तावता स्तेनं. ५. C. reads प्रकामात् for अकामात्. ६. C. reads लोप्त्रं for लोप्त्रं. ७. C. reads यस्मात् for तस्मात्. ८. C. reads तस्करा अपि विविधाः for तस्करोऽपि द्विविधः. ९. C. reads प्रविशस्ते for प्रभिन्नास्ते.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

नैगमा वैद्य-कितवाः सभ्योत्कोचक-वञ्चकाः ।
दैवोत्पातविदो भद्राः शिल्पज्ञाः प्रतिरूपकाः ॥
अक्रियाकारिणश्चैव मध्यस्थाः कूटसाक्षिणः ।
प्रकाशतस्करा ह्येते तथा कुहकजीविनः' ॥

इति । प्रतिरूपकाः प्रतिरूपकारा इत्यर्थः । तथा च नारदः-

'प्रकाशवञ्चकास्तत्र कूटमान-तुलाऽश्रिताः ।
उत्कोचकाः सोपधिकाः कितवाः पण्ययोषितः ॥
प्रतिरूपकराश्चैव मङ्गलादेशवृत्तयः ।
इत्येवमादयो ज्ञेयाः प्रकाशास्तस्करा भुवि ' ॥
(ना. स्मृ. १६. २–३.)

इति । अप्रकाशतस्कराणां स्वरूपमाह बृहस्पतिः—

' सन्धिच्छिदः पान्थमुषो द्विचतुष्पदहारिणः ।
उत्क्षेपकाः सस्यहरा ज्ञेयाः प्रच्छन्नतस्कराः' ॥

इति । व्यासोऽपि—

' साधनाङ्गान्विता रात्रौ विचरन्त्यविभाविताः ।
अविज्ञातनिवासाश्च ज्ञेयाः प्रच्छन्नतस्कराः ' ॥
उत्क्षेपकः सन्धिभेत्ता पान्थ-उद्ग्रन्थिकादयः ।
स्त्री-पुंसयोः पशुस्तेयी चोरा नवविधाः स्मृताः' ॥

इति । उत्क्षेपको धनिनामनवधानमवधार्य तद्धनमुत्कृत्य ग्राहकः । सन्धिभेत्ता गृहयोः सन्धौ स्थित्वा तत्रत्यभित्तिभेत्ता ।

---

१ B. in margin and C. read °त्कोचक-चकाः for °त्कोचक-वञ्चकाः. २. B. and C. read °स्मृताः for °श्रिताः. ३. B. originally reads मंडला° and in margin संगता°; while C. आगता दृश° for मंगलादेश.° ४. B. C. read संविच्छिदः for संधिच्छिदः. ५. B. C. read स्त्री-पुंगोश्च° for स्त्री-पुंसयोः. ६. C. reads जनम् for तद्धनम्.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

पोन्थः यः कान्तारादौ पथिकानां प्रत्यक्षापहारकः । परिधानादि-ग्रथितं धनं ग्रहीतुं तेद्ग्रन्थिं मोचयति स उद्ग्रन्थिकः । प्रकाश-तस्कराणां नैगमादीनां दण्डमाह बृहस्पतिः—

'संसर्गचिह्नरूपैश्च विज्ञाता राजपूरुषैः ।
प्रदाप्यापहृतं दण्ड्या दमैः शास्त्रप्रचोदितैः ॥
प्रच्छाद्य दोषं व्यामिश्रं[3] पुनः संस्कृत्य विक्रयी ।
पण्यं तद्द्विगुणं दाप्यो वणिग्दण्ड्यश्च[4] तत्समम् ॥
अज्ञातौषधि-मन्त्रस्तु यश्च व्याधेरतत्त्ववित् ।
रोगिभ्योऽर्थं[5] समादत्ते स दण्ड्यश्चोरवद्भिषक् ॥
कूटाक्षदेविनः[6] क्षुद्रा राजभार्याहराश्च ये ।
गणका वञ्चकाश्चैव दण्ड्यास्ते कितवाः स्मृताः ॥
अन्यायवादिनः सभ्यास्तथैवोत्कोचजीविनः ।
विश्वस्तवञ्चकाश्चैव[7] निर्वास्याः सर्वे एव ते ॥
ज्योतिर्ज्ञानं तथोत्पातमविदित्वा तु ये नृणाम् ।
श्रावयन्त्यर्थलोभेन[8] विनेयास्ते प्रयत्नतः ॥
दण्डाजिनादिभिर्युक्तमात्मानं दर्शयन्ति ये ।
हिंसन्तश्छद्मना नृणां वध्यास्ते[9] राजपूरुषैः ॥
अल्पमूल्यं तु संस्कृत्य नयन्ति बहुमूल्यताम् ।
स्त्री-बालकान् वञ्चयन्ति दण्ड्यास्तेऽर्थानुसारतः ॥

१. A. and D. omit पान्थः. २. B. and C. read तद्ग्रन्थिमोचकः for तद्ग्रन्थि मोचयति. ३. C. reads व्याभिद्य for व्यामिश्रं. ४. B. C. read वणिग्दण्डं for वणिग्दण्ड्यः. ५. B. reads रोगिभ्यो and C. रोगिन्यो. ६. B. C. read कूटाक्षणदेवितः and D. कूटाक्षदेवितः for कूटाक्षदेविनः. ७. C. reads विश्वस्त-पञ्चकाः for विश्वस्तवञ्चकाः. ८. B. reads भावयन्ति for श्रावयन्ति. ९. C. wrongly reads व्ययास्ते for वध्यास्ते.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

हेम-रत्न-प्रवालाद्यान् कृत्रिमान् कुर्वते तु ये ।
क्रेतुर्मूल्यं प्रदाप्यास्ते राज्ञा तद्द्विगुणं दमम् ॥
मध्यस्था वञ्चयन्त्येकं स्नेहलोभादिना यदा ।
साक्षिणश्चान्यथा ब्रूयुर्दाप्यास्ते द्विगुणं दमम्' ॥

इति । अप्रकाशतस्कराणां सन्धिच्छिदादिकानां च दण्डमाह स एव —

'सन्धिच्छेदकृतो ज्ञात्वा शूलमाग्राहयेत् प्रभुः ।
तथा पान्थमुषो वृक्षे गलं बध्वाऽवलम्बयेत् ॥
मनुष्यहारिणो राज्ञा दग्धव्यास्ते कटाग्निना* ।
गोहर्तुर्नासिकां छिन्द्यात् बध्वा वाऽम्भसि मज्जयेत् ॥
उत्क्षेपकस्तु संदंशैर्भेत्तव्यो राजपूरुषैः ।
धान्यहर्ता दशगुणं दाप्यः स्याद्द्विगुणं दमम्' ॥

इति । ग्रन्थिभेदकस्य दण्डमाह मनुः—

'अङ्गुलीर्ग्रन्थिभेदस्य छेदयेत् प्रथमे ग्रहे ।
द्वितीये हस्तचरणौ तृतीये वधमर्हति'† ॥

(म. स्मृ. ९. २७७.)

---

* कटं तृणं तेन योऽग्निः प्रदीप्यते स कटाग्निः । अपराधिनोऽङ्गं तृणेनावेष्ट्य तदग्निना प्रज्वाल्य दाहयितव्य इत्यर्थः ।

† वधशब्देनात्र ताडनादिकं ग्राह्यम् । न पुनः प्राणवियोगरूपो व्यापारः ।

---

१. B. reads आरोपयेत् and C. आग्रापयेत् for आग्राहयेत्. २. C. reads पाञ्चमुखे वृत्ते for पान्थमुषो वृक्षे; B. C. read गले for गलं. ३. B. C. read तु for ते. ४. B. C. read उत्क्षपेकस्य संदेशः छेत्तव्यो राजपूरुषैः for उत्क्षेपकस्तु संदंशैर्भेत्तव्यो राजपूरुषैः ।.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

इति। अङ्गुलीः तर्जन्यङ्गुष्ठौ। अत एव नारदः—

'प्रथमे[1] ग्रन्थिभेदानां अङ्गुल्यङ्गुष्ठयोर्वधः‡।
द्वितीये चैव यच्छेषं तृतीये वधमर्हति'[2]॥
(ना. स्मृ. १८. ३२.)

इति। बन्दिग्राहीदानां दण्डमाह याज्ञवल्क्यः—

'बन्दिग्राहान् तथा वाजि-कुञ्जराणां च हारिणः।
प्रसह्य घातकांश्चैव[3] शूलानारोपयेन्नरः'*॥
(या. स्मृ. २. २७३.)

इति। अयमङ्गुलिच्छेदनादिप्राणान्तिको दण्ड उत्तमसाहसप्राप्तियोग्यद्रव्यविषयः।

---

‡ अङ्गुल्यङ्गुष्ठयोः वधः छेदनमित्यर्थः।

* बन्दिग्राहादीन् बलावष्टम्भेन घातकांश्च नरान् शूलानारोपयेत्। अयं च वधप्रकारोपदेशः—

'कोष्ठागारा-ऽयुधागार-देवतागारभेदकान्।
हस्त्यश्व-रथहर्तॄंश्च हन्यादेवाविचारयन्'॥
(म. स्मृ. ९.२८०.)

इति मनुवचनादेवेत्यवगन्तव्यम्। राजसम्बधि कोष्ठागार–आयुधागार–देवतागृहस्य बहुधनव्ययसाध्यस्य विनाशकान् हस्त्यश्व–रथस्य चापहर्तॄन् शीघ्रमेव हन्यात्। यत्तु—

'सङ्क्रम-ध्वजयष्टीनां प्रतिमानां च भेदकः।
प्रतिकुर्याच्च तत्सर्वं पञ्च दद्याच्छतानि च'॥ (म. स्मृ.९.२८५.)

इति मनुनैवोक्तं तत् सङ्क्रम–ध्वजचिह्न-मृदादिक्षुद्रप्रतिमाविनाशकविषयम्। तेन पञ्चशतपणान् राज्ञे दण्डं दत्वा विनाशितं सर्वं पुनर्नवं कर्तव्यमित्यर्थः।

---

१. C. reads प्रथमं for प्रथमे. २. The text of Nârada reads तज्ज्ञेयं दण्डः पूर्वस्तु साहसः. ३. B. reads घातिनः for घातकान्.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

'[1]वधः सर्वस्वहरणं पुरान्निर्वासनाङ्कने ।
तदङ्गच्छेद इत्युक्तः दण्ड उत्तमसाहसे ॥
(ना. स्मृ. १२. ३०.)

इति नारदस्मरणात् । क्षुद्र-मध्यमोत्तमद्रव्येषु प्रथम-मध्यमोत्तमसाहसरूपदण्डनियमो नारदेन दर्शितः ।

' साहसेषु य[2] एवास्ते त्रिषु दण्डो मनीषिभिः ।
स एव दण्डः स्तेयेऽपि द्रव्येषु त्रिष्वनुक्रमात्' ॥
(ना. स्मृ. १२. २८.)

इति । जात्यादिभेदेन [3]दण्डतारतम्यमाह मनुः –

' अष्टा[4]पाद्यं तु शूद्रस्य स्तेये भवति किल्बिषम् ।
षोडशैव तु वैश्यस्य द्वात्रिंशत् क्षत्रियस्य च ॥
ब्राह्मणस्य चतुःषष्टिः पूर्णं वाऽपि शतं भवेत् ।
द्विगुणा वा चतुःषष्टिस्तद्दोषगुणविद्धि सः ॥
(म. स्मृ. ३३७–३३८.)

धान्यं दशभ्यः कुम्भेभ्यो हरतोऽभ्यधि[6]कं वधः ।
शेषेऽप्येकादशगुणं दाप्यस्तस्य च तद्धनम् ॥
सुवर्णरजतादीनामुत्तमानां च वाससाम् ।
र[7]त्नानां चैव सर्वेषां शतादभ्य[8]धिकं वधः ॥

---

१. B. and C. substitute-

तदङ्गच्छेद इत्युक्तो दण्ड उत्तमसाहसे
for वधः सर्वस्वहरणं पुरान्निर्वासनाङ्कने ।
तदङ्गच्छेद इत्युक्तो दण्ड उत्तमसाहस इति ।.

२. B. C. read य एवोक्तः for य एवास्ते. ३. A. C. and D. omit दण्ड°. ४. B. reads अष्टापद्यं; while C. अष्टापायं for अष्टापाद्यं. ५. B. C. read. तज्ज्ञानगुणवोदिनः, for तद्दोषगुणविद्धि सः. ६. C. reads °भ्यधिको for °भ्यधिकं. ७. The text of Manu reads तथाधारिममेयानां for रत्नानां चैव सर्वेषां. ८. B. reads °भ्यधिके for °भ्यधिकं.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

पञ्चाशतस्त्वभ्यधिके हस्तच्छेदनमिष्यते ।
शेषे त्वेकादशगुणं मूल्याद्दण्डं प्रकल्पयेत् ॥
पुरुषाणां कुलीनानां नारीणां च विशेषतः ।
रत्नानां चैव मुख्यानां हरणे वधमर्हति' ॥
(म. स्मृ. ८. ३२०–३२३.)

इति । यस्मिन्नपहारे यो दण्ड उक्तः स शूद्रकर्तृकेऽष्टगुणः, वैश्यकर्तृके षोडशगुणः, क्षत्रियकर्तृके द्वात्रिंशद्गुणः, ब्राह्मणकर्तृके चतुःषष्टिगुणः शतगुणो वा अष्टाविंशत्युत्तरशतगुणो वा । शेषेषु स्वल्पमूल्येषु मूल्यादेकादशगुणं दण्डं कल्पयेत् । क्षुद्रद्रव्याणां ापात् न्यूनमूल्यानां मूल्यात् पञ्चगुणो दण्डः । तथा च नारदः—

'काष्ठभाण्डतृणादीनां मृण्मयानां तथैव च ।
वेणु-वैणवभाण्डानां तथा स्नाय्वस्थि-चर्मणाम् ॥
[4]शाकानामार्द्रमूलानां हरणे फल-मूलयोः ।
गोरसेक्षुविकाराणां तथा लवण-तैलयोः ॥
पक्वान्नानां कृतान्नानां मत्स्यानामामिषस्य च ।
सर्वेषामल्पमूल्यानां मूल्यात् पञ्चगुणो दमः' ॥
(ना. स्मृ. १८. २२–२४.)

इति । यत्पुनर्मनुनोक्तम्—

---

१. B. and C. add तस्मिन् before ऽष्टगुणः and add आपाद्नीयः after अष्टगुणः. २. B. C. read °अल्प° for स्वल्प°. ३. The text of Nârada reads वैणसस्य for तथा स्नायु°. ४. The text of Nârada reads शाक हरित for शाकानामार्द्र°. ५. The text of Nârada reads मद्यानाम् for मत्स्यानाम्. ६. A B. C. and D. read एव मूलानां for अल्पमूल्यानां. ७. B. C. read °कल्यानां for °मूल्यानां.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

'सूत्र-कार्पास-किण्वानां गोमयस्य गुडस्य च ।
दध्नः क्षीरस्य तक्रस्य[1] पानीयस्य तृणस्य च ॥
वेणु-वैणव[2]भाण्डानां लवणानां तथैव च ।
मृन्मयानां च हरणे मृदो भस्मन एव च ॥
अजानां पक्षिणां चैव तैलस्य च घृतस्य च ।
मांसस्य मधुनश्चैव यच्चान्यत् पशुसम्भवम् ॥
अन्येषां चैवमादीनां मद्यानाम्[4]ओदनस्य च ।
पक्वान्नानां च सर्वेषां तन्मूल्याद्द्विगुणो दमः' ॥

(म. स्मृ. ८. ३२६–३२९.)

इति तदल्पप्रयोजनविषयम् । स्वल्प[5]प्रयोजनद्रव्यापहारे[6] पान्थादीनां न दण्ड इत्याह मनुः—

'द्विजोऽध्वगः क्षीणवृत्तिः द्वाविक्षू द्वे च मूलके ।
आददानः परक्षेत्रान्न दण्डं[7] दातुमर्हति ॥

(म. स्मृ. ८. ३४१.)

चणक-व्रीहि-गोधूम-यवानां मुद्ग-माषयोः ।
अनिषिद्धैर्ग्रहीतव्यो[8] मुष्टिरेका पथि स्थितैः ॥
तथैव सप्तमे भक्ते भक्तानि षडनश्नता ।
अश्वस्तनविधानेन हर्तव्यं हीनकर्मणः' ॥

इति । महापराधेऽपि ब्राह्मणस्य न वधदण्ड इत्याह याज्ञवल्क्यः—

१. B. originally reads भक्तस्य and in margin तक्रस्य. २. The text of Manu reads °वैदल° for °वैणव°. ३. B. originally reads मत्स्यानां; also the text of Manu reads मत्स्यानां. ४. B. reads आद्यानां for मद्यानां. ५. B. C. read अल्प° for स्वल्प°. ६. B. C. read अपहारे द्विजादीनां and अपहारे खाण्डवा (षाण्डवा) दीनां for अपहारे पान्थादीनां. ७. A. C. and D. read देयं for दण्डं. ८. D. reads ग्रहीतव्या for ग्रहीतव्यो.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

'सचिह्नं ब्राह्मणं कृत्वा स्वराष्ट्राद्विप्रवासयेत् ।
महापराधिनमपि ब्राह्मणं नैव घातयेत्'* ॥

(या. स्मृ. २. २७१.)

इति । अपि तु ललाटे चिह्नं कृत्वा[1] स्वदेशान्निर्वासयेत्[2] । तथा च मनुः—

'गुरुतल्पे भगः कार्यः सुरापाने सुराध्वजः ।
स्तेये च श्वपदं[3] कार्यं ब्रह्महण्यशिराः[4] पुमान्'† ॥

(म. स्मृ. ९. २३७.)

इति । एतच्चाङ्कनादि प्रायश्चित्तमकुर्वतां दण्डोत्तरकालम् न तु प्रायश्चित्तं चिकीर्षताम् । तथा च मनुः—

---

* इदमुत्तरार्धं मुद्रितयाज्ञवल्क्यस्मृतिपुस्तकेषु नोपलभ्यते । मत्सङ्गृहीतताडपत्रविलिखितपुस्तके तु वर्तते एव । व्याख्यातं चैतत् विज्ञानेश्वरेण। तस्य नासंमतामिति प्रतिभाति। [मुद्रितमिताक्षरायां पुनर्नोपलभ्यते. R.G.B.].

† नाङ्क्या राज्ञा ललाटे स्युः (म. स्मृ. ९.२४०) इति वक्ष्यमाणत्वात् ललाटमेवाङ्कनस्थानमवगम्यते । तत्र गुरुपत्नीगमने यावज्जीवस्थायि तप्तलोहेन ललाटे भगाकृतिं गुरुपत्नीगमनचिह्नं कार्यम् । एवं सुरापाने कृते पातुर्दीर्घं सुराध्वजाकारं, सुवर्णापहारे सति अपहर्तुः कुक्कुरपादरूपं चिह्नं कार्यम् । ब्रह्महणि अशिराः शिरोरहित एव पुमान् कार्यः इति भावः।

---

१. B. and C. read अङ्कयित्वा for चिह्नं कृत्वा. २. B. reads निष्कामयेत् and C. निष्कासयेत. ३. C. reads श्वयवं for श्वपदं. ४. C. reads ब्राह्मणस्य शिराः, while D. ब्रह्मघ्नस्याशिराः for ब्रह्महण्यशिराः.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

'प्रायश्चित्तं तु कुर्वाणाः सर्वे वर्णा यथोदितम् ।
नाङ्क्या राज्ञा ललाटे स्युः दाप्यास्तूत्तमसाहसम्' ॥
(म. स्मृ. ९. २४०.)

इति । भक्तावकाशादिदानेन चोरोपकारिणं प्रत्याह याज्ञवल्क्यः—

'भक्ता-ऽवकाशा-ऽग्न्युदक-शस्त्रोपकरणं-व्ययान् ।
दत्वा चौरस्य वा हन्तुर्जानतो दम उत्तमः' ॥
(या. स्मृ. २. २७६.)

इति । कात्यायनोऽपि—

'चोराणां भक्तदा ये स्युस्तथाऽग्न्युदकदायकाः ।
क्रेतारश्चैव भाण्डानां प्रतिग्राहिण एव च ॥
समदण्डाः स्मृता ह्येते ये च प्रच्छादयन्ति तान्' * ।

*अन्नदानादिना चोराणां पोषकाः, तेषां मृतानामग्न्युदकदानादिकर्तारः, तैश्चौर्येणानीतभाण्डानां वस्तूनां क्रेतारः, तेभ्यः प्रतिग्रहगृहीतारः, ये च चोरान् छादयन्ति एते सर्वे समानदण्डाः । चौर्यरूपापराधे साहित्यकारित्वात् समान एव एषामपराधः ।

१. D. reads—
प्रायश्चित्तमकुर्वाणाः पूर्वे वर्णा यथोदितम् ।
अङ्क्या राज्ञा ललाटे तु दाप्याश्चोत्तमसाहसम् ।
for प्रायश्चित्तं तु कुर्वाणाः सर्वे वर्णा यथोदितम् ।
नाङ्क्या राज्ञा ललाटे स्युर्दाप्यास्तूत्तमसाहसम् ।.

२. B. reads अशनावकाशदानेन for भक्ता-ऽवकाशादिदानेन. ३. B. C. add अचोरं after चोरोपकारिणं. ४. C. reads °करणं व्ययात् for °करणव्ययान्. ५. B. C. and D. read चोरस्य ददतो for दत्वा चौरस्य वा. ६. D. reads ज्ञानतो for जानतो. ७. B. C. read तथाप्युदक° for तथाग्न्युदक°. ८. B. reads भेत्तारश्चैव and C. छेत्तारः तथ. for क्रेतारश्चैव. ९. D. reads प्रतिग्रहणम् for प्रतिग्राहिणः.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

इति । चोरोपेक्षिणं प्रत्याह नारदः—

'शक्ताश्च य उपेक्षन्ते तेऽपि तद्दोषभागिनः ।
उत्क्रोशतां जनानां तु ह्रियमाणे धने तथा ॥
श्रुत्वा ये नाभिधावन्ति तेऽपि तद्दोषभागिनः'† ।

(ना. स्मृ. १२. २६–२७.)

इति । चोरादर्शने द्रव्यप्राप्त्युपायमाह याज्ञवल्क्यः—

'घातितेऽपहृते दोषो ग्रामभर्तुरनिर्गते ।
विवीतभर्तुस्तु पथि चोरोद्धर्तुरवीतके ॥
स्वसीम्नि दद्याद्ग्रामस्तु पदं वा यत्र गच्छति ।
पञ्चग्रामी बहिः क्रोशाद्दशग्राम्यथ वा पुनः' ॥

(या. स्मृ. २. २७१–२७२.)

इति । अयमर्थः । यदा ग्राममध्येऽपि वधो द्रव्यहरणं वा जायते तदा ग्रामपतेरेव चोरोपेक्षा दोषः । तत्परिहारार्थं ग्रामपतिरेव चोरं गृहीत्वा राज्ञे समर्पयेत् । तदशक्तौ धनिने हृतं दद्यात् । यदि स्वग्रामाच्चोरपदं निर्गतं न दर्शयति । दर्शने तु तत्पदं यत्र प्रविशति तद्विषयाधिपतिरेव चोरं धनं चार्पयेत् । तथा च नारदः—

† अयं च दोषः शक्तौ सत्यामुपेक्षण एव । नाशक्तस्य दोषः ।

१. B. reads चोरोपेक्षकं, C. चोरापेक्षणं for चोरोपेक्षिणं. २. C. reads तद्दाय° for तद्दोष°. ३. B. originally reads पातिते and C. पतिते. ४. C. reads निवीत° for विवीत°. ५. C. reads वामस्तु for ग्रामस्तु. ६. C. reads यन्न for यत्र. ७. D. reads °ग्रामो for °ग्रामी. ८. B. originally and C. read °कृष्टा for °क्रोशात्. ९. B. C. read प्राणिवधो धनापहरणं for ऽपि वधो द्रव्यापहरणं. १०. C. reads चोरापेक्षा° for चोरोपेक्षा°. ११. B. C. add धनं after हृतं. १२. C. reads च दर्शयति for न दर्शयति. १३. B. and C. read दर्शिते for दर्शने. १४. B. C. read वार्पयेत् for चार्पयेत्.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

'गोचरे यस्य मुष्येत तेन चौरः प्रयत्नतः।
ग्राह्यो दाप्योऽथ वा द्रव्यं पदं यदि न निर्गतम्॥
निर्गतं पुनरेतस्मान्न चेदन्यत्र याति तत्।
सामन्तान्मार्गपालांश्च दिक्पालांश्चैव दापयेत्'॥
(ना. स्मृ. १८. १६–१७.)

इति। विवीते§ त्वपहारे विवीतस्वामिन एव दोषः। यदा त्वध्वन्येव तद् हृतं भवति अविवीतके वा विवीतादन्यक्षेत्रे तदा चोरोद्धर्तुर्मार्गपालस्य दिक्पालस्य चापराधः। यदा पुनर्ग्रामाद्बहिः सीमान्तपर्यन्ते क्षेत्रे दोषो जायते तदा तद्ग्रामवासिन एव दद्युर्यदि सीम्नो बहिश्चोरपदं न निर्गतम्। निर्गते पुनर्यत्र तत् प्रविशति स एव ग्रामश्चोरार्पणादिकं कुर्यात्। यदा त्वनेकग्राममध्ये क्रोशमात्राद्बहिः प्रदेशे मोषादिकं जायते चोरपदं च जनसम्मर्दाद्भग्नं तदा पञ्चग्रामी दशग्रामी वा दद्यात्। विकल्पस्तु प्रत्यासत्त्याद्यपेक्षया व्यवस्थितः। यदा दापयितुमशक्तो राजा तदा स्वयं दद्यात्। तथा च गौतमः–

§ विवीतं कुड्यादिना कण्टकादिना चतुर्दिक्षु संवृतः प्रदेशः। तद्विरुद्धोऽविवीतः।

१. B. reads मुष्येत्तु for मुष्येत. २. Text of Narada reads मृग्यो for ग्राह्यो. ३. The text of Narada reads मोषं for द्रव्यं. ४. B. and text of Narada read निर्गते for निर्गतं. ५. The text of Narada reads तु यदा यस्मिन्नष्टेऽन्यत्र न पातयेत् for पुनरेतस्मान्न चेदन्यत्र याति तत्. ६. B. in margin and C. read निवीते for विवीते. ७. B. in margin and C. read निवीता° for विवीता°. ८. B. and C. substitute वा for चा. ९. B. originally reads मोषो, while in margin, and C. reads मोक्षो for दोषो. १०. B. C. omit पुनः. ११. C. reads चोरापणादिकां for चोरार्पणादिकं. १२. B. C. read दोषादिकं for मोषादिकं.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

'चोरहृतमवजित्य यथास्थानं गमयेत् । स्वकोशाद्वा दद्यात्' ।

इति । स्तेयसंदेहे निर्णयोपायमाह वृद्धमनुः—

'यदि तस्मिन् दाप्यमाने भवेन्मोषे तु संशयः ।
मुषितः शपथं दाप्यो बन्धुभिर्वाऽपि साधयेत्' ॥

इति । चोरवधप्रकारविशेषमाह नारदः—

'यांस्तत्र चोरान् गृह्णीयात्तान् विताड्याभिबन्ध्य च ।
अवकृष्य च सर्वत्र हन्याच्चित्रवधेन† तु ॥

इति ।

(ना. स्मृ. १२. ३३.)

॥ इति स्तेयप्रकरणम् ॥

अथ साहसम् । तत्स्वरूपं नारदेनोक्तम्—

'सहसा क्रियते कर्म यत्किञ्चिद्बलदर्पितैः ।
तत्साहसमिति प्रोक्तं सहो बलमिहोच्यते' ॥

(ना. स्मृ. १४. १.)

इति । ननु साहसं चौर्य-वाग्दण्डपारुष्य-स्त्रीसंग्रहणेभ्यो न व्यतिरिच्यते । तेषां तदवान्तरविशेषत्वात् । तथा च बृहस्पतिः—

---

† चित्रवधेन विविधप्रकारेण वधोपायेन । ते च वधप्रकाराः पूर्वं पृ इत्यत्र दर्शिताः ।

---

१. C. reads यथाख्यातं, B. यथास्थाने for यथास्थानं. २. B. reads नयेत् and C. अपि नृपः° for गमयेत्. ३. A. omits स्तेय°. ४. B. and C. read विताड्य विबन्ध्य for विताड्याभिबन्ध्य च. ५. B. and C. read अवघुष्य for अवकृष्य. ६. C. reads न तु for ननु.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

'मनुष्यमारणं चौर्यं परदाराभिमर्शनम् ।
पारुष्यमुभयं चैव साहसं तु चतुर्विधम्' ॥

इति । तत्[1] कथं पृथगस्य व्यवहारपदता? । सत्यम् । तथापि बलदर्पावष्टम्भोपाधितस्तेभ्यो भिद्यते इति दण्डातिरेकार्थं पृथगभिधानम् । मनुष्यमारणरूपस्य साहसस्य तेभ्योऽतिरेकात् तदर्थं वा पृथगभिधानम् । तस्य च त्रैविध्यमाह नारदः—

'तत्पुनस्त्रिविधं ज्ञेयं प्रथमं मध्यमं तथा ।
उत्तमं चेति शास्त्रेषु तस्योक्तं लक्षणं पृथक् ॥
फल-मूलोदकादीनां क्षेत्रोपकरणस्य च ।
भङ्गाक्षेपावमर्दाद्यैः[2] प्रथमं साहसं स्मृतम् ॥
वासः पश्वन्न-पानानां गृहोपकरणस्य च ।
एतेनैव प्रकारेण मध्यमं साहसं स्मृतम् ॥
व्यापादो विषशस्त्राद्यैः परदाराभिमर्शनम् ।
प्राणोपरोधि यच्चान्यदुक्तमुत्तमसाहसम्' ॥

(ना. स्मृ. १४. ३–६.)

इति । त्रिविधेऽपि साहसे दण्डमाह स एव—

'तस्य दण्डः क्रियापेक्षः प्रथमस्य शतावरः ।
मध्यमस्य तु शास्त्रज्ञैर्दृष्टः पञ्चशतावरः ॥
उत्तमे साहसे दण्डः सहस्रावर इष्यते ।
वधः सर्वस्वहरणं पुरान्निर्वासनाङ्कने ॥
तदङ्गच्छेद इत्युक्तो दण्ड उत्तम साहसे' ।

(ना. स्मृ. १४. ७–९.)

---

१. B. C. read अथ for तत्. २. B. C. read °क्षेपोपमर्दाद्यैः for °क्षेपावमर्दाद्यैः.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

इति । परद्रव्यापहरणरूपे[*] साहसे दण्डमाह याज्ञवल्क्यः—

'तन्मूल्याद्द्विगुणो[†] दण्डो निह्नवे तु[‡] चतुर्गुणः ॥
यः साहसं कारयति स दाप्यो द्विगुणं दमम् ।
यश्चैवमुक्त्वाहं दाता कारयेत्स चतुर्गुणम्' ॥

(या. स्मृ. २. २३०–२३१.)

इति । साहसविशेषेषु[§] दण्डमाह याज्ञवल्क्यः—

'अर्घ्याक्रोशातिक्रमकृत्[1] भ्रातृभार्याप्रहारदः[2] ।
संदिष्टस्याप्रदाता च समुद्रगृहभेदकृत् ॥
सामन्तकुलिकादीनामपकारस्य[3] कारकः ।
पञ्चाशत्[4]पणिको दण्ड एषामिति विनिश्चयः ॥
स्वच्छन्दं[¶] विधवागामी विक्रुष्टे[5] नाभिधावकः ।
अकारणे च[6] विक्रोष्टा चण्डालश्चोत्तमान् स्पृशन्[**] ॥
शूद्र[††]प्रव्रजितानां च दैवे पित्र्ये च भोजकः ।
अयुक्तं शपथं कुर्वन्नयोग्यो योग्यकर्मकृत् ।
वृषक्षुद्रपशूनां च पुंस्त्वस्य प्रतिघातकृत् ।

---

*B. reads °पहार°. † A. reads द्विगुणं दण्डं for द्विगुणो दण्डो and चतुर्गुणं for चतुर्गुणः respectively. B. substitutes द्विगुणं for द्विगुणो. ‡ For तु B. reads च. § A. substitutes तु for °षु while B. reads only विशेष°. ¶ B. C. and D. read स्वच्छन्द°. ** A. reads स्पृशेत्, B. also the same but corrects as स्पृशन्. †† D. reads शूद्रः for शूद्र°.

१. B. originally reads अर्धाक्रोशाति° and in margin अर्घ्याक्षेपादि° for अर्घ्याक्रोशाति°. २. B. reads प्रहारकः, C. D. ऽपहारकः for °प्रहारदः. ३. C. reads अपहारस्य कारकः. while D. reads गणद्रव्यस्य हारकः. ४. D. reads °पणकः for पणिकः. ५. B. and C. read विक्रुष्टेनाभिधावकः for विक्रुष्टे and D. निकृष्टेनाभिधायकः ६. B. in margin reads न, and C. स for च.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

साधारणस्यापलापी दासीगर्भविनाश[१]कृत् ॥
पितृ[२]पुत्रस्वसृभ्रातृदम्पत्याचार्य[‡‡]र्त्विजा[३]म् ।
एषामपतितान्योन्यत्या[४]गी च शतदण्डभाक् ॥

(या. स्मृ. २. २३२-२३७.)

शस्त्रावपाते गर्भस्य पातने चोत्तमो दमः ।
उत्तमो वाऽधमो[५] वाऽपि पुरुषस्त्रीप्रमापणे ॥
विप्रदुष्टां स्त्रियं चैव पुरुष[६]घ्नीमगर्भिणीम् ।
सेतुभेदकरीं चाप्सु शिलां बद्ध्वा प्रवेशयेत् ॥
विषाग्नि[§§]दां पतिगुरुनिजापत्यप्रमापणीम् ।
विकर्णकरनासौष्ठीं कृत्वा गोभिः प्रमा[७]पयेत् ॥
क्षेत्रवेश्मवनग्रा[८]मविवीतखलदाहकाः ।
राजपत्न्यभिगामी च दग्धव्यास्तु कटाग्निना ॥

(या. स्मृ. २. २७७-२७९, २८२.)

इति । अविज्ञातकर्तृ[९]के साहसे साहसिकज्ञानोपायमाह बृहस्पतिः—

---

‡‡ A. and B. in margin read °शिष्यकाः.

§§ D. reads विषाग्निदग्पति° for विषाग्निदां पति°.

१. B. originally reads ° गर्भस्य पातने for °गर्भविनाशकृत २. A. reads पिता for पितृ°. ३. B. C. D. read शिष्यकाः for ऋत्विजाम् ४. C. reads योगीनां for त्यागी च. ५. B. originally reads मध्यमो, and in margin वाधमो. ६. B. C. read पुरुषस्त्री for पुरुषघ्नीं. ७. B. originally and C. read प्रवासयेत for प्रमापयेत. ८. C. reads निवीतवनदाहकः while D. निवेशनविदाहकाः for विवीतखलदाहकाः. ९. C. and D. read °कर्तृसाहासिके for °कर्तृके साहसे.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

'हतः[1] संदृश्यते यत्र घातकस्तु न दृश्यते ।
पूर्ववैरानुमानेन ज्ञातव्यः स महीभुजा ॥

[2]प्रतिवेश्यानुवेश्यौ च तस्य मित्रारिबान्धवाः ।
प्रष्टव्या राजपुरुषैः सामादिभिरुपक्रमैः ॥

विज्ञेयो[3]ऽसाधुसंसर्गाच्चिह्नाद्[4]दूढैश्च लक्षणैः ।
एषोदिता घातकानां तस्कराणां च भावना ' ॥

इति । याज्ञवल्क्योऽपि—

'अविज्ञातहतस्या[5]ऽपि कलहं सुतबान्धवाः ।
प्रष्टव्या[6] योषितश्चास्य परपुंसि रताः पृथक् ॥
[7]स्त्रीद्रव्यवृत्तिकामो वा केन[8] वायं गतः सह ।
[9]मृत्युदेशसमासन्नं पृच्छेद्वापि जनं शनैः' ॥

(या. स्मृ. २. २८०—२८१.)

इति । उक्तज्ञानोपायासंभवे तु[10] कात्यायनः—

'विना चिह्नैस्तु यत्कार्यं साहसाख्यं प्रवर्तते[11] ।
शपथैः[12] स विशोध्यः स्यात्सर्ववादे[13]ष्वयं विधिः' ॥

---

१. B. originally reads भतः but corrects त्रणः for हतः; C. also the same. २. B. and C. do not insert this *Verse*. ३. B. and C. read विज्ञेया for विज्ञेयो°. ४. B. originally reads चिह्नार्होछिनवातुरै and corrects चिह्नाहोहिणवारिभिः and C. चिह्नाह्नोहेनवारीभिः while D. चिह्नहोढेन मानवैः. ५. B. originally reads °हरस्यास्तु कलहं सूतबान्धवः but corrects °हतस्याशु कलहं सुतबान्धवाः, while C. reads बलहस्य तदाभृतः for कलहं सुतबान्धवाः. ६. C. reads नाततायिन्यवाधोपि परस्परप्रासिद्धता. ७. C. reads पृथगितां द्रव्यावर्त्तिकामो वा केन दायं गतः सतः. ८. B. reads चा°. ९. C. reads मृत्युपदेशे समागमनं पृच्छत्या पि जनं शतैः (both ७ and ८ seem incorrect). १०. B. and C. avoid तु. ११. C. reads साहसं संप्रवर्तते and D. साहसः संप्रवर्तते both for साहसाख्यं प्रवर्तते. १२. C. reads शपथः for शपथैः. १३. C. and D. read °बाधेषु for वादेषु.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

इति । साहसिकवधे विशेषमाह व्यासः—

'ज्ञात्वा तु घातकं सम्यक्ससहायं सबान्धवम् ।
हन्याच्चित्रवधोपायैरुद्वेजनकरैर्नृपः' ॥

इति । बृहस्पतिरपि—

'प्रकाशवधका ये तु तथा चोपांशुघातकाः ।
ज्ञात्वा सम्यग्धनं हृत्वा हन्तव्या विविधैर्वधैः' ॥

इति । एतद्ब्रह्मघ्नक्षत्रियादिविषयम् । तदाह बौधायनः—

'क्षत्रियादीनां ब्राह्मणवधे वधः सर्वस्वहरणं च । तेषामेव तुल्यापकृष्टवधे यथाबलमनुरूपं दण्डं प्रकल्पयेत्' ॥
(बौ. स्मृ. १. १०. १८. १९—२०.)

इति । बहूनामेकघातार्थे प्रवृत्तानां दोषानुरूपदण्डाभिधानार्थमाह कात्यायनः—

'एकं चेद्बहवो हन्युः संरब्धाः पुरुषं नराः ।
मर्मघाती तु यस्तेषां स घातक इति स्मृतः' ॥

इति । यो मर्मघातकः स एव वधानुरूपदण्डभाग्भवतीत्यर्थः । तथा च घातकव्यतिरिक्तानामपि दण्डस्तेनैवोक्तः ।

---

१. B. and C. read साहसिकं for साहसिकवधे. २. B. originally reads पातकं for घातकं. ३. A. reads उद्वेगजनकैः for उद्वेजनकरैः. ४. B. reads °वधकार्येषु and C. °बाधका ये तु for °वधका ये तु. ५. C. reads °दिना ब्राह्मणवधः. ६. C. reads तुल्यः प्रकृष्ट° for तुल्यापकृष्ट°. ७. C. reads °रूपं. ८. B. originally reads यथोक्तं दापयेदमं and omits स एव वधानुरूपदण्डभाक् भवति इत्यर्थः. ९. B. and C. read वधः परापदंडभाक्. १०. A. C. and D. omit च घातकव्यतिरिक्तानामपि दण्डस्तेनैवोक्तः; C. omits also तथा.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

आरम्भकृत्सहायश्च तथा धर्मानुदेशकः ।[1]

'आश्रयः शस्त्रदाता[2] च भक्तदाता[3] विकर्मिणाम्[4] ।

युद्धोपदेशकश्चैव[5] तद्विनाशप्रवर्तकः[6] ॥

उपेक्षाकारकश्चैव[7] दोषवक्तानुमोदकः ।

अनिषेद्धा क्षमो यः स्यात्सर्वे तत्[8] कार्यकारिणः ॥

यथाशक्त्यनुरूपं तु दण्डं तेषां प्रकल्पयेत्' ।

इति । अनुरूपं दोषानुरूपम् । मर्महन्तुर्दोषभागित्वं द्वयो-र्दर्शयति स एव—

'आरम्भकृत्सहायश्च दोषभाजौ तदर्धतः' ॥

इति । एवं मार्गानुदेशकानां[9] कालान्तरेऽपि दोषलाघवमू-ह्यम् । साहससदृशापराधेष्वपि[10] दण्डमाह याज्ञवल्क्यः—

'वसानस्त्रीन् पणान् दण्ड्यो नेजकस्तु पराशुकम् ।

विक्रयावक्रयाधानयाचितेषु पणान् दश' ॥

(या. स्मृ. २. २३८.)

इति । अवक्रयैः[11] एतावत्कालमुपभोगार्थं वस्त्रं दास्यामि त्वं

---

१. B.C.D. do not insert आरम्भकृत्सहायश्च तथा धर्मानुदेशकः. २.B. reads originally शास्त्र° and corrects शस्त्र°. ३. C. reads भक्ती° for भक्त°. ४. D. reads विकर्मणाम्. ५. C. reads शुद्धो° for युद्धो°. ६. B. originally reads दण्डादीनां प्रदर्शकः and corrects तद्विनाशप्रवर्तकः. ७. B. reads उपेक्षाकारी शक्तश्च and C. उपेक्षाकारी उक्तश्च. ८. C. reads सद्मेतत् for सर्वे तत्. ९. B. reads originally मर्मा° and corrects मार्गा° and reads देशकादेरपि omitting कालांतरे. C. also the same. १०. A. D. read °राधेपि. ११. D. omits अवक्रयः while C. reads अविक्रयः.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

मह्यमेतावद्धनं देहीति समयं कृत्वा वस्त्रप्रदानम् नेजकस्य नि[1]यमातिक्रमे दण्डप्राप्त्यर्थं नियममाह मनुः—

'शाल्म[2]लीफलके श्लक्ष्णे ने[3]निज्यात् नेजकः शनैः।
न च वासांसि वासोभिर्निर्हरेन्न च वासयेत्' ॥

(म. स्मृ. ८. ३९६.)

इति। प्रमादान्नाशने नारदः—

'[4]मूल्याष्टभागो हीये[5]त सकृद्धौतस्य वाससः।
द्विः [6]पादस्त्रिस्तृतीयांशश्चतुर्धौतेऽर्धमेव च ॥
अर्धक्षयात्तु[7] परतः पादांशापचयः क्रमात्।
[8]यावत्क्षीणदशं जीर्णं जीर्णस्यानियमः क्षयः' ॥

(ना. स्मृ. ९. ८–९.)

इति। अष्टपणक्रीतस्य[9] सकृद्धौतस्य वस्त्रस्य नाशने एकं[10]पण-न्यूनं मूल्यं देयम्। द्वि[11]र्धौतस्य पणं[12]द्वयोनं त्रिर्धौतस्य[13] त्रिपणोनं[14] चतुर्धौतस्य पणचतुष्टयम्। ततः परं प्रतिनिर्णेजनमवशिष्टं मूल्यं शि[15]ष्टपादपादापचयेन यावज्जीर्णं देयम्। जीर्णस्य नाशने

१. C. reads विषमातिक्रमे. २. C. and D. read शाल्मले. ३. B. originally and C. and D. read निज्याद्वासांसि नेजकः. ४. B. in correction and C. and D. read साध्या°. ५. D. reads दीयेत for हीयेत, while C. स्तेयेन for the same. ६. A. reads द्विः पादस्त्रिस्त्रिभागस्तु चतुःकृत्वोऽर्धमेव च and D. द्वितीयांशस्त्रितीयांशश्चतुर्थांशोऽर्धमेवच, while B. originally द्विपादःस्त्रितीयांश्चतुर्थांते तमेवच. ७. D. reads °न्नुपरमः. ८. C. reads कीर्णं तावत्स्यान्नियतक्षयः and D. reads the whole line यावत्तु क्षीणसंकीर्णं तावत्स्यान्नियतक्षयः।. ९. D. inserts तेन after अष्टपणक्रीतस्य. १०. D. reads °पणेन न्यूनं. ११. C. and D. द्विधौतस्य. १२. C. and D. पणद्वयेन. १३. C. and D. त्रिधौतस्य. १४. C. and D. त्रिपणेन. १५. C. and D. do not insert शिष्ट°.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

त्विच्छातो मूल्यदानं कल्पनीयमित्यर्थः । पितापुत्रविरोधे साक्ष्यादीनां दण्डमाह स एव—

'पितापुत्रविरोधे तु साक्षिणस्त्रिपणो दमः ।
अन्तरेण तयोर्यः स्यात्तस्याप्यष्टगुणो दमः' ॥

(या. स्मृ. २. २३९.)

इति । पितापुत्रयोः कलहे यः साक्ष्यमङ्गीकरोति न पुनः कलहं वारयति स पणत्रयं दण्ड्यः । यश्च तयोः सपणे विवादे पणदाने प्रतिभूर्भवति कलहं वा वर्धयति स तु त्रिपणादष्टगुणं चतुर्विंशतिपणं दण्डनीय इत्यर्थः । अन्येष्वपि तत्सदृशापराधेषु दण्डमाह स एव—

तुलाशासनमानानां कूटकृन्नाणकस्य च ।
एभिस्तु व्यवहर्ता यः स दाप्यो दममुत्तमम् ॥
अकूटं कूटकं ब्रूते कूटं यश्चाप्यकूटकम् ।
स नाणकपरीक्षी तु दाप्य उत्तमसाहसम् ॥
भिषङ् मिथ्या चरन् दण्ड्यस्तिर्यक्षु प्रथमं दमम् ।
मानुषे मध्यमं राजपुरुषेषूत्तमं दमम् ॥
अबध्यं यश्च बध्नाति बद्धं यश्च प्रमुञ्चति ।
अप्राप्तव्यवहारं च स दाप्यो दममुत्तमम् ॥

---

१. C. and D. read °दानकल्पनं for दानं कल्पनीय°. २. D. reads साक्षिणां, the text of याज्ञवल्क्य is the same but the plural is not taken by the commentators. ३. B. reads °पणान्. ४. A. substitutes च for तु. ५. B. reads योऽकूटं for अकूटं and C. यः कुटंकुटकम् for अकूटं कूटकम्. ६. B. and C. read नाणकानां परीक्षासु while C. adds तु after दाप्यः. ७. B. C. and D. read दाप्यः for दंड्यः. ८. B. C. and D. read °मानुषेषु for °पुरुषेषु. ९. D. reads बध्यं for बद्धं. १०. B. reads बध्यं.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

मानेन तुलया वाऽपि योंऽशमष्टमकं हरेत् ।
दण्डं स[1] दाप्यो द्विशतं वृद्धौ हानौ च कल्पितम् ॥
भेषज[2]स्नेहलवणगन्धधान्यगुडादिषु ।
पण्येषु प्रक्षिपन् हीनं पणान् दण्ड्य[3]स्तु षोडश ॥
मृच्चर्ममणिसूत्रायःकाष्ठवल्कलवाससाम् ।
अजातौ जातिकरणे विक्रयाष्टगुणो दमः ॥
समुद्रपरिवर्तं च सारभाण्डं च कृत्रिमम् ।
आधानं विक्रयं चा[4]ऽपि नयतो दण्डकल्पना ॥
[5]हीने पणे तु पञ्चाशत् पणे तु शतमुच्यते ।
द्वि[6]पणे द्विशतो दण्डो मूल्य[7]वृद्धौ तु वृद्धिमान् ॥
संभूय कुर्वतामर्घं सबाधं कारुशिल्पिनाम् ।
अर्घस्य ह्रासं वृद्धिं वा जान[8]तां दम उत्तमः ॥
संभूय वणिजा पण्यमनर्घे[9]णोपरुन्धताम् ।
विक्रीणतां च विहितो दण्ड उत्तमसाहसः ॥
राजनि स्थाप्यते योऽर्घः प्रत्यहं तेन विक्रयः ।
क्रयो वा निः[10]स्रवस्तस्माद्वणिजां लाभकृत् स्मृतः ॥
स्वदेशपण्ये तु शतं वणिग्गृह्णीत पञ्चकम् ।
दशकं पौर[11]देश्ये तु यः सद्यः क्रयविक्रयी ॥

---

१. C. substitutes च for स. २. B. reads भेषजं स्नेहलवणं. ३. A. B. and C. read दाप्यः for दण्ड्यः. ४. A. and C. substitute वा for च. ५. A. and text of याज्ञवल्क्य read भिन्ने; the commentator विज्ञानेश्वर explains भिन्ने न्यूने. ६. A. reads त्रिपणो for द्विपणे and B. द्विगुणे for the same. ७. B. reads मूल° for मूल्य while A. substitutes च for तु and C. reads बुद्धिमान् for वृद्धिमान्. ८. A. reads जानतो and C. जानता. ९. C. reads समाऽर्घेनोपसंध्यताम. १०. B. originally reads निन्हवः and C. विक्रयः for निःस्रवः. ११. D. reads परदेश्ये.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

पण्यस्योपरि संस्थाप्य व्ययं पण्यसमुद्भवम् ।
अर्घोऽनुग्रहकृत्कार्यः क्रेतुर्विक्रेतुरेव च[1] ॥
(या. स्मृ. २. २४०—२६३.)

इति । तुला तोलनदण्डः । प्रस्थादि परिमाणम् । नाणकं मुद्राचिह्नितं द्रम्म[2]निष्कादि । एतेषां कूटकृद्देशप्रसिद्धपरिमाणादन्यथाकृत्[3] । न्यूनत्वमाधिक्यं वा द्रम्मादे[4]र्व्यवहारिक[5]मुद्रितत्वं वा ताम्रादिगर्भत्वं वा करोति । यश्च त्रपुसीसा[6]दिरूपैस्तैर्व्यवहरति तावुभौ प्रत्येकमुत्तमसाहसं दण्डनीयौ । यः पुनर्नाणकपरीक्षकः सम्यगेवं कूटमिति ब्रूते असम्यग्वा सम्यगिति[7] सोऽप्युत्तमसाहसं दण्डनीयः । यः पुनर्वैद्यः आयुर्वेदानभिज्ञ एव जीवनार्थं चिकित्सा[8]ज्ञोऽहमिति तिर्यङ्मनुष्यराजपुरु[9]षेषु चिकित्सां करोति स यथाक्रमं प्रथममध्यमोत्तमसाहसं दण्डनीयः । [10]योऽप्यनपराधिनं राजाज्ञया विना बध्नाति बद्धं तया विना मुञ्चति व्यवहारार्थमाहूतं अनिर्वृत्तव्यवहारं चोत्सृजति सोऽपि उत्तमसाहसं दण्डनीयः । योऽपि वणिग्व्रीहिकार्पासादेः पण्यस्याष्टमांशं कूटमानेन कूटतुलया वाऽपहरति

---

१. B. originally reads क्रेतुरेव स एव च for क्रेतुर्विक्रेतुरेव च. २. B. and C. omit द्रम्म°. ३. C. and D. do not add. °कृत्. ४. B. and C. read रुक्मादे°. ५. C. reads व्यावहारिकमुद्रितत्वं वा ताम्रादिभगत्वं वा करोति. ६. B. reads यस्तैर्न्यूनैरेव कूटैस्तैर्वा व्यवहराति and gives in margin यश्च त्रपुसीसादिरूपैस्तैर्व्यवहराति while C. यस्तन्यूनंवेरकुटैस्तैर्व्यवहराति. ७. B. reads सम्यक्त्वंकूटकं while C. सः पंचकूटक. ८. B. and C. read चिकित्सित° for चिकित्सा°. ९. B. and C. read °मनुष्येषु for पुरुषेषु. १०. C. and D. omit the following योऽप्यनपराधिनं राजाज्ञया विना बध्नाति बद्धं तया विना मुंचति व्यवहारार्थमाहूतं अनिर्वृत्तव्यवहारं चोत्सृजाति सोऽपि उत्तमसाहसं दंडनीयः

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg

असौ पणानां द्विशतं दण्डनीयः। अपह्रियमाणद्रव्यस्य पुनर्वृद्धौ हानौ च दण्डस्याऽपि वृद्धिहानी कल्पनीये। भेषजमौषधद्रव्यम्। स्नेहो घृतादिः। गन्धद्रव्यमुशीरादि। एतेष्वसारद्रव्यं विक्रयार्थं मिश्रयतः षोडशपणो दण्डः। न विद्यते बहुमूल्या जातिर्यस्मिन् मृच्चर्मादिके तदजाति तस्मिन् जातिकरणे विक्रयार्थं गन्धवर्णरसान्तरसंचारणेन बहुमूल्यजातीयसादृश्यसंपादने विक्रेयस्यापादितसादृश्यस्य मृच्चर्मादेः पण्यस्याष्टगुणो दण्डः। समुद्रकस्य करण्डकादेः परिवर्तनं व्यत्यासः। योऽन्यदेव मुक्तानां पूर्णं करण्डकं दर्शयित्वा अन्यदेव स्फटिकानां पूर्णं हस्तलाघवात् समर्पयति यश्च सारभाण्डं कस्तूरिकादिकं कृत्रिमं कृत्वा विक्रयमाधिं वा नयति तस्यैवं दण्डकल्पना। कृत्रिमकस्तूरिकादेर्मूल्यभूते पणे हीने न्यूने न्यूनपणमूल्ये इति यावत्। तस्मिन् कृत्रिमे विक्रीते पञ्चाशत्पणो दण्डः। पणमूल्ये तु शतं द्विपणमूल्ये तु द्विशतो दण्डः। एवं मूल्यवृद्धौ दण्डवृद्धिरुन्नेया। राजनिरूपितार्घस्य ह्रासं वृद्धिं वाऽपि जानन्तो वणिजः मिलित्वा[1] कारुशिल्पिनां[2] कारूणां रजकादीनां शिल्पिनां चित्रकारादीनां पीडाकरं अर्घान्तरं लाभलोभात्कुर्वन्तः पणसहस्रं दण्डनीयाः। ये पुनर्देशान्तरादागतं पण्यं हीनमूल्येन प्रार्थयमाना उपरुन्धन्ति महार्घेण वा विक्रीणते[3] तेषामुत्तमसाहसो दण्डः।

---

१. C. and D. omit मिलित्वा. २. B. and C. do not insert कारुशिल्पिनां. ३. A. and D. read विक्रीणीते for विक्रीणते.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

राजनि संनिहितेऽपि सति यस्तेनार्घो निरूप्यते तेनार्घेण क्रयो वा विक्रयो वा कार्यः। निःस्रवः निर्गतः स्रवः अवशेषः। तस्माद्राजनिरूपितादर्घात् यो निःस्रवः स एव वणिजां लाभकारी न पुनः स्वच्छन्दपरिकल्पितादर्घात्। अर्घकरणे विशेषमाह मनुः—

> 'पञ्चरात्रे[1] पञ्चरात्रे पक्षे पक्षेऽथवा गते।
> कुर्वीत चैषां प्रत्यक्षमर्घसंस्थापनं नृपः' ॥
>
> (म. स्मृ. ८. ४०२.)

इति। स्वदेशपण्ये शतपणमूल्ये पञ्चकं लाभार्थं गृह्णीयात्। पारदेश्ये[2] तु दशपणं[3] लाभं गृह्णीयात् यस्य पण्यग्रहणदिवस एव विक्रयः। यः पुनः कालान्तरे विक्रीणीते तस्य कालोत्कर्षवशाल्लाभोत्कर्षः कल्प्यः। देशान्तरादागते पण्ये देशान्तरगमनप्रत्यागमनभाण्डग्रहणशुल्कादिस्थानेषु प्रयुक्तमर्थं परिगणय्य पण्यमूल्येन सह मेलयित्वा यथा शतपणमूल्ये दशपणो लाभः संपद्यते तथा क्रेतृविक्रेत्रोरनुग्रहकार्यर्घो राज्ञा स्थापनीयः।

इति साहसप्रकरणम् ॥

---

१. B. reads पंचपक्षे पंचमासे तथा गते. A. and C. read सप्तरात्रे पक्षे मासे तथा गते. and D. सप्तरात्रे पक्षे मासे तथा गते. २. B. and D. read परदेश्ये. ३. B. reads दशपणान् and C. शतपणं.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg

अथ स्त्रीसंग्रहणम्.

तस्य त्रैविध्यमाह बृहस्पतिः—

‘पापमूलं संग्रहणं त्रिप्रकारं निबोधत[1] ।
बलोपाधिकृते[2] द्वे तु तृतीयमनुरागजम् ॥
अनिच्छया[3] त्वपकृतं मत्तोन्मत्तकृतं तथा ।
प्रलये यत्तु रहसि बलात्कारकृतं तु तत् ॥
छद्मना गृहमानीय दत्त्वा वा मदकारणम् ।
संयोगः क्रियते यत्तु तदुपाधिकृतं[4] विदुः ॥
अन्योन्यमनुरागेण[5] दूतसंप्रेषणेन वा ।
कृतं रूपार्थलोभेन[6] ज्ञेयं तदनुरागजम्’ ॥

इति । पुनरपि त्रैविध्यमाह स एव—

‘तत्पुनस्त्रिविधं प्रोक्तं प्रथमं मध्यमोत्तमम् ।
अपाङ्गप्रेक्षणं[7] हास्यं दूतसंप्रेषणं तथा ।
स्पर्शो[8] भूषणं वस्त्राणां प्रथमः संग्रहः स्मृतः ॥
प्रेषणं गन्धमाल्यानां धूपमध्वान्न[9]वाससाम् ।

---

१. C. reads °मिवोच्यते for निबोधत. २. C. reads बलोपधि°. B. originally बलोपाधि but corrects बलोपधि. ३. B. originally reads अनिच्छन्त्या यत्क्रियते मत्तोन्मत्तप्रमत्तया । प्रलपन्त्या तु रहसि बलात्कारं तु तस्य तत् । but corrects अनिच्छया त्वपकृते मत्तोन्मत्तप्रमत्तया । प्रलपंत्यां तु रहसि बलात्कारकृतं तु यत् while C. reads अनिाच्छया पापकृते मत्तोन्मत्तप्रमत्तया । प्रलपंत्या तु रहसि बलात्कारकृतं तु यत् ।. ४. C. reads त्ततुपाधि°. ५. B. originally reads अन्योन्यचसुरागेण and corrects अन्योन्यचक्षुरागेण. C. also substitutes अन्योन्यचक्षुरागेण and reads हुत° for दूत. ६. B. originally reads भूपार्थ° and corrects रूपार्थ°. ७. B. originally reads प्रेषणं and substitutes तदा for तथा. ८. C. reads संस्पर्शो भूषणस्त्रीणां and D. स्पर्शश्च भूषणं स्त्रीणां and substitutes प्रथमं for प्रथमः. ९. D. reads °भूषण° for मध्वान्न.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

संभाषणं रहसि च मध्यमं संग्रहं विदुः ॥
एकशय्यासनं[1] क्रीडा चुम्बनालिङ्गनं तथा ।
एतत्संग्रहणं प्रोक्तमुत्तमं शास्त्रवेदिभिः' ॥

इति । योषित्संग्रहणज्ञानोपायमाह याज्ञवल्क्यः—

'पुमान् संग्रहणे ग्राह्यः केशाकेशि परस्त्रिया[2] ।
सद्यो वा कामजैश्चिह्नैः प्रतिपत्तौ[3] द्वयोस्तथा[4] ॥
नीवीस्तनप्रावरणसक्थिकेशावमर्शनम्[5] ।
अदेशकालसंभाषा[6] सहैकस्थानमेव[7] च' ॥

(या. स्मृ. २. २८३–२८४.)

इति । स्त्रीपुंसयोर्मिथुनीभावः संग्रहणम् । तत्र प्रवृत्तः परभार्यया सह केशाकेशिक्रीडनेन सद्य अभिनवैः[8] कामजैः कररुहदशनादिकृतव्रणलिङ्गैः द्वयोः संप्रतिपत्या वा ग्राह्यः । योऽपि परदारपरिधानग्रन्थिप्रदेश[9]–कुचप्रावरण–जघन–शिरोरुहादिस्पर्शनं साभिलाष इव[10] करोति निर्जनदेशे जनाकीर्णेऽप्यन्धकाराकुले अकाले संलापं करोति परभार्यया सहैकत्र मञ्चकादौ तिष्ठति सोऽपि ग्राह्यः । मनुरपि—

'स्त्रियं स्पृशेददेशे यः स्पृष्टो वा मर्षयेत्तया[11] ।
परस्परस्यानुमते सर्वं संग्रहणं स्मृतम् ॥

(म. स्मृ. ८. ३५८.)

१. B. reads °शन for °सनं. २. A. B. C. read °स्त्रियाः. ३. B. and C. read प्रतिपत्तेः. ४. C. reads तयोः for तथा. ९. D. reads °मर्षणम् for °मर्श. ६. A. reads °संभाषं for संभाषा. ७. A. reads सहैकासनं for सहैकस्थान°. ८. B. reads साभिनयैः. ९. C. reads °विप्रदेश° for ग्रंथिप्रदेश. १०. C. substitutes च for इव. ११. B. C. and D. read तथा for तया.

tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg

दर्पाद्वा यदि वा मोहाच्छ्लाघया वा स्वयं वदेत्।
पूर्वं मयेयं भुक्तेति तच्च संग्रहणं स्मृतम्' ॥

इति। तत्र दण्डमाह याज्ञवल्क्यः—

'सजातावुत्तमो दण्ड आनुलोम्ये तु मध्यमः।
प्रातिलोम्ये वधः पुंसो नार्याः कर्णादिकर्तनम्' ॥
(या. स्मृ. २. २८६.)

इति। चतुर्णामपि वर्णानां बलात्कारेण सजातीयगुप्तपरभार्यागमने साशीतिपणसहस्रो दण्डः। यदा त्वानुलोम्येन हीनवर्णगुप्तपरभार्यागमनं तदा मध्यमसाहसो दण्डः। यदा पुनः सवर्णामगुप्तामानुलोम्येन गुप्तां वा व्रजति तदा मनुना विशेष उक्तः—

'सहस्रं ब्राह्मणो दण्ड्यो गुप्तां विप्रां बलाद्व्रजन्।
शतानि पञ्च दण्ड्यः स्यादिच्छन्त्या सह संगतः ॥
सहस्रं ब्राह्मणो दण्डं दाप्यो गुप्ते तु ते व्रजन्।
शूद्रायां क्षत्रियविशोः सहस्रं तु भवेद्दमः' ॥
(म. स्मृ. ८. ३७८, ३८३.)

इति। एतद्गुरुसखिभार्यादिव्यतिरिक्तविषयम्। तत्र दण्डान्तरविधानात्। तदाह नारदः—

---

१. This verse here quoted as मनु's does not appear in any text of मनु but it can be seen in नारद, *vide* (१२, ६१) J. Jolly's edition. २. D. reads लाघवाद्वा. ३. A. reads मयेयं भुक्तपूर्वेति. ४. B. originally reads अजाता° and corrects स्वजाता°, while C. and D. स्वजाता°. ५. C. and D. read आनुलोम्येषु for आनुलोम्ये तु. ६. B. originally inserts but in correction omits गुप्त°, C. also omits. ७. D. reads °सहस्रं for °सहस्रो. ८. A. reads° साहस्रो वै.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant 2 Equipment Heritage Foundation, Jalga

'माता मातृष्वसा श्वश्रूर्मातुलानी पितृष्वसा।
पितृव्यसखिशिष्यस्त्री भगिनी तत्सखी स्नुषा ॥
दुहिताऽचार्यभार्या च सगोत्रा शरणागता।
राज्ञी प्रव्रजिता धात्री साध्वी वर्णोत्तमा च या ॥
आसामन्यतमां गच्छेन्[1] गुरुतल्पग उच्यते।
शिश्नस्योत्कर्तनं तस्य[2] नान्यो दण्डो विधीयते' ॥

(ना. स्मृ. १२. ७३–७५.)

इति। प्रातिलोम्येन उत्कृष्टस्त्रीगमने क्षत्रियादेर्वधः। एतद्गुप्ताविषयम्। अन्यत्र धनदण्डः। तथा च मनुः—

'उभावपि तु[3] तावेव ब्राह्मण्या गुप्तया सह।
विप्लुतौ[4] शूद्रवद्दण्ड्यौ दग्धव्यौ वा कटाग्निना ॥
ब्राह्मणीं यद्यगुप्तां तु गच्छेतां[5] वैश्यपार्थिवौ।
वैश्यं पञ्चशतं कुर्यात् क्षत्रियं तु सहस्रिणम्' ॥

(म. स्मृ. ८. ३७७, ३७६.)

इति। शूद्रस्यागुप्तोत्कृष्टस्त्रीगमने लिङ्गच्छेदनसर्वस्वहरणे गुप्ता[6]गमने तु वधसर्वस्वापहारौ। तथा च स एव—

---

१. A. reads गत्वा. २. C. D. read तत्र for तस्य. ३. B. C. and D. substitute हि for तु. ४. B. C. read विप्लवे. ५. B. reads सेवेते and C. सेवेताम् for गच्छेताम् while D. reads सेवेतान्यः पुमान्यदि for गच्छेताम् वैश्यपार्थिवौ, but it does not give any proper sense. ६. D. reads गुप्त°. for गुप्ता°.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg

'शूद्रो गुप्तमगुप्तं वा द्वैजातं वर्णमावसन्[1] ।
अगुप्तैकाङ्गसर्वस्वी गुप्तं सर्वेण हीयते'[2] ॥
(म. स्मृ. ८. ३७४.)

इति । अत्रैव विषये बृहस्पतिरपि—

'सहसा कामयेद्यस्तु धनं तस्याखिलं हरेत् ।
उत्कृत्य लिङ्गवृषणौ भ्रामयेद्गर्दभेन तु' ॥

इति । शूद्रस्येत्यनुवृत्तौ गौतमः—

'आर्यस्त्र्यभिगमने[3] लिङ्गोद्धारः सर्वस्वहरणं च'[4] ।
(गौ. स्मृ. १२. ३.)

इति । नार्याः पुनर्हीनवर्णगमने[5] नासादिकर्तनम् । अयं वधाद्युपदेशो राज्ञः तस्यैव पालनाधिकारात् न द्विजातिमात्रस्य ।

'ब्राह्मणः परीक्षार्थमपि शस्त्रं नाददीत'* ।
(आ. ध. सू. १. १०. २९. ६.)

---

१. B. originally reads °माप्नुयात् but corrects मावसन्. २. B. reads अगुप्तैकांगसर्वस्वे गुप्तौ and gives in margin अगुप्तमंगसर्वस्वैर्गुप्तं, while C. reads अगुप्तेकांगसर्वस्वं गुप्तौ, and D. substitutes only गुप्तौ for गुप्तं. ३. B. reads °स्त्रियोभि° and C. D. °स्त्रियाभि°. ४. B. and C. read लिङ्गोद्धारसर्वस्व° and all except A. omit च. ५. B. originally reads °महणे.

* The commentator माधवाचार्य does not say from what text he has quoted this "Sûtra" but मेधातिथि in his commentary on मनुस्मृति says this "Sûtra" is quoted from the text of आपस्तंब. (See मनुस्मृति VIII. 348 Commentary). It appears in आपस्तंबधर्मसूत्र but the reading there is quite different परीक्षार्थोऽपि ब्राह्मण आयुधं नाददीत. मेधातिथि—reads न ब्राह्मणः परीक्षार्थमपि शस्त्रमाददीत. The meaning, however, of these different readings is the same.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

इति शस्त्रग्रहणस्य निषेधात्। यदा तु राज्ञो निवेदने कालोतिपातशङ्का[1] तदा द्विजातिमात्रस्याऽपि वधाधिकारोऽस्त्येव—

'शस्त्रं द्विजातिभिर्ग्राह्यं धर्मो यत्रोपरुध्यते।
नाततायिवधे दोषो हन्तुर्भवति कश्चन'।
प्रकाशं वाऽप्रकाशं वा मन्युस्तं मन्युमृच्छति'॥
(म. स्मृ. ८. ३४८,३५१.)

इति। शस्त्रग्रहणाभ्य[2]नुज्ञानात्। क्षत्रियवैश्ययोरन्योन्यस्यै[3]भिगमने यथाक्रमं सहस्रपञ्चशतपणा[4]त्मकौ दण्डौ। तदाह मनुः—

'वैश्यं[5]श्चेत्क्षत्रियां गुप्तां वैश्यां वा क्षत्रियो व्रजेत्।
यो ब्राह्मण्यामगुप्तायां तावुभौ दण्डमर्हतः'॥
(म. स्मृ. ८. ३८२.)

इति। साधारणस्त्रीगमने दण्डमाह याज्ञवल्क्यः—

'अवरुद्धासु दासीषु भुजिष्यासु तथैव च।
गम्यास्वपि पुमान् दाप्यः पञ्चाशत्प[6]णिकं दमम्'॥
(या. स्मृ. २. २९०.)

इति। उक्तलक्षणा वर्णस्त्रियो दास्यः। ता एव स्वामिना शुश्रूषाहानिव्युदासार्थं गृह एव स्थातव्यमित्येवं पुरु-

---

१. B. reads कार्याति° for कालाति°. २. B. substitutes °च्य° for °भ्य°. ३. B. and C. read अन्यान्यस्याभिगमने for अन्योन्यस्याभिगमने. ४. B. and C. omit पण. ५. C. reads वैश्यस्तु. ६. B. and D. read °पणकं.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg

षान्तरभोगतो निरुद्धाः अवरुद्धाः । नियतपुरुषपरिग्रहाः-भुजिष्याः । यदा दास्योऽवरुद्धा भुजिष्या वा भवेयुः तासु तासु । चशब्दाद्वेश्यास्वैरिणीनामपि साधारणस्त्रीणां भुजिष्याणां ग्रहणम् । तासु च सर्वपुरुषसाधारणतया गम्यास्वपि गच्छन् पञ्चाशत्पणं दण्डनीयः । परपरिगृहीतत्वेन तासां परदारतुल्यत्वात् । एतदेवाभिप्रेत्य नारदोऽपि—

'स्वैरिण्यब्राह्मणी वेश्या दासी निष्कासिनी च या ।
गम्याः स्युरानुलोम्येन स्त्रियो न प्रतिलोमतः ॥
आस्वेव तु भुजिष्यासु दोषः स्यात्परदारवत् ।
गम्या अपि हि नोपेया यत्ताः परपरिग्रहाः' ॥
(ना. स्मृ. १२. ७८–७९.)

इति । निष्कासिनी स्वाम्यनवरुद्धा दासी । अनवरुद्धदास्याद्यभिगमने याज्ञवल्क्यः—

'प्रसह्य दास्यभिगमे दण्डो दशपणः स्मृतः ।
बहूनां यद्यकामाऽसौ चतुर्विंशतिकः पृथक्' ॥
(या. स्मृ. २. २९१.)

इति । पुरुषसंभोगजीविकासु दासीषु स्वैरिण्यादिषु च शुल्कदानमन्तरेण बलात्कारेणाभिगच्छतो दशपणो दण्डः । अनिच्छन्तीमेकां गच्छतां बहूनां प्रत्येकं चतुर्विंशतिपणात्मको दण्डः । कन्याहरणे दण्डमाह याज्ञवल्क्यः—

---

१. B. and C. do not repeat this word. २. C. reads निष्कासनी. ३. C. adds च after स्युः. ४. B. C. and D. read गम्यास्वपि हि नोपेयाद् यतस्ताः सपरिग्रहाः. ५. B. reads निष्काशनी. ६. B. reads °दास्यभि° for °दास्याद्यभि°.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

‘अलंकृतां हरेन्[1] कन्यामुत्तमं ह्यन्यथाऽधमम् ।
दण्डं दद्यात्सवर्णासु प्रातिलोम्ये वधः स्मृतः’ ॥
सकामास्वनुलोमासु[2] न दोषस्त्वन्यथा दमः’ ।

(या. स्मृ. २. २८७–२८८.)

इति । अलंकृता विवाहाभिमुखीं[3] तां कन्यामपहरन्[4] उत्तमसाहसं दण्डनीयः । तदनभिमुखीं सवर्णामपहरन् प्रथमसाहसं दण्डनीयः । उत्तमवर्णजां कन्यामपहरतः क्षत्रियादेर्वध एव । आनुलोम्येन सकामामपहरन् न दण्डभाक् भवति । अकामामपहरन्[6] प्रथमसाहसं दण्डनीयः । कन्यादूषणे तु[7] दण्डमाह स एव—

‘दूषणे तु करच्छेद उत्तमायां वधः स्मृतः ।
शतं स्त्रीदूषणे दद्याद्द्वे तु मिथ्याभिशंसने ॥
पशून् गच्छन् शतं दाप्यो हीनस्त्रीं[8] गां च मध्यमम्’ ॥

(या. स्मृ. २. २८८–२८९.)

इति । यद्यकामां कन्या बलात्कारेण नखक्षतादिना दूषयति तदा तस्य करच्छेदः । उत्तमाया[9] दूषणे वधः । कन्यायाः यदि कश्चिद्विद्यमानानिवापस्माररराजयक्ष्मादि-

---

१. A. reads हरेत् for हरन्. २. B. and C. do not insert this line (सकामास्वनुलोमासु न दोषस्त्वन्यथा दमः). but the Commentator माधवाचार्य gives explanation of this line below. ३. D. reads अलंकृतां विवाहाभिमुखीं कन्यां and omits ताम्. ४. D. omits कन्याम्. ५. D. reads सकामापहारे तु दण्डो न भवति. ६. C. reads सकामा° for अकामा°, but it gives quite contrary meaning. ७. B. and C. omit तु. ८. A. reads हीनां स्त्रीम् and D. reads हीनस्त्रां स्त्री च, while C. reads पशूनां चेच्छतं for पशून् गच्छन् शतम्. ९. C. and D. do not insert this portion from उत्तमाया दूषणे वधः to मध्यमसाहसं दण्डनीय इत्यर्थः.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg

दोषान्प्रकाश्येयमकन्येति दूषयत्यसौ शतं दाप्यः। मिथ्याभिशंसने तु पुनरविद्यमानदोषाविष्कारेण दूषणे द्वेशते दापनीयः। गोव्यतिरिक्तपशुगमने पणशतं दाप्यः। तथा हीनां स्त्रियमन्त्यावसायिनीं गां च गच्छन् मध्यमसाहसं दण्डनीय इत्यर्थः। यदा पुनस्तामेव अङ्गुलीप्रक्षेपेण योनिक्षतं कुर्वन् दूषयाति तदा विशेषमाह मनुः—

'अभिषह्य तु यः कन्यां कुर्याद्दर्पेण मानवः।
तस्याशु कर्त्ये[1] अङ्गुल्यौ दण्डं चार्हति षट्शतम्॥
सकामां दूषयंस्तुल्यो[2] नाङ्गुलिच्छेदमर्हति[3]।
द्विशतं तु दमं दाप्यः प्रसङ्गविनिवृत्तये॥
कन्यैव कन्यां याँ[4] कुर्यात्तस्याः स्याद्द्विशतो दमः।
शुल्कं च द्विगुणं दद्यात् शिफाश्चैवाप्नुयाद्दश॥
याँ[5] तु कन्यां प्रकुर्यात् स्त्री सा सद्यो मौण्ड्यमर्हति।
अङ्गुल्योरेव वाँ[6] च्छेदं[7] खरेणोद्वहनं[8] तथा'॥
(म. स्मृ. ८. ३६७–७०.)

इति। यदा पुनरुत्कृष्ट[9]जातीयां कन्यां सानुरागामकामां[10] गच्छति तदा तस्य क्षत्रियादेर्वधः। यदा सवर्णां सकामां

---

१. C. reads कर्त्ये for कर्त्ये. २. B. reads दूषयित्वा तु and gives in margin दूषयःस्तुल्यो. ३. A. reads °माप्नुयात् for °मर्हति. ४. C. substitutes यः for या, B. and C. substitute तु for स्यात् while B. and C. omit the following one line शुल्कं च द्विगुणं दद्यात्शिफाश्चैवाप्नुयाद्दश. ५. B. omits या तु कन्यां प्रकुर्यात्स्त्री सा सद्यो मौण्ड्यमर्हति. ६. D. substitutes च for वा. ७. B. and C. च्छेदः for च्छेदं. ८. B. and C. उद्वाहनं for उद्वहनं. ९. C. reads कृष्ण° for उत्कृष्ट. १०. C. substitutes सकामां, B. also originally अकामां but corrects सकामां and inserts स after this.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अभिगच्छति तदा गोमिथुनं शुल्कं तत्पित्रे दद्यात् । अनिच्छति पितरि दण्डरूपेण राज्ञे दद्यात् । सवर्णामकामां तु गच्छतो वध एव । तदाह मनुः—

'उत्तमां सेवमानस्तु जघन्यो वधमर्हति ।
शुल्कं दद्यात्सेवमानः समा[1]मिच्छेत्पिता यदि ॥
योऽकामां दूषयेत्कन्यां स सद्यो वधमर्हति ।
सकामां दू[2]षयंस्तुल्यो न वधं प्राप्नुयान्नरः' ॥

(म. स्मृ. ८. ३६६, ३६४.)

इति । चण्डाल्यादिगमने दण्डमाह स एव—

'अन्त्याऽभिगमने त्वङ्क्यः कु[3]बन्धेन प्रवासयेत् ।
शूद्रस्तथाऽङ्क्य एव स्यादन्त्यस्यार्यागमे वधः ॥
अयोनौ गच्छतो योषां पुरुषं वा[4]ऽपि मेहतः ।
चतुर्विंशतिको दण्डस्तथा प्रव्र[5]जितासु च' ॥

(या. स्मृ. २. २९४, २९३.)

इति । अन्त्या चाण्डाली । तां गच्छन्तं त्रैवर्णिकं प्रायश्चित्तानभिमुखं

'सहस्रं त्वन्त्यजस्त्रियम्' ।

(म. स्मृ. ८. ३८५.)

१. B. reads सयाम् and C. सम्यक् for समां. २. B. and C. read दूषमानस्तु for दूषयंस्तुल्यो. ३. B. and C. read कबंधेन. ४. B. and C. substitute च for वा. ५. B. reads प्रव्रजितागमे. and C. प्रव्रजिता नरः.

60

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg

इति । मनुवचनानुसारेण सहस्रं दण्डयित्वा कुत्सितवर्णेन[1] भगाकारेणाङ्कयित्वा स्वराष्ट्रा[2]न्निर्वासयेत् । शूद्रः पुनश्चण्डालीं गच्छन्नङ्क्य एव । अन्त्यज[3] इति पाठे चण्डाल एव भवति । चण्डालस्य तूत्कृष्टजातिस्त्रि[4]याभिगमने वध एव । योषां मुखादावभिगच्छतः पुरुषं वा मुखे मेहतः प्रव्रजितां गच्छतः चतुर्विंशतिपणो दण्डः । वञ्चनया स्त्रीसंग्रहणे[5] दण्डमाह बृहस्पतिः—

'[6]छद्मनाकारयेद्यस्तु तस्य सर्वहरो दमः ।
अङ्कयित्वा भगाङ्केन पुरान्निर्वासयेत्ततः' ॥

इति ।

इति स्त्रीसंग्रहणम् ।

अथ स्त्रीपुंसयोगाख्यं विवादपदम् ।

तस्य स्वरूपमाह नारदः—

'विवाहादिविधिः स्त्रीणां यत्र पुंसां च कीर्त्यते ।
स्त्रीपुंसयोगसंज्ञं[7] तद्विवादपदमुच्यते' ॥

(ना. स्मृ. १२. १.)

इति । स्त्रीरक्षणमाह मनुः—

---

१. D. reads °बंधेन. २. D. reads पुरात् for स्वराष्ट्रात्, while C. substitutes विप्रवासयेत् for निर्वासयेत्. ३. D. reads अन्त्य for अन्त्यज. ४. B. and C. omit °स्त्रिया° and read °ज्यात्यभिगमे. ५. D. reads °संग्रहे for °संग्रहणे. ६. C. and D. do not insert this verse and the following up to नारदः; owing to this the both प्रकरणs *i. e.*, स्त्रीसंग्रहणम् and स्त्रीपुंसयोगाख्यं are mixed together. ७. A. reads °नामैतत् for °संज्ञं त°.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

‘अस्वतन्त्राः स्त्रियः कार्याः पुरुषैः स्वैर्दिवानिशम् ।
विषयेषु च सज्जन्त्यः[1] संस्थाप्या ह्यात्मनो वशे ॥

सूक्ष्मेभ्योऽपि प्रसङ्गेभ्यः स्त्रियो रक्ष्या विशेषतः ।
द्वयोर्हि कुलयोः शोकमावहेयुररक्षिताः ॥

इमं हि सर्ववर्णानां पश्यन्तो धर्ममुत्तमम् ।
यतन्ते रक्षितुं भार्यां भर्तारो दुर्बला अपि ॥

स्वां प्रसूतिं चरित्रं[2] च कुलमात्मानमेव च ।
स्वं च धर्मं प्रयत्नेन[3] जायां रक्षन् हि रक्षति ॥

न कश्चिद्योषितः शक्तः प्रसह्य परिरक्षितुम् ।
एतैरुपाययोगैस्तु शक्यास्ताः परिरक्षितुम् ॥

अर्थस्य संग्रहे चैनां व्यये चैव नियोजयेत् ।
शौचे धर्मेऽन्नपक्त्यां[4] च पारिणाह्यस्य चेक्षणे[5]’ ॥

(म. स्मृ. ९. २, ५–७, १०–११.)

इति । स्वैः पुरुषैः भर्तृभिः सर्वदा अस्वतन्त्राः कार्याः । विषये गीतादौ आसक्तास्ततो व्यावर्तनीयाः । अरक्षितास्तु दुश्चरितेन भर्तृपितृकुलयोः शोकं कुर्युः । तस्मात्कुलद्वय-वृद्ध्यर्थं रक्ष्यास्ताः[6] । यद्यपि प्रसह्यावरुध्य[7] रक्षितुमशक्या-

---

१. C. and D. read विषये सज्जमानाश्च; B. also reads the same but in margin विषयेषु च सज्जन्त्यः. २. D. substitutes प्रसूतिं च वित्तं च and B. in margin gives the same; while C. तां प्रसूतिं च वित्तं च. ३. B. and C. read प्रजाश्चैव for प्रयत्नेन; but B. gives margin reading प्रयत्नेन. ४. B. and C. read धर्मेण पक्त्यां for धर्मेन्नपक्त्यां. ५. D. reads रक्षणे for चेक्षणे and substitutes पारिणाय्यस्य for पारिणाह्यस्य. ६. B. omits ताः. ७. D. omits अवरुध्य.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg

स्तथाप्यर्थसंग्रहादौ नियोजनेन पुरुषान्तरचिन्तनावसरस्याप्रदानेन रक्षेदित्यर्थः । बृहस्पतिरपि—

'सूक्ष्मेभ्योऽपि प्रसङ्गेभ्यो निवार्या स्त्री स्वबन्धुभिः ।
श्वश्र्वादिभि[1]र्गुरुस्त्रीभिः पालनीया दिवानिशम्' ॥

इति । दोषरहितस्त्रीपरित्यागिनं प्रत्याह नारदः—

'अनुकूलामवाग्दुष्टां दक्षां साध्वीं प्रजावतीम् ।
त्यजन् भार्यां[2]मवस्थाप्यो राज्ञा दण्डेन भूयसा' ॥
(ना. स्मृ. १२. ९९.)

इति । दण्डेन स्थापयितुमशक्ये त्वाह याज्ञवल्क्यः—

'आज्ञासंपादिनीं दक्षां वीरसूं प्रियवादिनीम् ।
त्यजन् दाप्यस्तृतीयांशमद्रव्यो भरणं स्त्रियाः' ॥
(या. स्मृ. १. ७६.)

इति । बुध्वा स्त्रियं त्यजेदित्याह नारदः—

'अन्योन्यं त्यजतोरा[3]गः स्यादन्योन्यविरु[4]द्धयोः ।
स्त्रीपुंसयोर्न चोढा[5]या व्यभिचारादृते स्त्रियाः' ॥
(ना. स्मृ. १२. ९०).

इति । विवाहसंस्काररहितयोर्ही[6]नजातीयस्त्रीपुंसयोर्विरोधेनान्योन्यं त्यजतो दोषो नास्ति । विवाहसंस्कृतायास्तु व्यभिचारादेव त्यागो न विरोधमात्रेण । एतच्च स्वच्छन्दव्यभिचारिणीविषयम्—

१. C. reads स्वस्रा° for श्वश्र्वा°. २. B. originally reads नारीं and gives marginal reading भार्यां. ३. B. C. and D. read धर्मः for आगः. ४. D. reads °विशुद्धये for °विरुद्धयोः. ५. A. reads निगूढाया, B. तनूढाया for न चोढाया. ६. D. reads अत्यन्त for हीन.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

'स्वच्छन्दगा तु या नारी तस्यास्त्यागो विधीयते'।

इति । यमस्मरणात् । शिष्यगाद्या अपि संत्याज्याः[1] । तथा च वसिष्ठः—

'चतस्रस्तु परित्याज्याः शिष्यगा गुरुगा तथा ।
पतिघ्नी तु विशेषेण जुङ्गितोपगता[2] तथा' ॥

(व. स्मृ. २१. १०.)

इति । हारीतोऽपि ।

'गर्भघ्नीं अधमवर्णां शिष्य[3]सुतगामिनीं पानव्यसनासक्तां[6] धनधान्यविक्रयकरीं विवर्जयेत्'।

(हा. स्मृ. १३. २१.)

इति । विवर्जनं च व्यवहारपरित्यागः । तथा च वसिष्ठः—

'व्यवाये[4] तीर्थगमने धर्मेभ्यश्च[5] निवर्तते'।

(व. स्मृ. २१. ९.)

इति । व्यवायः संभोगः । तीर्थगमनशब्देन स्मार्तं कर्म लक्ष्यते । धर्मशब्देन श्रौतम् । चशब्देन संभाषणादिकम् । व्याधितादीनां तु संभोगमात्रस्य त्याग इत्याह देवलः—

'व्याधितां स्त्रीप्रजां वन्ध्यामुन्मत्तां विगतार्तवाम् ।
अदुष्टां[6] लभते त्यक्तुं तीर्थान्न त्वेव कर्मणः' ॥

(देवल.)

---

१. B. reads त्याज्याः for संत्याज्याः. २. B. reads उज्झितोपगता and gives in margin जुङ्गितोपगता. ३. C. and D. read अधमवर्णशिष्य° for अधमवर्णां शिष्य°. ४. D. reads व्यवायतीर्थगमन° and C. व्यवायतीर्थखनन and gives in margin व्यवायतीर्थमनु. ५. A. substitutes तु for च. ६. B. reads अभक्तां.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg

इति। तीर्थात्संभोगादित्यर्थः। तथा च नारदः—

'वन्ध्यां स्त्रीजननीं निन्द्यां प्रतिकूलां च सर्वदा।
कामतो नाभिनन्देत कुर्वन्नेवं न दोषभाक् ॥
[१]अनर्थशीलां सततं तथैवाप्रियवादिनीम्।
पूर्वाशिनीं च या भर्तुः क्षिप्रं निर्वासयेद्गृहात्॥
स्त्रीं धनभ्रष्टसर्वस्वां गर्भविध्वंसिनीं तथा॥
भर्तुश्च [२]वधमिच्छन्तीं स्त्रियं निर्वासयेत्[३]पुरात्' ॥

(ना. स्मृ. १२. ९४, ९३, ९२.)

इति। बौधायनोऽपि—

अप्रजां दशमे वर्षे स्त्रीप्रजां द्वादशे त्यजेत्।
मृतप्रजां पञ्चदशे सद्यस्त्वप्रियवादिनीम्।

(बौ. स्मृ. २. २-४-६.)

इति। संभोग इति शेषः—

---

* after this B. has the following:—

इति। बौधायनोऽपि—

अप्रजां दशमे वर्षे स्त्रीप्रजां द्वादशे त्यजेत्।
मृतप्रजां पञ्चदशे सद्यस्त्वप्रियवादिनीम् ॥

इति संभोग इति शेषः

C. inserts only बौधायनोपि अप्रजां दशमे वर्षे संभोग इति शेषः while D. omits the whole above portion.

१. D. has mistaken throughout; it takes the last word of the first half of this verse *viz:* वादिनीम् and mixes it in the second half and composes only one line वादिनीं पूर्वाशिनीं च भर्ता निर्वासयेद्गृहात्। for the whole verse as given; while C. omits only first half of the verse. २. B. C. and D. read धन° for वध°. ३. B. C. and D. read गृहात् for पुरात्.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

itized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

'भर्तुः प्रतिनिविशेने[1] या भार्या स्कन्दयेदृतुम् ।
तां ग्राममध्ये विख्याप्य भ्रूणघ्नीं निर्धमेद्गृहात्[2] ।
(बौ. स्मृ. ४. १–१२–२०.)

अशुश्रूषाकरीं नारीं बन्धकीं पतिहिंसकाम्[3] ।
त्यजन्ति पुरुषाः प्राज्ञाः क्षिप्रमप्रियवादिनीम्' ॥

इति । त्यागश्च वधप्रतिनिधित्वेन[4] कार्यः । तथा च यमः—

'स्वच्छन्दव्यभिचारिण्याः विवस्वांस्त्यागमब्रवीत् ।
न वधं न च वैरूप्यं वधं स्त्रीणां विवर्जयेत् ॥
न चैव स्त्रीवधं कुर्यान्न क्षैवाङ्गविकर्तनम्' ॥

इति । स्त्रीणां वधं कुर्वन् तासां विवर्जनं कुर्याद्भर्ता न कर्णनासादिकर्तनमित्यर्थः । अन्ये[5] च स्त्रीपुंधर्मा आचाराध्याये प्रपञ्चिता इति नात्र प्रपञ्चिताः ।

इति स्त्रीसंग्रहः ।

अथ दायभागाख्यं व्यवहारपदं कथ्यते ।

तल्लक्षणं[6] नारदेनोक्तम्—

'विभागोऽर्थस्य पैत्र्यस्य[7] पुत्रैर्यत्र प्रकल्प्यते ।
दायभाग इति प्रोक्तं व्यवहारपदं[8] बुधैः' ॥
(ना. स्मृ. १३. १.)

---

१. D. reads °निषेधेन for °निविशेन. २. B. C. and D. read तु °नये° for निर्धमे°. ३. C. and D. read परि° for पति°. ४. D. reads अनिधनेन for वधप्रतिनिधित्वेन. ५. B. originally reads अयं स्त्रीधर्मः for अन्ये च स्त्रीपुंधर्माः । and for the same D. अयं च स्त्रीपुंधर्मः । ६. D. reads तत्र नारदः. ७. C. reads पैत्रस्य and D. पित्र्यस्य for पैत्र्यस्य ८. A. reads तद्विवादपदम्.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg

इति । दायो नाम यद्धनं स्वामिसंबन्धादेव अन्यस्य स्वं भवति तदुच्यते । स द्विविधः। अप्रतिबन्धः सप्रतिबन्धश्चेति । पितृधनं पितामहधनं वा अप्रतिबन्धो दायः । पुत्रादिधनं तु पित्रादीनां सप्रतिबन्धो दायः । तस्य विभागो दायविभाग इत्युच्यते । अत एव योगीश्वरः दायशब्देन पितृद्वाराऽऽगतं मातृद्वाराऽऽगतं च द्रव्यमेवोच्यते इति । संग्रहकारश्च—

'पितृद्वाराऽऽगतं द्रव्यं मातृद्वाराऽऽगतं च यत् ।
कथितं दायशब्देन तद्विभागोऽधुनोच्यते' ॥

इति । विभागकालमाह मनुः —

'ऊर्ध्वं पितुश्च मातुश्च समेत्य भ्रातरः समम् ।
भजेरन् पैतृकं ऋक्थमनीशास्ते हि जीवतोः' ॥

(म. स्मृ. ९. १०४.)

* स्वामिनः धनस्वामिनः संबन्धः स्वामिसंबन्धः। स च दायभागप्रकरणोक्तः पुत्रत्वादिरूप एव ग्राह्यः न तु क्रेतृत्वादिः। तेन स्वामिनः सकाशात् क्रीतं धनं न दायः।

† अत्र विज्ञानेश्वरः। पितृव्यभ्रात्रादीनां तु पुत्राभावे स्वाम्यभावे च स्वं भवतीति पुत्रसद्भावः स्वामिसद्भावश्च प्रतिबन्धस्तदभावे पितृव्यत्वेन भ्रातृत्वेन च स्वं भवतीति सप्रतिबन्धो दायः। एवं तत्पुत्रादिष्वप्यूहनीयः।

§ विभागो नाम द्रव्यसमुदायविषयाणामनेकस्वाम्यानां तदेकदेशेषु द्रव्यस्य व्यवस्थापनम्।

१. C. and D. omit योगीश्वरः. २. B. originally substitutes वा for च. ३. D. reads तस्य भागो. ४. B. reads originally तथा and gives in margin as सह. C. and D. read सह for समम्.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

itized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

इति । ऊर्ध्वं पितुरिति पितृधनविभागकालः । मातुरूर्ध्व- मिति मातृधनविभागकालः । ततश्चैतदुक्तं भवति । पितु- रूर्ध्वं मातरि जीवन्त्यामपि पितृधनविभागः कार्यः । तथा मातुरूर्ध्वं पितरि जीवितेऽपि मातृधनविभागः कार्य एव । अन्यतरधनविभागे उभयोरूर्ध्वकालप्रतीक्षणानुपयोगादिति । तदुक्तं संग्रहकारेण—

'पितृद्रव्यविभागस्य जीवन्त्यामपि मातरि ।
अस्वतन्त्रतयाऽस्वाम्यं यस्मान्मातुः पतिं विना ॥
मातृद्रव्यविभागोऽपि तथा पितरि जीवति ।
सत्स्वपत्येषु यस्मान्न स्त्रीधनस्य पतिः पतिः' ॥

इति । अयमर्थः । पतिमरणे पितृभार्यायाः पत्युपरमात् पत्युर्धने यस्मात् अस्वातन्त्र्येण न स्वामित्वम् यस्माच्चापत्येषु विद्यमानेषु भार्याधनस्य भार्यामरणेऽपि पतिर्न स्वामी तस्मा- त्तयोरन्यतरास्मिन् जीवत्यप्यन्यतरधनविभागो युक्त इति । एतेन जीवतोस्तत्तद्द्रव्यविभागेषु पुत्राणां न स्वातन्त्र्यमित्य- र्थादुक्तं भवति । तथा च शङ्खः—

'न जीवति पितरि पुत्रा रिक्थं भजेरन् ।
यद्यपि स्यात्पश्चादधिगतं तैः अनर्हा एव पुत्राः ।
अर्थधर्मयोः अस्वातन्त्र्यात्' ।

इति । अस्यायमर्थः । यद्यपि जन्मानन्तरमेव पुत्राः पितृ- धने स्वामित्वं प्रतिपन्नाः तथापि पितरि जीवति तद्धनं न

---

१. B. and C. omit °धन°. २. D. omits पत्युर्धने यस्मात्. ३. B. reads तथा for एतेन. ४. D. omits च. ५. D. ते अ°. ६. C. D. omit अयम्. ७. D. reads °धननिमित्तम् and C. न° निमित्तम् for स्वामित्वम्.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg

विभजेरन्। यतो धर्मार्थयोरस्वातन्त्र्याद्विभागकरणेऽनर्हाः। अर्थास्वातन्त्र्यम्[1] नाम तदादानप्रदानयोरस्वातन्त्र्यम्—इति। तदाह[2] हारीतः—

'जीवति पितरि पुत्राणां अर्थादान[3]विसर्गाक्षेपेष्व-
स्वातन्त्र्यम्'।

(हा. स्मृ. १७. २१.)

इति। अर्थादानमर्थोपभोगः। विसर्गो व्ययः। आक्षेपो भृत्यादेः शिक्षार्थमधिक्षेपादिः[4]। धर्मास्वातन्त्र्यं पृथगिष्टापूर्तादावप्रवृत्तिः। यत्तु देवलेनोक्तम्—

'पितर्युपरते पुत्रा[5] विभजेरन् पितुर्धनम्।
अस्वाम्यं हि भवेत्तेषां निर्दोषे[6] पितरि स्थिते'॥

इति। तदप्यस्वातन्त्र्यप्रतिपादनपरम्। पितृधने पुत्राणां जन्मना स्वाम्यस्य लोकसिद्धत्वात्। ननु शास्त्रैकसमधिगम्यस्य स्वत्वस्य कथं लोकसिद्धता। शास्त्रसिद्धत्वं च—

'स्वामी रिक्थक्रयसंविभागपरिग्रहाधिगमेषु।
ब्राह्मणस्याधिकं लब्धम्।
क्षत्रियस्य विजितम्।
निर्विष्टं वैश्यशूद्रयोः'।

(गौ. स्मृ. १०. ३९–४२.)

---

१. B. C. read अस्वातंत्र्यम् for अर्थास्वातंत्र्यम्. २. D. reads तथा च for तदाह. ३. C. reads अर्थदान for अर्थादान. ४. B. reads धनम् for अधिक्षेपादिः. ५. C. D. read तत्र for पुत्राः. ६. C. reads विद्वेषे for निर्दोषे.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

itized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

इति गौतमवचनादवगम्यते। अप्रतिबन्धो दायो ऋक्थं न[1] सप्रतिबन्धो दायः। संविभागः सप्रतिबन्धो दायः। अनन्य[2]पूर्वस्य जलतृणकाष्ठादेः स्वीकारः परिग्रहः[3]। निध्यादिप्राप्तिरधिगमः। एतेषु निमित्तेषु सत्सु स्वामी भवति। ब्राह्मणस्य प्रतिग्रहादिना यल्लब्धं तदधिकमसाधारणम्। क्षत्रियस्य विजयदण्डादिलब्धं य[4]त्तदसाधारणम्। वैश्यस्य कृषिगोरक्षादिलब्धं निर्विष्टं तदसाधारणम्। शूद्रस्य द्विजशुश्रूषादिना भृतिरूपेण यल्लब्धं तदसाधारणम्। एवमनुलोमप्रतिलोमजानां स्वस्वविहि[5]ताश्वसारथ्यादिना यल्लब्धं तदधिकमित्यर्थः। अत्रैव[6] संग्रहकारो न्यायमाह—

'वर्तते यस्य यद्धस्ते तस्य स्वामी स एव तु[7]'।
अ[8]न्यस्वमन्यहस्तेषु चौर्याद्यैः किं न वर्तते।

इति। अ[9]न्यस्वस्यान्यहस्ते स्थितस्य दर्शनेन तस्यैव स्वामित्वापत्तेः। अ[10]तः शास्त्रैकसमधिगम्यं स्वत्वम्। किंच यदि यस्यान्तिके यद्धनं दृष्टं तस्य स एव स्वामी तर्हि अस्य स्वमनेनापहृतं इति न ब्रूयात्। यस्यैवान्तिके दृष्टं तस्य स्वामित्वात्। स्वत्वस्य लौकिकत्वे—

---

१. B. and C. omit न सप्रतिबन्धो दायः. २. C. reads अन्न्य° for अनन्य°. ३. C. reads पितृगृहः for परिग्रहः. ४. B. and C. omit यत् तत्. ५. B. originally reads °विहितसूताद्यश्व° while C. omits °अश्व°. ६. D. substitutes तत्रैव for अत्रैव, while C. reads ग्रन्थकारो for संग्रहकारो. ७. D. substitutes न for तु. ८. C. D. omit this line अन्यस्वमन्यहस्तेषु चौर्याद्यैः किन्न वर्तते. ९. B. omits अन्न्यस्वस्यान्यहस्ते स्थितस्य दर्शनेन तस्यैव स्वामित्वापत्तेः. १०. C. reads तस्माशास्त्रत एव स्वत्वं स्यात् स्वाम्यंगानुरूपयीति अयमर्यः। यस्यहस्ते for अतः शास्त्रैकसमधिगम्यं स्वत्वस्वम्। किंच यदि यस्यान्तिके.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg

'योऽदत्तादायिनो हस्ताल्लिप्सेत ब्राह्मणो धनम्।
याजनाध्यापनेनाऽपि यथा स्तेनस्तथैव सः' ॥

(म. स्मृ. ८. ३४०.)

इति। याजनादिना अदत्तादायिनः सकाशाद्द्रव्यमर्जयतो दण्डविधानमनुपपन्नं स्यात्। तस्माच्छास्त्रैकसमधिगम्यं स्वत्वम्। इति

मैवम्। लौकिकमेव स्वत्वं लौकिकार्थक्रियासाधनत्वात्। व्रीह्यादिवत्। आहवनीयादीनां वैदिकादीनामपि लौकिकपाकादिसाधनत्वमस्तीत्यनैकान्तिको हेतुः—इति चेत्। न। न हि तेषामाहवनीयादिरूपेण पाकादिसाधनत्वं किं तर्हि लौकिकाग्न्यादिरूपेणेत्यस्ति वैषम्यम्। किंच पामराणामपि स्वत्वव्यवहारदर्शनात् स्वत्वस्य लौकिकत्वमवगम्यते।

यत्तु गौतमवचनम्।

'स्वामी रिक्थक्रयसंविभागेषु'

(गौ. स्मृ. १०. ३९.)

इत्याद्यनुपपन्नमित्युक्तम्। तन्न। प्रतिग्रहाद्युपायकस्य स्वत्वस्य लौकिकत्वे स्थिते ब्राह्मणादीनां प्रतिग्रहाद्युपायनियमार्थत्वात शास्त्रस्य। यदप्युक्तमन्यस्य स्वमन्येनापहृतम्—इति न ब्रूयादिति। तदसत्। स्वत्वहेतुभूतक्रय्यादिसदहोत स्वत्वसंदेहोपपत्तेः। यदपि चोक्तं। 'योऽदत्तादायिनः' —

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

itized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

इति अदत्तादायिनः सकाशाद्याजनादिना द्रव्यमर्जयितुर्दण्डविधानमनुपपन्नमिति । तदप्यसत् । प्रतिग्रहादिनियतोपायकस्यैव स्वत्वस्य लौकिकत्वात् नियमातिक्रमेण द्रव्यमर्जयतो दण्डविधानमुपपद्यते । एवं

'तस्योत्सर्गेण शुध्यन्ति' इति प्रायश्चित्तविधानमपि । एवं च स्वत्वस्य लौकिकत्वे असत्प्रतिग्रहादिलब्धं धनं तत्पुत्रादीनां दायत्वेन स्वमिति विभाज्यम् । न तेषां दोषसंबन्धश्च ।

'सप्त वित्तागमा धर्म्या दायो लाभः क्रयो जयः ।
प्रयोगः कर्मयोगश्च सत्प्रतिग्रह एव च' ॥

(म. स्मृ. १०. ११५.)

इति । मनुस्मरणात्—

इदमत्र चिन्तनीयम् । विभागात्स्वं[१] स्वस्य वा विभागः । इति । अत्रायं पूर्वपक्षः । विभागात्स्वं जन्मनैव स्वत्वे उत्पन्नमात्रस्य पुत्रस्याऽपि स्वं साधारणमिति द्रव्यसाध्येष्वाधानादिषु पितुरधिकारविधिर्न स्यात् । किंच ।

'†भर्त्रा प्रीतेन यद्दत्तं स्त्रियै तस्मिन्मृतेऽपि तत् ।
सा[२] यथाकाममश्नीयाद्दद्याद्वा स्थावरादृते' ॥

इति । प्रीतिदानवचनम्[३]प्यनुपपन्नं स्यात् । यदपि—

---

† The Commentator in the next paragraph says, this verse is quoted from विष्णुस्मृति but in the printed edition of Dr. J. Jolly of विष्णुस्मृति it does not appear anywhere.

१. B. reads स्वत्वं स्वस्य सतो वा for स्वं स्वस्य वा; while C. स्वत्तस्य स्वस्य वा for the same. २. C. reads सावमाकाशमश्नीयात् यावद्वा—but it seems to be a mistake. ३. C. omits वचनम्.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg

'मणिमुक्ताप्रवालानां सर्वस्यैव पिता प्रभुः ।
स्थावरस्य तु सर्वस्य न पिता न पितामहः ॥
पितृप्रसादाद्भुज्यन्ते वस्त्राण्याभरणानि च ।
स्थावरं तु न भुज्येत प्रसादे सति पैतृके' ॥

इति । तत्पितामहोपात्तस्थावरविषयम् । तस्मात्स्वामिनाशाद्विभागाद्वा स्वत्वं न जन्मनैव ।

राद्धान्तस्तु । जन्मनैव स्वत्वं लोके प्रसिद्धम् । विभागशब्दश्च बहुस्वामिकधनविषये लोके[1] प्रसिद्धो नान्यदीयधनविषयो न प्रहीणविषयः । किंच ।

'उत्पत्त्यैवार्थं[2] स्वामित्वाल्लभेतेत्याचार्याः'—

इति गौतमवचनाज्जन्मनैव स्वत्वमवगम्यते ।

यदुक्तम् मणिमुक्ताप्रवालानां—इत्यादिवचनं पितामहोपात्तस्थावरविषयमिति । तदयुक्तम् । न पिता न पितामह इति वचनात् पितामहस्य हि स्वार्जितमपि धनं पुत्रपौत्रयोः सतोरदेयमिति वचनम् जन्मना स्वत्वं गमयतीति ।

यदप्युक्तम् । अर्थसाध्येष्वाधानादिषु पितुरनधिकार इति । तदयुक्तम् । वचनादेवाधिकारावगमात् । यदपि चोक्तं जन्मनैव स्वत्वे भर्त्रा प्रीतेन यद्दत्तमित्यादि विष्णुवचनं नोपपद्यते । इति । तदप्ययुक्तम् । साधारण्येऽपि द्रव्यस्य वचनादेव

१. B. and C. omit लोके and read विषयः प्रसिद्धो. २. This सूत्र does not appear in the printed edtion of A. F. Stenzler of the गौतमधर्मशास्त्र.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

itized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant 2 Equipment Heritage Foundation, Jalga

प्रीतिदाने पितुरधिकारोपपत्तेः । स्थावरादौ तु स्वार्जितेऽपि पुत्रादिपारतन्त्र्यमेव—

‘ स्थावरं द्विपदं चैव यद्यपि स्वयमर्जितम् ।
असंभूय सुतान् सर्वान्न दानं न च विक्रयः ॥
ये जाता येऽप्यजाताश्च ये च गर्भे व्यवस्थिताः ।
वृत्तिं च तेऽभिकाङ्क्षन्ति न दानं न च विक्रयः ’ ॥

इत्यादिवचनात् । आपदादौ तु स्वातन्त्र्यमस्त्येव—

‘ एकोऽपि स्थावरे कुर्याद्दानाधमनविक्रयम् ।
आपत्काले कुटुम्बार्थे धर्मार्थेषु[1] विशेषतः ’ ॥

इति । स्मरणात्[2] । तस्मात्सुष्टूक्तं[3] जन्मनैव स्वत्वमिति । प्रकृतमनुसरामः । अपरमपि विभागकालमाह याज्ञवल्क्यः—

‘ विभागं चेत्पिता कुर्यादिच्छया विभजेत्सुतान् ।
ज्येष्ठं वा श्रेष्ठभागेन सर्वे वा स्युः समांशिनः ’ ॥

(या. स्मृ. २. ११४.)

इति । यदा पिता विभागं कर्तुमिच्छति तदा पुत्रानात्मनः सकाशादिच्छया विभजेत् । इच्छया विभागप्रकारः ज्येष्ठं वा श्रेष्ठभागेनेति । श्रेष्ठभागः[4] सोद्धारविभागः । उद्धारप्रकारः स्मृत्यन्तरे दर्शितः—

---

१. B. originally reads धर्मार्थेषु but in margin धर्मार्थे च and C. reads the same. २. B. and C. omit स्मरणात्. ३. B. substitutes साधू° for सुष्टू°. ४. B. C. do not insert श्रेष्ठभागः सोद्धारविभागः.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg

'[१]ज्येष्ठस्य विंश उद्धारः सर्वद्रव्याच्च यद्वरम्।
ततोऽर्धं मध्यमस्य स्यात्[२]तुरीयं तु यवीयसः' ॥
(म. स्मृ. ९. ११२.)

इति। अथवा। [३]सर्वे ज्येष्ठादयः पुत्राः समांशभाजः [४]कार्याः स्युः। अथ च विषमो भागः स्वार्जितद्रव्यविषयः। [५]क्रमागते तु सर्वेषामपि [६]समस्वाम्यात् समांशः स्यात्। पितुरिच्छया विषमविभागस्यायुक्तत्वात्। नारदोऽपि कालान्तरमाह—

'[७]अत [८]ऊर्ध्वं पितुः पुत्रा विभजेयुर्धनं समम्।
मातुर्निवृत्ते रजसि प्रत्तासु भगिनीषु च ॥
निवृत्ते वाऽपि रमणे पितर्युपरतस्पृहे' ॥
(ना. स्मृ. १३. २–३.)

* अयमर्थः। ज्येष्ठस्याविभक्तसाधारणधनादुद्धृत्य विंशतितमो भागः सर्वद्रव्येभ्यश्च यच्छ्रेष्ठं तद्दातव्यम्। मध्यमस्य चत्वारिंशत्तमो भागो देयः। कनिष्ठस्य पुनरशीतितमो भागो दातव्यः। अवशिष्टं धनं समं कृत्वा विभजनीयम्।

§ अत्रायं प्रयोगः। विभागस्य त्रयः कालाः। तत्र यदा पितुर्विभागेच्छा स तावदेकः कालः। अपरोऽपि जीवत्यपि पितरि द्रव्यनिःस्पृहे निवृत्तरमणे मातरि च निवृत्तरजस्कायाम् पितुरनिच्छायामपि पुत्रेच्छयैव विभागो भवति। एष द्वितीयः कालः। पितरि जीवत्यपि विभागं कर्तुमिच्छति चेत् विभागो भवति। एष तृतीयः कालः।

† The commentator माधवाचार्य does not mention particular name of the text from which this verse is quoted, but it appears in मनु.

१. A. reads ज्येष्ठस्य समुद्धरंशम् for ज्येष्ठस्य विंश उद्धारः. २. A. substitutes तृतीयम् for तुरीयम्. ३. B. omits सर्वे. ४. C. and D. do not insert कार्याः स्युः. ५. A. reads क्रमागतेऽपि and B. क्रमायाते तु, while C. क्रमात्येतु. ६. D. omits समस्वाम्यात् while B. and C. omit समांशः स्यात्. ७. A. reads पितर्यूर्ध्वंगते for अत ऊर्ध्वं पितुः। ८. A. substitutes विभजेरन् and क्रमात् for विभजेयुः and समम् respectively.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

itized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant 2 Equipment Heritage Foundation, Jalga

इति । शङ्खोऽपि—

‘¶अकामे पितरि ऋक्थविभागो वृद्धे विपरीत-
चेतसि दीर्घरोगिणि च’ ॥

इति । अस्यार्थः । अकामे विभागमनिच्छति पितरि अति-वृद्धे विपरीते[1]चेतसि[2] अप्रकृतिस्थे[3] दीर्घरोगिणि अचिकित्स्यरोगग्रस्ते च पुत्राणामिच्छयैव विभागो भवतीत्यर्थः । दीर्घ-रोगग्रहणमतिकुपितादेरुपलक्षणम् । अत एव नारदः—

‘व्याधितः कुपितश्चैव विषयासक्तमानसः ।
अन्य[4]थाशास्त्रकारी च न विभागे पिता प्रभुः’ ॥
(ना. स्मृ. १३. १६.)

इति । पित्रा समविभागकरणे विशेषमाह याज्ञवल्क्यः—

‘यदि कुर्यात्समानंशान् पत्न्यः कार्याः समांशिकाः ।
न दत्तं स्त्रीधनं यासां भर्त्रा वा श्वशुरेण वा’॥
(या. स्मृ. २. ११५.)

इति । यदि स्वेच्छया पिता पुत्रान् समभागिनः करोति तदा अदत्तस्त्रीधनाः पत्न्योऽपि पुत्रसमांशभाजः कार्याः । दत्ते तु स्त्री-धने—

‘दत्ते त्वर्धं प्रकल्पयेत्[5]’ ।
(या. स्मृ. २. १४८.)

¶ पूर्वोक्तात् कालत्रयादन्योऽयं चतुर्थो विभागकालः ।

---

१. D. reads विपरीते चेतसि, for विपरीतचेतसि. २. C. and D. read विपरीतेऽप्रकृतिस्थे, while B. originally reads विपरीते अप्रकृतिस्थे चेतसि. ३. C. D. omit चेतसि. ४. D. reads अयथा° for अन्यथा°. ५. A. reads त्वर्धांशहारिणीम् while the text of याज्ञवल्क्य reads त्वर्धं प्रकीर्तितम्.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

tized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant-2 Equipment Heritage Foundation, Jalg

इति । पुत्रांशादर्धांशभाजो भवन्ति‡ । पितुरूर्ध्वं धर्मविवृद्ध्यर्थं विभागः कर्तव्य इत्याह प्रजापतिः[1]—

'एवं सह वसेयुर्वा पृथग्वा धर्मकाम्यया ।
पृथग्विवर्धते धर्मस्तस्माद्धर्म्या पृथक्क्रिया ' ।
(म. स्मृ. ९. १११.)

इति । बृहस्पतिरपि—

'एकपाकेन वसतां पितृदेवद्विजार्चनम् ।
एकं भवेद्विभक्तानां तदेव स्याद् गृहे गृहे ' ॥

इति । पित्रोरूर्ध्वं विभागे प्रकारनियम[2]माह याज्ञवल्क्यः—

---

‡ इदं असंगतमिव प्रतिभाति यतः भगवता योगीश्वरेण अधिविन्नस्त्रिविषयोऽयं निर्णयः कृतः । तथा च ।

अधिविन्नस्त्रियै दद्यादाधिवेदनिकं समम् ।
न दत्तं स्त्रीधनं यस्यै दत्ते त्वर्धं प्रकीर्तितम् ॥
(या. स्मृ. २-१४८.)

इति । व्याख्यातं चैतत् विज्ञानेश्वरेण । यथा—

" यस्या उपरि विवाहः साधिविन्ना सा चासौ स्त्री चेत्याधिविन्नस्त्री तस्यै अधिविन्नस्त्रियै आधिवेदनिकं अधिवेदननिमित्तं धनं समं यावदधिवेदनार्थं व्ययीकृतं तावद्दद्यात् । यस्यै श्वशुरेण भर्त्रा वा स्त्रीधनं न दत्तम् । दत्ते पुनः स्त्रीधने आधिवेदनिकद्रव्यस्यार्धं दद्यात् । अर्धशब्दश्चात्र समविभागवचनो न भवति । अतश्च यावता तत्पूर्वदत्तमाधिवेदनिकसमं भवति तावद्देयमित्यर्थः" ।

अतः ' दत्ते त्वर्धं प्रकल्पयेत् ' इति नियमः आधिवेदानिकसमत्वार्थः न तु पुत्रांशन्यूनत्वार्थः ।

---

१. This verse does not appear in प्रजापति, but occurrs in मनु.
२. C. omits °नियम°.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

itized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant-2 Equipment Heritage Foundation, Jalga

'विभजेयुः सुताः पित्रोरूर्ध्वमृक्थमृण समम्' ।
(या. स्मृ. २. ११७.)

इति । ननु पित्रोरूर्ध्वं विभागेऽपि विषमविभागो मनुना दर्शितः—

'ऊर्ध्वं पितुश्च मातुश्च'
(म. स्मृ. ९. १०४.)

इत्युपक्रम्य—

'ज्येष्ठ एव तु गृह्णीयात् पित्र्यं धनमशेषतः ।
शेषास्तमुपजीवेयुर्यथैव पितरं तथा ॥
ज्येष्ठस्य विंश उद्धारः सर्वद्रव्याच्च यद्वरम् ।
ततोऽर्धं मध्यमस्य स्यात्तुरीयं तु यवीयसः' ॥

इति । तथा—

'उद्धारेऽनुद्धृते[1] तेषामियं स्यादंशकल्पना ।
एकाधिकं हरेज्ज्येष्ठः पुत्रोऽध्यर्धं ततोऽनुजः ।
अंशमंशं यवीयांस इति धर्मो व्यवस्थितः'* ॥
(म. स्मृ. ९. १०५, ११२, ११६–११७.)

इति । गौतमोऽपि ।

'विंशतिभागो ज्येष्ठस्य मिथुनमुभयतोदद्युक्तो
रथो गोवृषः ।

---

* अस्यार्थः । एकाधिकमंशं द्वावंशाविति यावज्ज्येष्ठपुत्रो गृह्णीयात् । अधिकमर्धं यत्रांशे सार्धमंशं ज्येष्ठादनन्तरजातो गृह्णीयात् । कनिष्ठाः पुनरेकैकमंशं गृह्णीयुरिति व्यवस्थितो धर्मः । इदं तु ज्येष्ठतदनुजयोर्विद्यादिगुणवत्त्वापेक्षया कनिष्ठानां च निर्गुणवत्त्वे बोद्धव्यम् । ज्येष्ठतदनुजयोराधिकदानदर्शनात् ।

---

१. B. reads तूद्धृते for ऽनुद्धृते.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg

काणः खोडः[1] कूटः वण्डो मध्यमस्यानेके[2]श्चेत् ।
अ[3]विर्धान्यायसी गृहमनोयुक्तं चतुष्पदां
चैकैकं यवीयसः ।
समं चेतरत्[4] सर्वम् ' ।

(गौ. स्मृ. २८. ६–८.)

इति । अयमर्थः । सर्वस्मात् पितृधनाद्विंशतितमो भागो ज्येष्ठस्य । मिथुनं गोमिथुनं प्रसिद्धम् । उभयतोदतोऽश्वाश्वतरगर्दभाः तेषां यथासंभवं अन्यतराभ्यां युक्तो रथः । खोडो[5] वृद्धः । कूटः शृङ्गविकलः । वण्डो[6] विलोपितवालधिः । अविशेषितत्वाद्गवाश्वादीनां यथासंभवं अन्यतरस्योद्धारः कर्तव्यो मध्यमस्य । यवीयसस्तु धान्यं व्रीह्यादि अयो लोहम् । अनोयुक्तं शकटयुक्तम् । चतुष्पदां गवादीनामेकैकं पृथक् पृथगेवा[7]नुपूर्व्येण यवीयस उद्धारः ।

बृहस्पतिरपि—

' जन्मविद्यागुणैर्ज्येष्ठो[8] व्द्यंशं दायादमाप्नुयात् ' ।

इति । कात्यायनोऽपि—

' यथा यथा वि[9]भागाप्तं धनं यागार्थतामियात् ।
तथा तथा विधातव्यं विद्वद्भिर्भागगौरवम् ' ॥

---

१. B. originally reads चौरः and in margin as खोरः while A. reads काणखोरकूटवण्टाः and B. and C. substitute षंडो for वण्डो. २. B. and C. read अनेकाश्चेत्. ३. B. reads originally इविर्धान्या° and gives in margin अहविर्धान्या°. ४. D. reads इतरतः while the text (Printed edition of A. F. Stenzler) reads समधेतरत्सर्वम्. ५. B. here also reads originally as चोरः and in margin श्चोरः, C. also reads श्चोरो for the same. ६. Here also B. reads शण्डो and C. शण्ठो. ७. B. C. and D. omit एव. ८. D. reads गुणश्रेष्ठो. ९. C. reads विभागात्तं. and D. reads विभागोत्थधनं.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

itized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

इति । जीवद्विभागेऽपि विषमविभागो नारदेनोक्तः—

'पितैव वा स्वयं पुत्रान् विभजेद्वयसि स्थितः ।
ज्येष्ठं[1] श्रेष्ठविभागेन यथा वास्य मतिर्भवेत्[2] ॥
पित्रैव तु विभक्ता ये समन्यूनाधिकैर्धनैः ।
तेषां स एव धर्मः[3] स्यात्सर्वस्य हि पिता प्रभुः* ।
† द्वावंशौ प्रतिपद्येत विभजन्नात्मनः पिता' ॥

(ना. स्मृ. १३. ४, १६, १२.)

---

§ अत्र जीमूतवाहनः—

ज्येष्ठस्य श्रेष्ठभागमभिदाय पुनर्यथा वास्य मतिर्भवेदित्यनेन यादृशे न्यूनाधिकविभागे पितुः पूर्वोक्तकारणात्कर्तव्यमतिर्भवेदिति पृथगभिधानात् श्रेष्ठभागादन्य एवायं न्यूनाधिकविभागः प्रतीयते ॥

* एतद्वचनम् अग्रे उक्तं 'समन्यूनाधिका भागाः' इत्यादि बृहस्पतिवचनं च—पुत्राविनिर्मोकेण पित्रार्जितपरं भ्रातृणामिति मनुवचनं च सर्वपुत्रसहकारेण पित्रार्जितधनविषयकमतो न विरोध इति चण्डेश्वरादीनां मतम् ॥ पुत्राणां विभागप्रार्थनस्थले एव मनुवचनं नेयं पितुः स्वेच्छास्थल एव बृहस्पतिवचनमिति जीमूतवाहनादीनां मतम् । नारदः । पित्रैव तु....॥ इति नारदवचनम् ॥ न्यूनाधिकविभक्तानां धर्मः पितृकृतः स्मृत इति याज्ञवल्क्यवचनं च बृहस्पतिवचनसमानविषयकमेव मन्तव्यम् ॥

† अत्र केचित्तु परस्परतुल्यगुणयोगि किंचिन्न्यूनगुणकनिष्ठभ्रातृसमुदायस्यात्यल्पधनविभागविषयकमिदमेकद्रव्यरूपोद्धारदानासामर्थ्यात् । उत्कृष्टभागदानेनैव तत्संबन्धनं निर्गुणत्वेन न्यूनत्वाच्च निकृष्टभागदानं कनिष्ठायेत्याहुः । चण्डेश्वरस्तु अधिकोंऽशः विभागे योंऽशो लभ्यते

---

१. B. reads ज्येष्ठ° for श्रेष्ठ while A. reads वा श्रेष्ठभागेन for श्रेष्ठविभागेन. २. B. C. read स्वमातिः for °स्यमतिः. ३. D. reads धर्म्यः for धर्मः.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg

इति । बृहस्पतिरपि—

'समन्यूनाधिका भागाः पित्रा येषां प्रकल्पिताः ।

तथैव ते पालनीया विनेयास्ते स्युरन्यथा' ॥

इति । तस्माज्जीवद्विभागे अजीवद्विभागे च विषमविभागोऽस्तीति कथं सुताः सममेव विभजेरन्निति नियम्यते । नैवम् । सत्यं शास्त्रतो विषमविभागोऽस्ति तथापि लोकविद्विष्टत्वादनुबन्ध्यादिवत् नानुष्ठीयते । उक्तं च संग्रहकारेण—

'यथा नियोगधर्मोऽयं नानुबन्ध्यावधोऽपि वा ।

तथोद्धारविभागोऽपि नैव संप्रति वर्तते' ॥

तस्मादन्यः ज्येष्ठत्वनिबन्धनं देयः । कनिष्ठायावर इति तन्न्यूनः तत्पादोनस्तदर्धं तत्पादो वा । इदं च कनिष्ठस्य गुणवत्त्वे गुणं विविच्यैव देयमित्यभिप्रैति । शेषा मध्यमा निर्गुणाः समांशभागाः । समांशं गुणादिनिबन्धनाधिक्यरहितेंऽशो भागः भजनं स्वामित्वं येषाम् । अप्रदत्ता भगिनी अंशभागिनी न तु समांशभागिनी तस्याः समांशित्वनिषेधस्य वक्ष्यमाणत्वात् । यद्वा समांशभागिनी आधिक्यरहितभागस्वामिनी यथा । समस्तत्र विभागः स्यादिति स चांशो वक्ष्यमाणश्चतुर्थभागः प्रकाशकारेण तु कनिष्ठायावर इति स्थाने श्रेष्ठाय च वर इति पठितं व्याख्यातं च प्रथमोत्पन्नस्यांशद्वयं श्रेष्ठः कुटुम्बकर्मण्युपयुक्तः तस्य वरं श्रेष्ठं किंचिद्देयमिति । औरसेषु यदुक्तं क्षेत्रजेष्वपि एष व्यवहारः अतिदेश्य इत्याह । क्षेत्रजेष्विति । धर्मतो जातेषु क्षेत्रजेषु तद्वदौरसपुत्रवत् । तथा च या या व्यवस्था औरसपुत्रे उक्ता ज्येष्ठाद्यंशविषयेषु क्षेत्रजेष्वपि सति संभवे तास्ता ग्राह्या इति भावः ।

---

१. B. reads ते तथान्यथा and C. स्युरतोन्यथा. २. C. and D. omit अजीवद्विभागे and read जीवद्विभागेन च. ३. C. reads °विभागे सति for °विभागोऽस्तीति. ४. C. reads अनुवश्यादिवत्. ५. B. reads नियोगो धर्मो नो for नियोगधर्मोयम्. ६. D. reads °बन्ध्या° for °वन्ध्या°. ७. C. reads ततो° for तथो°.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

itized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

इति। आपस्तम्बोऽपि—

'जीवे[1]न् पुत्रेभ्यो दायं विभजेत्समम्'।

(आ. स्मृ. २. ६. १४. १.)

इति। स्वमतमुपन्यस्य—

'[2]ज्येष्ठो दायाद इत्येके'।

(आ. स्मृ. २. ६. १४. ६.)

इत्येकीयमतेन कृत्स्नधनग्रहणं ज्येष्ठस्योपन्यस्य—

'देशविशेषे सुवर्णं कृष्णा गावः कृष्णं भौमं ज्येष्ठस्य।
रथः पितुः पै[3]रीभाण्डं च गृ[4]हे।
अलंकारो भार्याया ज्ञातिधनं चेत्येके'।

(आ. स्मृ. २. ६. १४. ७–९.)

इत्येकीयमतेनैवोद्धारविभागं दर्शयित्वा—

'तच्छा[5]स्त्रविप्रतिषिद्धम्'।

(आ. स्मृ. २. ६. १४. १०.)

इति निराकृ[6]तवान्। तं च[7] शास्त्रप्रतिषेधं स्वयमेव दर्शितवान्—

'मनुः पुत्रेभ्यो दायं व्यभजदित्यविशेषेण श्रूयते'।

(आ. स्मृ. २. ६. १४. ११.)

---

१. D. adds एव after जीवन्. २. B. and C. omit 'ज्येष्ठो दायाद इत्येके' इत्येकीयमतेन कृत्स्नधनग्रहणं ज्येष्ठस्योपन्यस्य. ३. Except A. all read as परि° for परी°. ४. D. intermixes both sûtras and reads as गृहेऽलंकारो. ५. A. reads शास्त्रैः for शास्त्र° and D. शास्त्रप्रति° for शास्त्रविप्रति° B. C. read आपस्तंबेनाऽपि. ६. B. C. read निराकृतम्. ७. B. C. omit तं च शास्त्रप्रतिषेधं स्वयमेव दर्शितवान्.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg

इति। तस्माद्विषमविभागः शास्त्रसिद्धोऽपि लोकविरोधाच्छ्रुतिविरोधाच्च नानुष्ठेयः। इति सममेव विभजेरन्निति नियमो घटते।

स्वयं द्रव्यार्जनसमर्थतया पितृद्रव्यमनिच्छतोऽपि यत्किंचिद्दत्वा दायविभागः कर्तव्यः तत्पुत्रादीनां दायग्रहणेच्छानिवृत्यर्थमित्याह याज्ञवल्क्यः—

'शक्तस्यानीहमानस्य किंचिद्दत्वा पृथक् क्रिया'।

(या. स्मृ. २. ११६.)

इति। पुत्राणां मातृधनविभागो दुहित्रभावे द्रष्टव्यः तथाच स एव—

'मातुर्दुहितरः शेषमृणात्ताभ्य ऋतेऽन्वयः'।

(या. स्मृ. २. ११७.)

इति। मातृकृतर्णापाकरणावशिष्टं[2] मातृधनं दुहितरो विभजेरन्। अतश्च मातृकृतर्णसमं न्यूनं च मातृधनं दुहितृणां सद्भावेऽपि पुत्रा एव विभजेरन्—इत्यर्थादवगम्यते[§]। अत्र गौतमेन विशेषो दर्शितः।

§ एतदुक्तं भवति। मातृकृतं ऋणं पुत्रैरेवापाकरणीयं न दुहितृभिः। ऋणावशिष्टं तु धनं दुहितरो गृह्णीयुः। युक्तं चैतत्।

पुमान् पुंसोऽधिके शुक्रे स्त्री भवत्यधिके स्त्रियाः'।

इति। स्त्र्यवयवानां दुहितृषु बाहुल्यात् स्त्रीधनं दुहितृगामि। पितृधनं पित्रवयवानां पुत्रेषु बाहुल्यात् पुत्रगामि इति।

१. C. reads भयम्. २. C. reads ° करणवैशिष्ट्यम् for करणावशिष्टम्.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

itized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant-2 Equipment Heritage Foundation, Jalga

'स्त्रीधनं दुहितॄणामप्रत्तानामप्रतिष्ठितानां च'।

(गौ. स्मृ. २८. २४).

इति। ऊढाऽनूढदुहितृसमवाये मातृधनमनूढानामेव। ऊढास्वपि सधननिर्धनदुहितृसमवाये निर्धनानामेवेत्यर्थः। पैतामहे पौत्राणां विभागे विशेषमाह याज्ञवल्क्यः—

'अनेकपितृकाणां तु पितृतो भागकल्पना'।

(या. स्मृ. २. १२०).

इति। यदा पितृतः अविभक्ता भ्रातरः पुत्रानुत्पाद्य मृताः तत्रैकस्य द्वौ पुत्रौ अन्यस्य त्रयः अपरस्य चत्वारः। तत्र पौत्राणां पैतामहे द्रव्ये यद्यपि जन्मनैव स्वत्वं पुत्रैरविशिष्टं तथापि पित्र्यंशं द्वावेकं त्रयोऽप्येकं चत्वारोऽप्येकं लभन्ते इत्यर्थः। एतदेवाभिप्रेत्य बृहस्पतिरपि—

'तत्पुत्रा विषमसमाः पितृभागहराः स्मृताः'।

इति। तत्पुत्राः प्रमीतपितृकाणामेकैकस्य पुत्राः विषमसमाः न्यूनाधिकसंख्याः स्वं स्वं पैतृकं भागमेव लभन्ते इत्यर्थः। यदा स्वसुतयोरविभक्तयोर्मध्ये कश्चिद्भ्राता मृतः तत्सुतस्तु पितामहादप्यप्राप्तांशः पितामहोऽपि नासीत् तदा त्वाह कात्यायनः—

'अविभक्तेऽनुजे प्रेते तत्सुतं ऋक्थभागिनम्।
कुर्वीत जीवनं येन लब्धं नैव पितामहात्।

१. B. C. D. read दायकल्पना. २. B. originally reads तथा while in margin reads तदा. ३. B. reads originally भागिनं and gives in margin as जीवनं.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg

लभेतांशं से पित्र्यं तु पितृव्यात्तस्य वा सुतात् ।
स एवांशस्तु सर्वेषां भ्रातॄणां न्यायतो भवेत् ।
लभेत तत्सुतो वाऽपि निवृत्तिः परतो भवेत्' ॥

इति । लभेत तत्सुतो वा इत्यस्य अयमर्थः । तस्यापि विभाज्य धनस्वामिपौत्रस्य सुतोऽपि पितुरभावे तद्भागं लभेत तत ऊर्ध्वं तत्सन्ततौ वृद्धप्रपितामहधनविभागकरणनिवृत्तिः[2]-

इति । तथा च देवलः—

'अविभक्तविभक्तानां कुल्यानां[3] वसतां सह ।
भूयो दायविभागः स्यादा चतुर्थादिति स्थितिः ॥
तावत्कुल्याः सपिण्डाः स्युः पिण्डभेदस्ततः परम्' ॥

इति । जीवत्पितृकस्य[4] पुनः पित्रा सह कथं पैतामहधनविभाग इत्याकाङ्क्षायामाह बृहस्पतिः—

'द्रव्ये पितामहोपात्ते जङ्गमे स्थावरेऽपि वा ।
सममंशित्वमाख्यातं पितुः पुत्रस्य चैव हि' ॥

इति । याज्ञवल्क्योऽपि—

'भूर्या पितामहोपात्ता निबन्धो द्रव्यमेव वा ।
तत्र स्यात्सदृशं स्वाम्यं पितुः पुत्रस्य चोभयोः' ॥
(या. स्मृ. २. १२१).

इति । भूः शालिक्षेत्रादिका । निबन्धः एकस्य पर्णभारस्य इयन्ति पर्णानि तथैकस्य क्रमुकफलभारस्य[5] इयन्ति

१. B. and C. add स before लभेतांशम् but it will then break the rules of meter. २. B. and C. add इत्यर्थः after °निवृत्तिः. ३. D. reads कुलानां while A. substitutes गृहे for सह. ४. C. reads क्रीत° for जीवत्°. ५. B. C. D. omit °फल° while C. substitutes °भावस्य for °भारस्य.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

itized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

क्रमुकफलानीत्याद्युक्तलक्षणः । द्रव्यं सुवर्णरजतादि यत्पितामहेन प्रतिग्रहविजयादिलब्धं तत्र पितुः पुत्रस्य च स्वाम्यं लोकप्रसिद्धमिति विभागोऽस्ति । यस्मात्सदृशं समानं स्वाम्यं तस्मान्न पितुरिच्छयैव विभागो नापि पितुर्भागद्वयम् । ततश्च पितृतो भागकल्पनेत्येतत्स्वाम्ये समानेऽपि वाँचनिकम् । अतः—

'द्वावंशौ प्रतिपद्येत विभजन्नात्मनः पिता' ।

(ना. स्मृ. १३. १२).

इति । एवमादिकं युगान्तरे विषमविभागप्रतिपादनतया स्थापितम् । स्वार्जितद्रव्यविषयं वा । पैतामहधनविषये तु न क्वापि विषमविभागः । इति । तथा अविभक्तेन पित्रा पैतामहे द्रव्ये दीयमाने विक्रीयमाणे वा पौत्रस्य निषेधेऽप्यधिकारोऽस्तीति गम्यते ।

---

* अत्र विज्ञानेश्वरः—'विभागं चेत् पिता कुर्यात्' इत्येतत्स्वार्जितविषयम् । तथा 'द्वावंशौ प्रतिपद्येत विभजन्नात्मनः पिता' इत्येतदपि स्वार्जितविषयम् । 'जीवतोरस्वतन्त्रः स्याज्जरयापि समन्वितः' इत्येतदपि पारतन्त्र्यं मातापित्रर्जितद्रव्यविषयम् । तथा 'अनीशास्ते हि जीवतोः' इत्येतदपि । तथा सरजस्कायां मातरि सस्पृहे च पितरि विभागमनिच्छत्यपि पुत्रेच्छया पैतामहद्रव्यविभागो भवति । तथाऽविभक्तेन पित्रा पैतामहे द्रव्ये दीयमाने विक्रीयमाणे वा पौत्रस्य निषेधेऽप्यधिकारः । पित्रर्जिते तु न निषेधाधिकारः । तत्परतन्त्रत्वात् । अनुमतिस्तु कर्तव्या । तथाहि । पैतृके पैतामहे च स्वाम्यं यद्यपि जन्मनैव तथापि पैतृके पितृपरतन्त्रत्वात् पितुः स्वार्जकत्वेन प्राधान्यात् पित्रा विनियुज्यमाने स्वार्जिते द्रव्ये पुत्रेणानुमतिः कर्तव्या । पैतामहे तु द्वयोः स्वाम्यमविशिष्टमिति निषेधाधिकारोऽप्यस्तीति विशेषः । अग्रे मनुवाक्ये प्रदर्श्यते ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg

पैतामहोपात्तेऽपि क्वचित्पितुरिच्छयैव स्वार्जितवद्विभागो भवतीत्याह मनुः—

'पैतृकं तु पिता द्रव्यमनवाप्तं यदाप्नुयात् ।
न तत्पुत्रैर्भजेत्सार्धमकामः स्वयमर्जितम्' ॥

(म. स्मृ. ९. २०९.)

इति । यत्पितामहार्जितं केनाप्यपहृतं[1] यदि पितोद्धरति तदा स्वार्जितमिव[2] पुत्रैः सार्धमकामतः स्वयं न विभजेत् । इति । एवं च[3] सति पितामहोपार्जिते न स्वेच्छया विभाग इत्युक्तं भवति । बृहस्पतिरपि—

'पैतामहं हृतं पित्रा स्वशक्त्या यदुपार्जितम् ।
विद्याशौर्यादिनां[4] प्राप्तं तत्र स्वाम्यं पितुः स्मृतम्' ।

इति । कात्यायनोऽपि—

'स्वशक्त्यापहृतं द्रव्यं स्वयमाप्तं च यद्भवेत् ।
एतत्सर्वं पिता पुत्रैर्विभागं[6] नैव दाप्यते' ॥

इति । यत्परैरपहृतं क्रमायातं[7] स्वशक्त्यैवोद्धृतं यन्नष्टं[5] क्रमायातं यच्च[8] विद्याशौर्यादिना स्वयमेवार्जितं तत्सर्वं पिता विभागे[9] पुत्रैर्न दाप्य इत्यर्थः । विभागोत्तरकालोत्पन्नस्य पुत्रस्य[10] भागकल्पनाप्रकारमाह याज्ञवल्क्यः—

---

१. C. reads उपहृतम्. २. C. adds °विषयं वा । पैतामहधनविषये तु क्वापि विषमविभाग इति । तथापि । अविभक्तेन पितृपैतामहे द्रव्येऽपि चार्जीयमाने विक्रीयमाणे वा and omits इव only. ३. C. omits च. ४. C. reads तत्प्राप्तम् for °ना प्राप्तम्. ५. B. reads नष्टम्. ६. B. reads विभागे. ७. C. reads क्रमागतम्. ८. B. C. read यच्च for यत्. ९. D. reads विभागम्. १०. D. omits पुत्रस्य.

itized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

'विभक्तेषु सुतो जातः सवर्णायां विभागभाक्' ।

(या. स्मृ. २. १२२.)

इति । अयमर्थः । विभक्तेषु पुत्रेषु सवर्णायां भार्याया जातः पुत्रः पित्रोर्विभागं भजते इति विभागभाक्—इति । मातृभागं चासत्यां दुहितरि—

'ताभ्य ऋतेऽन्वयः' ।

(या. स्मृ. २. ११७.)

इत्युक्तत्वात् । असवर्णायां जातस्तु स्वांशमेव पित्र्याल्लभते मातृकं तु सर्वमेव । अतएव मनुः—

'ऊर्ध्वं विभागाज्जातस्तु पित्र्यमेव हरेद्धनम्' ।

(म. स्मृ. ९. २१६.)

इति । पित्रोरिदं पित्र्यम् ।

'अनीशाः[1] पूर्वजाः पित्रोः भ्रातृभागे विभक्तजाः' ।

इति । स्मरणात् । मातापित्रोर्भागे विभागात्पूर्वमुत्पन्नो न स्वामी पित्रा सह पूर्वं विभक्तत्वात् । विभक्तजश्च भ्रातुर्धने[2] न स्वामीत्यर्थः । विभागोत्तरकालं पित्रा स्वयमार्जितं विभागोत्तरकालमुत्पन्नस्यैव । तथा च मनुः—

"पुत्रैः सह विभक्तेन पित्रा यत् स्वयमार्जितम् ।

विभक्तजस्य तत्सर्वमनीशाः पूर्वजाः[3] स्मृताः ।

इति । ये च विभक्ताः पुनः पित्रा सह संसृष्टास्तेषां विभागोत्तरकालमुत्पन्नेन[4] सह विभागोऽस्तीत्याह मनुः—

---

१. C. reads in singular form अनीशः पूर्वजः and विभक्तजः. २. B. substitutes भागे for धने, and C. reads विभक्तजस्तु तद्धनःस्वामी. ३. B. originally reads पूर्व एवच and in margin पूर्वजाः स्मृताः. ४. B. reads उत्पन्नो यस्तेन सह.

tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg

'संसृष्टास्तेन वा ये स्युर्विभजेत स तैः सह'।
(म. स्मृ. ९. २१६.)

इति। अजीवद्विभागोत्तरकालं जातस्य पुत्रस्य भागकल्पनामाह याज्ञवल्क्यः—

'दृश्याद्वा तद्विभागः स्यादायव्ययविशोधितात्'।
(या. स्मृ. २. १२२.)

इति। पितरि मृते भ्रातृविभागसमयेऽस्पष्टगर्भायां मातरि भ्रातृविभागोत्तरकालमुत्पन्नस्य विभागः दृश्याद्भ्रातृभिर्गृहीतादायव्ययविशोधितात् उपचयापचयाभ्यां अवधारितपरिमाणात् शोधिताद्धनात्किंचिदुद्धृत्य स्वांशसमो दातव्यः स्यादित्यर्थः।

* अत्र मेधातिथिः—विभागोत्तरकालं पित्रा यद्विभागे द्वयं गृहीतं द्वावंशौ प्रतिपद्येते तदेव सत्यां पितुरिच्छायां ग्रहीतव्यम्। पितुरूर्ध्वं वा न तत्र भ्रातृभिर्वाच्यं किमित्ययं द्वावंशौ गृह्णातीति अथ च नास्ति पितुरिच्छा तदा समं च स्वसमोऽस्य भाग उद्धर्तव्यः पितुरूर्ध्वं संसृष्टास्तेषामेव स पैतृकोंशस्तदुत्थं दद्यादपरेषां स्वांशं जातस्य च मृतस्य चेति जातस्य संसृष्टिन एव दद्युः पितुरूर्ध्वं तदीयमंशं च त एवमेव विभक्ताः सह इत्यनयानुबुद्ध्या भगिन्या आप्रसवान्नैव विभागोऽस्तीति वसिष्ठेन दर्शितम्।

† आयः प्रतिदिवसं प्रतिमासं प्रत्यब्दं वा यदुत्पद्यते। व्ययः पितृकृतर्णापाकरणं ताभ्यां आयव्ययाभ्यां यच्छोधितं तस्माद्धनात् उद्धृत्य विभागानन्तरजातस्य भ्रातुः भागो दातव्यः। एतदुक्तं भवति। प्रातिस्विकेषु भागेषु तदुत्थमायं प्रवेश्य पितृकृतं च ऋणमपनीय अवशिष्टेभ्यः स्वेभ्यः स्वेभ्यो भागेभ्यः किंचित् किंचित् उद्धृत्य विभागानन्तरजस्य स्वसमानभागः कार्यः इति।

१. C. reads संबन्धादि तत्परिमाणात् and does not repeat किंचित् while D. omits अवधारितपरिमाणात.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

itized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant-2 Equipment Heritage Foundation, Jalga

एतच्च मृतभ्रातृभार्यायामपि विभागसमये अस्पष्टगर्भायां विभागादूर्ध्वमुत्पन्नस्यापि वेदितव्यम् । स्पष्टगर्भायां तु प्रसवं प्रतीक्ष्यैव विभागः कर्तव्यः ।

'अथ भ्रातृणां दायविभागो याश्चानपत्याः स्त्रियस्तासामापुत्रलाभात्' ।

(व. स्मृ. १७. ४०–४१.)

इति वसिष्ठस्मरणात् । विभक्तेभ्यः पितृभ्यामर्थदाने विभक्तजस्य पुत्रस्य निषेधाधिकारो नास्ति दत्तं च तेन न प्रत्याहर्तव्यमित्याह याज्ञवल्क्यः—

'पितृभ्यां यस्य यद्दत्तं तत्तस्यैव धनं भवेत्' ।

(या. स्मृ. २. १२३.)

इति । अजीवद्विभागे मातुरंशकल्पनामाह याज्ञवल्क्यः—

'पितुरूर्ध्वं विभजतां माताप्यंशं समं हरेत्' ।

(या. स्मृ. २. १२३.)

इति । एतच्च स्त्रीधनस्य अप्रदाने वेदितव्यम् । दत्ते त्वर्धमेव ।

---

§ विभक्ताभ्यां मातापितृभ्यां पूर्वं विभक्तस्य पुत्रस्य यद् अलंकारादि दत्तं भवेत् तत्तस्यैव पुत्रस्य स्यात् न विभक्तजस्य स्वं भवति । न्यायसाम्यात् विभागात् प्रागपि यस्य यद्दत्तं तत्तस्यैव । तथा सति विभक्तजे विभक्तयोः पित्रोरंशं तदूर्ध्वं विभजतां यस्य यद्दत्तं तत्तस्यैव नान्यस्य इति वेदितव्यम् ।

---

१. A. omits स्त्रियः. २. B. reads भरणादि° for अर्थ°. ३. C. substitutes वेतनम् for दत्तं च तेन.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

tized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant-2 Equipment Heritage Foundation, Jalg

'दत्ते त्वर्धांशहारिणी'[1]

(या. स्मृ. २. १४८.)

इति स्मरणात्। अत एव स्मृत्यन्तरम्

'जनन्यस्वधना[2] पुत्रैर्विभागेंशं[3] समं हरेत्'।

इति। अस्वधना प्रातिस्विकस्त्रीधनशून्या जननी पुत्रैर्विभागे क्रियमाणे पुत्रांशसममंशं[4] हरेदित्यर्थः। जननीग्रहणं सापत्न्यादेरुपलक्षणार्थम् तथाच व्यासः—

'असुतास्तु पितुः पत्न्यः समानांशाः प्रकीर्तिताः।
पितामह्यश्च सर्वास्ता मातृतुल्याः प्रकीर्तिताः'।

इति। यत्तु कैश्चिदुक्तं माताप्यंशं समं हरेदिति जीवनोपयुक्तमेव धनं माता स्वीकरोति इति। तन्न। अंशसमं[5]शब्दयोरानर्थक्यप्रसङ्गात्। अथोच्येत बहुधने जीवनोपयुक्तं गृह्णाति स्वल्पधने पुत्रसमांशमिति। तदपि न। विधिवैषम्यप्रसङ्गात्। भिन्नमातृकाणां सवर्णानां समसंख्यानां विभागप्रकारमाह व्यासः—

---

१. The text of याज्ञवल्क्य reads अर्धं प्रकीर्तितम् for अर्धांशहारिणी; our commentator does not mention the name of the text from which he quoted this sentence, but it appears in the text of याज्ञवल्क्य, and elsewhere he also mentions the same name. २. D. reads अपधना for अस्वधना. ३. B. reads अनन्यस्वधना while D. reads अपधना. ४. B. omits अंशम्. ५. C. reads तनयांशस्य समशब्दयोरग्राह्य°.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

itized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

समानजातिसंख्या ये जातास्त्वेकेन सूनवः ।
विभिन्नमातृकास्तेषां मातृभागः प्रशस्यते[¶] ।

इति । बृहस्पतिरपि—

‘ येद्येकजाता[1] बहवः समाना जातिसंख्यया ।
स्वैधनैस्तै[2]र्विभक्तव्यं मातृभागेन धर्मतः ’ ॥

इति । विषमसंख्यानां तु विभागं स एवाह—
‘ सवर्णलिङ्गसंख्या[3] ये विभागस्तेषु[4] शस्यते ’ ।

इति । विभिन्न[5]जातीनां पुत्राणां विभागप्रकारमाह याज्ञवल्क्यः—

‘ *चतुस्त्रिद्व्येकभागाः स्युर्वर्णशो ब्राह्मणात्मजाः ।
क्षत्रजास्त्रिद्व्येकभागा विड्जास्तु द्व्येकभागिनः’ ।
(या. स्मृ. २. १२५.)

¶ अयमाशयः—एकस्यां स्त्रियां यावन्तः पुत्रा जाताः तावन्त एव अपरस्यामपि जाताश्चेत् तदा मातुरेवायं विभाग इति कृत्वा तैः मातृभागं पृथक्कृत्य स्वविभागाः कर्तव्याः ।

* अस्यायमर्थः–तिस्रो वर्णानुपूर्व्येणेति ब्राह्मणस्य चतस्रः क्षत्रियस्य तिस्रो वैश्यस्य द्वे शूद्रस्यैकेति भार्या दर्शितास्तत्र ब्राह्मणात्मजा ब्राह्मणोत्पन्ना वर्णशः वर्णशब्देन ब्राह्मणादिवर्णाः स्त्रिय उच्यन्ते संख्यैकवचनाच्च वीप्सायामित्यधिकरणकारकादेकवचनाद्वीप्सायां शस् । अतश्च वर्णे वर्णे ब्राह्मणोत्पन्ना यथाक्रमं चतुस्त्रिद्व्येकभागाः स्युर्भवेयुः । एतदुक्तं

१. B. originally reads यथैकजाता and gives in margin as यद्येकजाता. २. B. originally साधनैः and in margin स्वधनैः; C. and D. read सधनैः. ३. B. reads °भिन्न° for °लिङ्ग°. ४. B. originally reads पूंसांशास्तेषु and corrects पुंभागस्तेषु. ५. C. and D. read भिन्न° for विभिन्न° and omit प्रकारम्.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

tized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalg

इति । वर्णशो ब्राह्मणात्मजाः ब्राह्मणादिवर्णस्त्रीषु ब्राह्मणेनोत्पन्ना ब्राह्मणमूर्धावसिक्ताम्बष्ठनिषादाः । यथाक्रमं प्रत्येकं चतुस्त्रिद्व्येकभागा भवेयुः । क्षत्रियादिवर्णस्त्रीषु क्षत्रियेणोत्पन्नाः क्षत्रियमाहिष्योग्रास्त्रिद्व्येकभागाः । वैश्येन वैश्याशूद्रोत्पन्नौ वैश्यकरणौ द्व्येकभागिनौ शूद्रस्यैकैव भार्येति भिन्नजातीयपुत्राभावात् तत्पुत्राणां पूर्वोक्त एक एव विभागः । मनुरपि-

'ब्राह्मणस्यानुपूर्व्येण चतस्रस्तु यदि स्त्रियः ।
तासां[§] पुत्रेषु जातेषु विभागेऽयं विधिः स्मृतः' ॥

भवति । ब्राह्मणेन ब्राह्मण्यामुत्पन्ना एकैकशश्चतुरश्चतुरो भागांल्लभन्ते । तेनैव क्षत्रियायामुत्पन्नाः प्रत्येकं त्रींस्त्रीन् भागान् लभन्ते । वैश्यायां द्वौ द्वौ शूद्रायामेकमेकमिति । क्षत्रजाः क्षत्रियेणोत्पन्नाः वर्णशः इत्यनुवर्तते । यथाक्रमं त्रिद्व्येकभागाः क्षत्रियेण क्षत्रियायामुत्पन्नाः प्रत्येकं त्रीन् त्रीन् भागान् लभन्ते । वैश्यायां द्वौ द्वौ शूद्रायामेकमेकम् । विड्जाः वैश्येनोत्पन्नाः अत्रापि वर्णश इत्यनुवर्तते यथाक्रमं द्व्येकभागिनः वैश्येन वैश्यायामुत्पन्नाः प्रत्येकं द्वौ द्वौ भागौ लभन्ते । शूद्रायामेकमेकम् । शूद्रस्यैकैवभार्येति भिन्नजातीयपुत्राभावात्तत्पुत्राणां पूर्वोक्त एव विभागः । यद्यपि चतुस्त्रिद्व्येक इत्यविशेषेणोक्तं तथापि प्रतिग्रहप्राप्तभूव्यतिरिक्तविषयमिदं द्रष्टव्यम् ।

§ सार्धसप्तधा विभक्तस्य धनस्य त्रीनंशान् ब्राह्मणीपुत्रः द्वौ क्षत्रियासुतः सार्धं वैश्यापुत्रः एकं शूद्रासुतः अनया रीत्या पितृद्रव्यं विभजेयुः । एवंच सति यत्र ब्राह्मणीक्षत्रियापुत्रौ द्वावेव विद्येते तत्र पञ्चधा कृते धने त्रयोभागा ब्राह्मणस्य द्वौ क्षत्रियापुत्रस्य । तथाच यत्र ब्राह्मणीवैश्यापुत्रौ तत्र सार्धचतुर्धा विभक्तस्य धनस्य भागत्रयं ब्राह्मणीपुत्रः सार्धभागं वैश्यपुत्रः । अनयैव दिशा ब्राह्मणीशूद्रापुत्रादौ क्षत्रियाशूद्रापुत्रादौ यथायथं विभागनियमः अनुसंधेयः ।

---

१. D. वैश्यायामुत्पन्नौ. २. Except A. all others omit this.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

itized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

'त्र्यंशं दायाद्धरेद्विप्रो द्वावंशौ क्षत्रियासुतः ।
वैश्याजः सार्धमेवांशमंशं शूद्रासुतो हरेत्' ॥
'सर्वं वा ऋक्थजातं तद्दशधा प्रविभज्य तु ।
धर्म्यं विभागं कुर्वीत विधिनाऽनेन धर्मवित्' ॥
'चतुरोंऽशान् हरेद्विप्रः त्रीनंशान् क्षत्रियासुतः ।
वैश्यापुत्रो हरेद् द्व्यंशं एकं शूद्रासुतो हरेत्' ॥
(म. स्मृ. ९. १४९, १५१–१५३.)

इति । एतच्च प्रतिग्रहप्राप्तभूम्यतिरिक्तविषयम् । अत एव बृहस्पतिः—

'न प्रतिग्रहभूर्देया क्षत्रियादिसुताय वै ।
यद्यप्येषां पिता दद्यान्मृते विप्रासुतो हरेत्' ।

इति । प्रतिग्रहविशेषणसामर्थ्यात् क्रयादिलब्धा भूः क्षत्रियादिसुतानामपि भवत्येव । शूद्रापुत्रस्य विशेषप्रतिषेधाच्च ।

---

† चतसृणां विषमानेकपुत्रत्वे विप्रापुत्रलभ्यभागात्पादहीनः प्रत्येकः क्षत्रियासुतानामेवं वैश्यासुतानामर्धं शूद्रासुतानां पाद इति यथाविधि भागः पतति तथा विभजनीयमित्यर्थाल्लभ्यते । यदातु ब्राह्मणीक्षत्रिययोरेवापत्यानि तदा सप्तांशतां कृत्वा चतुरोंशानित्यादि । यदातु ब्रह्मविजातीयभार्यात्रयपुत्रास्तदा नवांशान्कल्पयित्वा । एवं ब्राह्मणीवैश्याशूद्रापुत्रेषु सत्सु सप्तांशान् । विप्राशूद्रापुत्रेषु सत्सु पञ्चेत्याद्यूह्यम् । एवं क्षत्रियस्य क्षत्रविट्शूद्रजातिभार्यात्रयपुत्रेषु सत्सु त्रयो द्वावेकांश इति षडंशा इत्यादि व्यवस्थोहनीया ।

---

१. Except A. all others do not insert this verse. २. B. C. and D. substitute तु for तत्. ३. A. reads परिकल्प्य च for प्रविभज्य तु. ४. B. and C. read अंशम् for एकम्.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

zed by eGangotri/Sarayu Trust. Funding IKS-MoE Grant-2 Equipment Heritage Foundation, Ja

'शूद्रयां द्विजातिभिर्जातो न भूमेर्भागमर्हति'।

इति। यत्तु मनुवचनम्—

'ब्राह्मणक्षत्रियविशां शूद्रापुत्रो न ऋक्थभाक्।
यदेवास्य पिता दद्यात्तदेवास्य धनं भवेत्'॥

(म. स्मृ. ९. १९९.)

¶ अत्र मेधातिथिः—न रिक्थभाग् द्विजातीनां शूद्रापुत्रः किं सदा नेत्याह। यदेवास्य पिता दद्यात्तदास्य पित्रा दशमांशकल्पना कृता तदेव तत्तस्य तदधिकं पैतृकं नान्यल्लभते। तत्रापि शंखेनोक्तं न शूद्रा-पुत्रोऽर्थभागी। यदेवास्य पिता दद्यात् स एव तस्य भागो गोमिथुनं त्व-परं दद्युर्विभागकाले भ्रातर इति वाक्यशेषः। अन्ये त्वनूढायाः शूद्रायाः पुत्रस्येमं विधिमिच्छन्ति। न ह्यत्र विवाहलिङ्गं किंचिदस्तीति। जाति-विशेषवचनः शूद्राशब्दोऽतो यदेवास्य पिता दद्यात् अतो यदस्य प्रजीवनं पित्रा दत्तं तदेव दातव्यम्। अथ तेन का विभागकल्पना कृता यावज्जीवं जीवनाय तदा तदेवास्य धनं न भ्रातृभिः किंचिद्दातव्यम्। यथा गौतमः शूद्रापुत्रप्रकरण एवाह। अपरिगृहीतास्वपि शुश्रूषा चेल्लभेत वृत्तिमूल-मन्तेवासिविधिनेति। तेषां मते क्षत्रियवैश्ययोरनूढयोर्जाता रिक्थहराः प्राप्नुवन्ति तत्र च कियानंश इति न ज्ञायते यावानंश ऊढयोरिति चे-त्तत्रापि नोढाग्रहणं न लिङ्गं वचनं वास्ति। एक एवौरसः पुत्र इति धर्म-पत्नीष्वौरसो न चानूढयोर्जातानामौरसलक्षणमस्ति उक्तं च अनियुक्ता-सुतश्चैवेत्यादि अभ्रातृजायाविषयमेतत्। तत्र किल नियोगे विहतेऽनि-युक्तासुत इति प्रतिषेधेऽपि तद्विषया बुद्धिरुपजायते अत्राप्यस्ति तर्हि जातमात्रेष्विति तस्मात्परस्त्रीषु नियोगेन विनाऽनियुक्तासुताः सर्वेषां च तेषां प्रजीवनमुक्तम्।

१. The commentator does not mention the name of the work from which he quoted this but the व्यवहारमयूख says this line is from देवल.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

itized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

इति । तत्प्रीति[1]दत्तधनसद्भावविषयं इत्यविरुद्धम् । आनुलोम्येन जातस्यैकपुत्रस्य ऋक्थग्रहणप्रकारमाह देवलः[2]—

'आनुलोम्यै[3]कपुत्रस्तु पितुः सर्वस्वभाग्भवेत्' ।

इति । एतच्च निषादव्यतिरिक्तविषयम् । अतएवोक्तं तेनैव—

'निषाद एकपुत्रस्तु विप्रस्वस्य तृतीयभाक् ।
द्वौ सपिण्डः सकुल्यो वा स्वधादाता तु [4]स्वं हरेत्' ।

इति । यत्तु मनुवचनम्—

'यद्यपि स्यात्तु सत्पुत्रो [5]यद्यपुत्रोऽपि वा भवेत् ।
नाधिकं दशमाद्द्याच्छूद्रापुत्राय धर्मतः' ॥
(म. स्मृ. ९. १५४.)

इति । *तदशुश्रूषुशूद्रापुत्रविषयम् । क्षत्रियेण वैश्येन वा शूद्रायामुत्पन्नः एकः पुत्रः अर्धमेव हरेत् न निषादवत्तृतीयमंशम् । तथा[6]च विष्णुः—

---

* मेधातिथिस्तु एवं न मन्यते । यथा—

सत्पुत्रो विद्यमानपुत्रः ब्राह्मणीपुत्र एव वा विद्यमानो विवक्षितो न द्विजातिपुत्रमात्रमतश्चासति ब्राह्मणपुत्रे क्षत्रियवैश्ययोः सतोरप्यष्टमांशं लभते केवले च वैश्यपुत्रे तृतीयं अन्ये त्वविशेषेण द्विजातिपुत्राभावे पुत्रपदेनोक्त इत्याहुः अस्मिन्पक्षे सपिण्डगामिदशमांशशेषं धनं इयंतु द्रष्ट्रव्यवस्था बहुवचनं योगक्षेमे तदा दशमांशं हरेच्छौद्रः । अथ कतिपयंजनजीवनपर्याप्तं तदा शूद्रपुत्रस्यैव क्षत्रियादीनां समानभाव-

---

१. B. originally reads तदपि पितृदत्त° and gives in margin तत्प्रतिदत्त°. २. B. originally reads नारदः and gives in margin देवलः. ३. D. reads आनुलोम्येन for आनुलोम्यैक°. ४. D. reads संहरेत् for स्वं हरेत्. ५. The text (Mandlik's edition) reads तसत्पुत्रो but it seems incorrect; it may be असत्पुत्रो (ऽप्यसत्पुत्रो Nirṇayasâgara edition.) ६. D. omits च and C. and D. read बृहद्विष्णुः.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

'द्विजातीनां शौद्रस्त्वेकः पुत्रोऽर्धहरः ।
अपुत्रस्य ऋक्थस्य या गतिः सा भागार्धस्य' ।
(वि. स्मृ. १८. ३२-३३.)

इति । प्रत्यासन्नसपिण्डस्यान्यदर्धं भवतीत्यर्थः । अजीवद्विभागे केषुचित् भ्रातृष्वसंस्कृतेषु भगिनीषु वाऽसंस्कृतासु तत्संस्कारः पूर्वसंस्कृतैर्भ्रातृभिः कर्तव्य इत्याह व्यासः—

'असंस्कृतास्तु ये तत्र पैतृकादेव ते धनात् ।
संस्कार्या भ्रातृभिः ज्येष्ठैः कन्यकाश्च यथाविधि' ।

जातीयास्त्रीजातानां स्मृत्यन्तरे विधिर्दर्शितः॥ क्षत्रजास्त्रिद्व्येकभागा विड्जाः स्युर्द्व्येकभागिनः॥ क्षत्रियाजातास्वजातीयविजातीयासु शूद्रपर्यन्तासु वर्णक्रमेण त्र्यादिभागहराः तदा तेन स्वधनं क्षत्रियस्य शूद्राः षष्ठमंशं लभन्ते विशश्च तृतीयम् । अन्येत्वस्य श्लोकस्य सामर्थ्यमाहुः । शूद्रपुत्राय यदा ददाति तदानेन धनं संकलय्य दशांशो दातव्यो न तदधिकः सत्यपि स्वातन्त्र्ये । यथा वक्ष्यति यदेवास्य पिता दद्यादिति अस्मिन्पक्षे सपुत्रो दद्यादिति समानाधिकरणे पदे उपपन्नतरे इतरथा यस्य सदसत्पुत्रः। पिता स दद्यादिति संबन्धो दुःश्लिष्टः स्यात् । सपुत्रपदेनास्य पुत्रादेरभिधानं दद्यादिति जीवतः पुत्रसपिण्डादेः । ततश्च यदि क्षत्रियवैश्यापुत्रौ न स्तः केवलौ ब्राह्मणशूद्रौ तदा न शूद्रस्य दशम एवांशः किं तर्ह्यत्यल्पं नाधिकतरं धनं लभते यत्र दश गावः सन्ति तत्र चतस्रो ब्राह्मणस्यैका शूद्रस्य पञ्च क्षत्रियवैश्ययोः। यदा तौ न स्तः तदा पञ्च गावस्तयैव कल्पनया ब्राह्मणशूद्राभ्यां विभजनीयाः। यदि सर्वा ब्राह्मण आदद्यान्न चांशहरः स्यान्न चतुरंशहरस्तस्माच्चतुरोंशान्हरेदिति चतुर्षु भ्रातृषु सत्सु कल्पना । शूद्रस्यापि दशमांशहरत्वं चतुर्ष्वेव द्वयोस्त्रिषु चतुर्षूभयोर्भागाधिक्यम् ॥

१. D. reads शूद्रः for शौद्रः. २. B. reads अर्धं हरेत् for अर्धहरः. ३. B. reads पुत्रस्य, while C. omits this. ४. B. originally reads सभागस्यार्धस्य and gives in margin सा भागार्धस्य.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

itized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

इति । भगिनीसंस्कारे तु[1] विशेषमाह याज्ञवल्क्यः—

'असंस्कृतास्तु संस्कार्या भ्रातृभिः पूर्वसंस्कृतैः ।
भगिन्यश्च निजादंशाद्दत्त्वा त्वंशं तुरीयकम्' ॥

(या. स्मृ. २. १२४.)

इति । पितुरूर्ध्वं विभजद्भिर्भ्रातृभिरसंस्कृता भ्रातरः समुदायद्रव्येण संस्कर्तव्याः । भगिन्यश्चासंस्कृताः निजादंशाद्यज्जातीया कन्यका तज्जातीयपुत्रभागात्तुरीयं चतुर्थं भागं दत्वा संस्कर्तव्याः । अनेन पितुरूर्ध्वं दुहितरोऽप्यंशभागिन्य इति गम्यते । अत एव मनुः—

'स्वेभ्योंऽ[2]शेभ्यस्तु कन्याभ्यः स्वं दद्युर्भ्रातरः पृथक् ।
स्वात् स्वादंशाच्चतुर्भागं पतिताः स्युरदित्सवः' ।

(म. स्मृ. ९. ११८).

इति । ब्राह्मणादयो भ्रातरः ब्राह्मण्यादिभ्यो भगिनीभ्यो स्वे[3]जातिविहितेभ्योंऽशेभ्यः स्वात् स्वादंशादात्मीयाद्भागाच्च[4]तुर्थं चतुर्थं भागं दद्युः ।

एतदुक्तं भवति । यदि कस्यचिद्ब्राह्मण्येव पत्नी पुत्रश्चैकः कन्या चैका तत्र पित्र्यं द्रव्यं द्वेधा विभज्य तत्रैकं भागं चतुर्धा विभज्य तुरीयांशं कन्यायै दत्वा शेषं पुत्रो गृह्णीयात् । अथ द्वौ पुत्रौ कन्या चैका तदा पितृधनं त्रेधा विभज्य तत्रैकं भागं चतुर्धा विभज्य तुरीयांशं कन्यायै दत्वा शेषं द्वौ पुत्रौ विभज्य गृह्णीतः । अथ त्वेकः पुत्रः द्वे कन्ये तदा पित्र्यं

१. B. and C. omit तु. २. C. and D. read तेभ्यः for स्वेभ्यः.
३. D. reads द्विजाति° for स्वजाति°. ४. D. reads चतुर्थभागं दद्युः.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

धनं त्रिधा विभज्य तत्रैकं भागं चतुर्धा विभज्य द्वौ भागौ द्वाभ्यां कन्याभ्यां दत्वाऽवशिष्टं सर्वं पुत्रो गृह्णाति । एवं समानजातीयेषु समविषमेषु भ्रातृषु भगिनीषु च समविषमासु योजनीयम् ।

यदा तु ब्राह्मणीपुत्र एकः क्षत्रियाकन्या चैका तत्र पित्र्यं द्रव्यं सप्तधा विभज्य क्षत्रियापुत्रभागान् त्रीन् चतुर्धा विभज्य तुरीयांशं क्षत्रियाकन्यायै दत्वा शेषं ब्राह्मणीपुत्रो गृह्णाति । यदा तु द्वौ ब्राह्मणीपुत्रौ क्षत्रियाकन्यैका तत्र पित्र्यं धनमेकादशधा विभज्य तेषु त्रीन् भागान् चतुर्धा विभज्य चतुर्थमंशं क्षत्रियाकन्यायै दत्वा शेषं सर्वं ब्राह्मणीपुत्रौ विभज्य गृह्णीयाताम् ।

एवं जातिवैषम्ये भ्रातॄणां भगिनीनां च संख्यया वैषम्ये च सर्वत्रायं नियम[1] इति मेधातिथिव्याख्यानम् । एतदेव विज्ञानेश्वरयोगिनोऽप्यभिप्रेतम्[2] । भारुचिस्तु । चतुर्भागपदेन विवाहसंस्कारमात्रोपयोगि द्रव्यं विवक्षितम् । अतो दायभाक्त्वमसंस्कृतकन्यानां नास्तीति मन्यते । एतदेव चन्द्रिकाकारस्याप्यभिप्रेतम् तदाह[3] । 'यत[4] एव न दायभागार्थमंशहरणं किन्तु विवाहसंस्कारार्थम्' । अत एव देवलेनोक्तम्—

'कन्याभ्यश्च पितृद्रव्यं देयं वैवाहिकं वसु' ।

१. B. and C. read ऊहनीयम् for अयं नियमः. २. B. and C. read अभिमतम् for अभिप्रेतम्. ३. B. gives marginal reading तथाहि for तदाह. ४. B. and C. substitute अ° for य°.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

itized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

इति। अत्र यद्युक्तियुक्तं तद्ग्राह्यम्। जीवद्विभागे तु यत्किञ्चित्पिता ददाति तदेव लभते कन्या विशेषाश्रवणात्। पित्र्यधनाभावे नारदः—

'अविद्यमाने पित्र्येऽर्थे स्वांशादुद्धृत्य वा पुनः।
अवश्यकार्याः संस्काराः सङ्कोचोऽत्र विवक्षितः'॥

(ना. स्मृ. १३–३४.)

इति। भ्रातॄणां भगिनीनां च संस्काराः जातकर्माद्याः पूर्वसंस्कृतैः भ्रातृभिः पितृधनाभावेऽपि सावश्यकत्वेन कर्तव्याः। पैतृकद्रव्यविभागकाले स्वधृतालंकारादिकमपि कन्यका प्राप्नोतीत्याह शङ्खः—

'विभज्यमाने दाये कन्यालंकारमेव हि'।
वैवाहिकं स्त्रीधनं च लभते।

इति। मुख्यगौणपुत्राणां स्वरूपं दायग्रहणक्रमं चाह याज्ञवल्क्यः—

* पित्र्यधनाभावे स्वार्जितेन भिक्षादिलब्धेन च अवश्यं संस्कारं कुर्यादिति न वाच्यम्। जीमूतवाहनेन तथा नाङ्गीकारात्। तथा हि तस्याशयः। येषां तु न कृताः..........॥ इति येषां तेषामिति पुल्लिंगपदघटितवचनेन भ्रातृसंस्कारस्यावश्यकत्वमुक्त्वा पैतृकधनाभावे भ्रातृसंस्कारनिर्वाहार्थमुपायकथनं नारदस्य। तथाच भ्रातृसंस्कारोपक्रमत्वात् उपसंहारेऽपि भ्रातृसंस्कार एव विषयः। न तु भगिनीसंस्कारः। इति नारदीयवचनयोर्भावः॥

१. The text of Jolly reads भ्रातॄणां पूर्वसंस्कृतैः. २. D. reads °दत्ता°, for धृता°, while C. °वृता° for the same. ३. D. reads विभज्यमाने वै दाये कन्यालंकारमेव हि giving it the form of a verse, and omitting वैवाहिकं reads किंचित्स्त्रीधनं च लभते, separately from the above quotation. ४. C. reads त्रैरूपम् for स्वरूपम्.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

§ ' औरसो धर्मपत्नीजः तत्सम[1]ः पुत्रिकासुतः ।
क्षेत्रजः क्षेत्रजातस्तु सगोत्रेणेतरेण वा ॥
गृहे प्रच्छन्न उत्पन्नो गूढजस्तु सुतः स्मृतः ।
कानीनः कन्यकाजातो मातामहसुतो मतः ॥

§ अस्यायमर्थः—उरसो जात औरसः पुत्रः स च धर्मपत्नीजः धर्मविवाहोढा धर्मपत्नी तस्यां जात औरसः पुत्रो मुख्यः। तत्समः पुत्रिकासुतः तत्सम औरससमः पुत्रिकायाः सुतः पुत्रिकासुतः। अत एव औरससमः। यथाह वसिष्ठः—

'अभ्रातृकां प्रदास्यामि तुभ्यं कन्यामलंकृताम् ।
अस्यां यो जायते पुत्रः स मे पुत्रो भवेदिति ' ॥

(व. स्मृ. १७, १७.)

अथवा पुत्रिकेव सुतः पुत्रिकासुतः सोऽप्यौरससम एव पित्रवयवानामल्पत्वात् मात्रवयवानां बाहुल्याच्च। यथाह वसिष्ठः—

'तृतीयः पुत्रिकैवेति ।*

तृतीयः पुत्रः पुत्रिकैवेत्यर्थः। द्व्यामुष्यायणस्तु जनकस्य औरसादपकृष्टोऽन्यक्षेत्रोत्पन्नत्वात्। क्षेत्रजः क्षेत्रजातस्तु सगोत्रेणेतरेण वा। इतरेण असपिण्डेन देवरेण वा उत्पन्नः पुत्रः क्षेत्रजः॥

गूढजः पुत्रो भर्तृगृहे प्रच्छन्न उत्पन्नो हीनाधिकजातीयपुरुषजत्वपरिहारेण पुरुषविशेषजत्वनिश्चयाभावेऽपि सवर्णजत्वनिश्चये सति बोद्धव्यः। कानीनस्तु कन्यकायामुत्पन्नः पूर्ववत्सवर्णात्स मातामहस्य पुत्रः। यद्यनूढा सा भवेत्तथा पितृगृह एव संस्थिता। अथोढा तदा वोढुरेव पुत्रः। यथाह मनुः—

१. B. originally reads तत्सुतः but in margin तत्समः.

* विज्ञानेश्वर reads द्वितीयः पुत्रिकैवेति but the text तृतीयः पुत्रिका विज्ञायते. This must therefore have been the correct form.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

itized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant2 Equipment Heritage Foundation, Jalga

अक्षतायां क्षतायां वा जातः पौनर्भवः स्मृतः ।
दद्यान्माता पिता वा यं स पुत्रो दत्तको भवेत् ॥
क्रीतश्च ताभ्यां विक्रीतः कृत्रिमः स्यात्स्वयंकृतः ।
दत्तात्मा तु स्वयंदत्तो गर्भे विन्नः[१] सहोढजः ॥
उत्सृष्टो गृह्यते यस्तु सोऽपविद्धो भवेत्सुतः ।
पिण्डदोंऽशहरश्चैषां पूर्वाभावे परः परः ' ॥
(या. स्मृ. २. १२८–१३२.)

' पितृवेश्मनि कन्या तु यं पुत्रं जनयेद्रहः ।
तं कानीनं वदेन्नाम्ना वोढुः कन्यासमुद्भवम् ' ॥
(म. स्मृ. ९. १७२.)

पौनर्भवस्तु पुत्रोऽक्षतायां क्षतायां वा पुनर्भ्वां सवर्णादुत्पन्नः । मात्रा भर्त्रनुज्ञया प्रोषिते प्रेते वा भर्तरि पित्रा वोभाभ्यां वा सवर्णाय यस्मै दीयते स तस्य दत्तकः पुत्रः । यथाह मनुः—

' माता पिता वा दद्यातां यमद्भिः पुत्रमापदि ।
सदृशं प्रीतिसंयुक्तं स ज्ञेयो दत्रिमः सुतः ' ॥
(म. स्मृ. ९. १६८.)

इति । आपद्ग्रहणादनापदि न देयः । दातुरयं प्रतिषेधः । तथा एकपुत्रो न देयः । न त्वेवैकं पुत्रं दद्यात् प्रतिगृह्णीयाद्वेति वसिष्ठस्मरणात् । तथानेकपुत्रसद्भावेऽपि ज्येष्ठो न देयः ।

' ज्येष्ठेन जातमात्रेण पुत्रीभवति मानवः ' ।
(म. स्मृ. ९. १०६.)

इति । तस्यैव पुत्रकार्यकरणे मुख्यत्वात् । पुत्रप्रतिग्रहप्रकारश्च ' पुत्रं प्रतिग्रहीष्यन्बन्धूनाहूय राजनि चावेद्य निवेशनमध्ये व्याहृतिभिर्हुत्वा अदूरबान्धवं बन्धुसंनिकृष्ट एव प्रतिगृह्णीयात् ' इति वसिष्ठेनोक्तः । अदूरबान्धवमित्यत्यन्तदेशभाषाविप्रकृष्टस्य प्रतिषेधः । एवं क्रीतस्वयंदत्तकृत्रिमेष्वपि योजनीयम् । समानन्यायत्वात् ।

---

१. A. and the text of याज्ञवल्क्य read भिन्नः for विन्नः.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

zed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

इति। एषां पुत्राणां द्वादशानां पूर्वस्य[1] पूर्वस्याभावे उत्तर उत्तरः[2] पिण्डदः श्राद्धदः अंशहरो धनहर इत्यर्थः। औरस-पुत्रिकयोः[3] समवाये औरसस्यैव धनग्रहणे प्राप्ते अपवाद-माह मनुः—

'पुत्रिकायां कृतायां तु यदि पुत्रोऽनु[4] जायते।
समस्तत्र विभागः स्याज्ज्येष्ठता नास्ति हि स्त्रियाः'॥

(म. स्मृ. ९. १३४.)

इति। वसिष्ठोऽपि क्वचिदपवादमाह—

क्रीतस्तु पुत्रस्ताभ्यां मातापितृभ्यां मात्रा पित्रा वा विक्रीतः पूर्ववत् तथैकं ज्येष्ठं च पुत्रं वर्जयित्वा आपदि सवर्ण इत्येव। यत्तु मनुनोक्तम्—

'क्रीणीयाद्यस्त्वपत्यार्थं मातापित्रोर्यमन्तिकात्।
स क्रीतकः सुतस्तस्य सदृशोऽसदृशोऽपि वा'॥

(म. स्मृ. ९. १७४.)

इति। तद्गुणैः सदृशोऽसदृशो वेति व्याख्येयम्। न जात्या। 'सजातीयेष्वयं प्रोक्तस्तनयेषु' इत्युपसंहारात्। कृत्रिमः स्यात्स्वयंकृतः। कृत्रिमस्तु पुत्रः स्वयं पुत्रार्थिना धनक्षेत्रप्रदर्शनादिप्रलोभनैव पुत्रीकृतो मातापितृविहीनः। तत्सद्भावे तत्परतन्त्रत्वात्। दत्तात्मा तु पुत्रो यो मातापितृविहीनस्ताभ्यां त्यक्तो वा तवाहं पुत्रो भवामीति स्वयं दत्तत्व-मुपगतः। सहोढजस्तु गर्भे स्थितो गर्भिण्यां परिणीतायां यः परिणीतः स वोढुः पुत्रः।

अपविद्धो मातापितृभ्यामुत्सृष्टो यो गृह्यते स ग्रहीतुः पुत्रः सर्वत्र सवर्ण इत्येव॥

---

१. B. originally reads पुत्रस्य and gives in margin पूर्वस्य, but does not repeat this word. २. C. does not repeat this word. ३. B. and C. read पौत्रिकयोः for पुत्रिकयोः. ४. C. substitutes न for ऽनु.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

itized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

'तस्मिंश्चेत्प्रतिगृहीते औरस[1] उत्पद्येत ।
चतुर्थभागभागी स्याद्दत्तकः' ।

(व. स्मृ. १५. ९.)

इति ।

कात्यायनोऽपि—

'उत्पन्ने त्वौरसे पुत्रे चतुर्थांशहराः सुताः ।
सवर्णा असवर्णा वा ग्रासाच्छादनभाजनाः' ॥

इति । सवर्णाः क्षेत्रजदत्तकादयः । ते औरसे सत्यपि चतुर्थांशहराः । असवर्णाः कानीनगूढोत्पन्नसहोढपौनर्भवाः औरसे सति न चतुर्थांशहराः अपि तु ग्रासाच्छादनमेव लभन्ते इत्यर्थः । यत्तु विष्णुनोक्तम्—

'अप्रशस्तास्तु कानीनगूढोत्पन्नसहोढजाः ।
पौनर्भवश्च ते नैव[2] पिण्डरिक्थांशभागिनः' ।

इति । तदौरसे सति चतुर्थांशनिषेधनपरमेव । यच्च मनुनोक्तम्—

*'एक एवौरसः पुत्रः पित्र्यस्य वसुनः प्रभुः ।
शेषाणामानृशंस्यार्थं प्रदद्यात्तु प्रजीवनम्[3]' ॥

(म. स्मृ. ९. १६३.)

* व्याध्यादिना प्रथमौरसपुत्राभावे क्षेत्रजादिषु कृतेषु पश्चादौषधादिना विगतव्याधेरौरस उत्पन्ने सतीदमुच्यते औरस एवैकः पुत्रः पितृधनस्वामी शेषाणां क्षेत्रजव्यतिरिक्तानां तस्य षष्ठांशादेर्वक्ष्यमाणत्वात्पापसंबन्धपरिहारार्थं ग्रासाच्छादनं दद्यात् ।

१. A. and the text of वसिष्ठ add पुत्रः after this word. २. B. reads नैवैते and C. reads नैतेपि for ते नैव. ३. B. reads तूपजीवनम् for °त्तु प्रजीवनम्.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

zed by eGangotri/Sarayu Trust. Funding IKS-MoE Grant-2 Equipment Heritage Foundation, Ja

इति। तदौरसप्रशंसापरमेव न चतुर्थांशभागनिषेधपरम्। अन्यथा चतुर्थांशभाक्त्वप्रतिपादकवसिष्ठकात्यायनवचनयोरानर्थक्यप्रसङ्गात्। यदपि च तेनैवोक्तम्—

'षष्ठं तु क्षेत्रज§स्यांशं प्रदद्यात्पैतृकाद्धनात्।
औरसो[२] विभजन् दायं पित्र्यं पञ्च[३]ममेव वा'॥

(म. स्मृ. ९. १६४.)

इति। तत्रेयं व्यवस्था। अत्यन्तगुणवत्त्वे चतुर्थांशभागित्वं प्रतिकूलत्वनिर्गुणत्वयोः षष्ठांशभागित्वं प्रतिकूलत्वमात्रे निर्गुणत्वमात्रे च प†ञ्चमांशभागित्वमिति। यदपि हारीतेनोक्तम्–

§ अत्रायमभिसंधिः। द्विभार्यस्य बहुभार्यस्य वा एकस्यां भार्यायां अज्ञातगर्भायां भर्ता मृतः अनन्तरम् अन्या च भार्या पुत्रार्थं देवरे नियुक्ता सती पुत्रमलभत पूर्वस्यां सगर्भायां चौरसः पुत्रो जातः तदा कथं विभागः कार्य इत्याकाङ्क्षायां षष्ठन्तु क्षेत्रजस्य इत्यादिना अंशकल्पना उक्ता भवति।

† एतत्तु बीजिनः धनस्य अप्राप्तौ विभागभाक्त्वम्। तद्धनप्राप्तौ तु नांशभाक् इति उक्तं भवति। उक्तं च मनुना—

यद्येकरिक्थिनौ स्यातामौरसक्षेत्रजौ सुतौ।
यस्य यत्पैतृकं रिक्थं स तद्गृह्णीत नेतरः'॥

(म. स्मृ. ९. १६२.)

इति। अयमर्थः। यस्य विधितः क्षेत्रजादूर्ध्वमौरसो जातः तस्य धनमौरस एव प्राप्नोति न इतरः क्षेत्रजादिः। एवं सति

१. B. originally reads °भाग and in margin °भाक्त्व°, while C. reads °भाग°. २. B. reads औरसो विभजेद्दायम्. and C. औरसो पि च तं दायम्‌ for औरसो विभजन् दायम्. ३. B. originally reads पंचक°.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

itized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant 2 Equipment Heritage Foundation, Jalga

'विभजिष्यमाण एकविंशं कानीनाय दद्यात् । विंशं पौनर्भवाय । एकोनविंशं द्व्यामुष्यायणाय । अष्टादशांशं च क्षेत्रजाय । सप्तदशांशं पुत्रिकापुत्राय[1] । इतरदौरसाय पुत्राय दद्यात्' । इति । एतदसवर्णनिर्गुणपुत्रविषयम् ।

(हा. स्मृ. २१. १३-१८.)

यत्तु मनुना—

'औरसः क्षेत्रजश्चैव दत्तः कृत्रिम एव च ।
गूढोत्पन्नोऽपविद्धश्च दायादा बान्धवाश्च षट् ॥
कानीनश्च सहोढश्च क्रीतः पौनर्भवस्तथा ।
स्वयंदत्तश्च शौद्रश्च षडदायादबान्धवाः' ॥

(म. स्मृ. ९. १५९-१६०.)

इति । षट्कद्वयमभिधाय पूर्वषट्कस्य दायादबान्धवत्वं उत्तर-षट्कस्यादायादबान्धवत्वमभिहितं[2] तदपि स्वपितृसापिण्ड्ये समानोदकानां संनिहितरिक्थहरान्तराभावे पूर्वषट्कस्य तद्रिक्थभागहरत्वम् उत्तरषट्कस्य तु तन्नास्ति बान्धवत्वं पुनः[3]

अपुत्रेण परक्षेत्रे नियोगोत्पादितः सुतः ।
उभयोरप्यसौ रिक्थी पिण्डदाता च धर्मतः ॥

(या. स्मृ. २. १२७.)

इत्यादियाज्ञवल्क्यवचनविरोधः स्यादिति न शङ्कनीयम् । तद्वचनं तु औरसाभावविषयम् । औरससत्वे तु क्षेत्रिणः स्वं औरसो हरेत् बीजिनः स्व क्षेत्रजो हरेदिति व्यवस्था ।

---

१. D. omits पुत्रिका°. २. This portion does not appear in C. D.—°मभिहितं तदपि स्वपितृसापिण्ड्ये समानोदकानां संनिहितरिक्थहरान्तराभावे पूर्वषट्कस्य तद्रिक्थभागहरत्वम् उत्तरषट्कस्य तु तन्नास्ति बान्धवत्वं पुनः; D has °मुक्तं for °मभिहितं. ३. D. adds तत् before पनः.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

zed by eGangotri/Sarayu Trust. Funding IKS-MoE Grant-2 Equipment Heritage Foundation, Ja

समानगोत्रत्वेन सपिण्डत्वेन वा उदकप्रदानादिकार्यकरत्वं षट्कद्वयस्यापि सममेवेति व्याख्येयम् । पितृधनग्रहणं तु पूर्वस्य पूर्वस्याभावे सर्वेषामस्त्येव ।

'न भ्रातरो न पितरः पुत्रा ऋक्थहराः पितुः' ।

(म. स्मृ. ९. १८५.)

इति । औरसव्यतिरिक्तानां पुत्रप्रतिनिधीनां सर्वेषां ऋक्थहारित्वस्य मनुनैव प्रतिपादितत्वात् । द्व्यामुष्यायणस्तु जनयितुरपि ऋक्थं भजते । तथा च याज्ञवल्क्यः—

'अपुत्रेण परक्षेत्रे नियोगोत्पादितः सुतः ।
उभयोरप्यसौ ऋक्थी पिण्डदाता च धर्मतः ।

(या. स्मृ. २. १२७.)

इति । यदा गुर्वादिना नियुक्तो देवरादिः स्वयमप्यपुत्रः सन्नपुत्रस्य क्षेत्रे स्वपरपुत्रार्थं प्रवृत्तो यं जनयति स द्विपितृको द्व्यामुष्यायणो द्वयोरपि ऋक्थहारी पिण्डदश्च । यदा स्वयं पुत्रवान् परपुत्रार्थमेव परक्षेत्रे पुत्रमुत्पादयति तदुत्पन्नः क्षेत्रिण एव पुत्रो भवति न बीजिनः । यथोक्तं मनुना—

'क्रियाभ्युपगमात्क्षेत्रं बीजार्थं यत्प्रदीयते ।
तस्येह भागिनौ दृष्टौ बीजी क्षेत्रिक एव च ।
फलं त्वनभिसंधाय क्षेत्रिणा बीजिना तथा ।
प्रत्यक्षं क्षेत्रिणामर्थो बीजाद्योनिर्बलीयसी' ॥

(म. स्मृ. ९. ५३, ५२.)

१. C. D. do not repeat पूर्वस्य.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

itized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

इति । अस्यार्थः । अत्रोत्पन्नमपत्यमुभयोरपि भवतु—इति संविदं कृत्वा यत्क्षेत्रं स्वामिना बीजावापार्थं बीजिने दीयते तस्मिन् क्षेत्रे उत्पन्नस्यापत्यस्य बीजिक्षेत्रिणौ स्वामिनौ। यदा तु तत्रोत्पन्नमपत्यमावयोरस्त्विति संविदमकृत्वा परक्षेत्रे बीजिना यदपत्यमुत्पाद्यते तदपत्यं क्षेत्रिण एव न बीजिनः। यतो बीजाद्योनिर्बलीयसी । गवाश्वादिषु दृष्टत्वादित्यर्थः । गुर्वादिनियोगोऽपि वाग्दत्ताविषय एव । अन्यस्य नियोगस्य मनुना निषिद्धत्वात् ।

'देवराद्वा सपिण्डाद्वा स्त्रिया सम्य[1]ङ्नियुक्तया ।
प्रजे[2]प्सिताधिगन्त[3]व्या सन्तानस्य परिक्षये ॥
विधवायां नियुक्तस्तु घृताक्तो वाग्यतो निशि ।
एकमुत्पादयेत्पुत्रं न द्वितीयं कथंचन ॥

(म. स्मृ. ९. ५९–६०.)

पुत्रे नियोगादुत्पन्ने यथावद्विधवैव सा' ।

इति[4] । एवं नियोगमुपन्यस्य मनुः स्वयमेव निषेधति—

नान्यस्मिन्विधवा नारी नियोक्तव्या द्विजातिभिः ।
अन्यस्मिन् हि नियुञ्जाना धर्मं हन्युः सनातनम् ॥
नोद्वाहिकेषु मन्त्रेषु नियोगः कीर्त्यते क्वचित् ।
न विवाहविधावुक्तं विधवावेदनं पुनः ॥
अयं द्विजैर्हि विद्वद्भिः पशुधर्मो विगर्हितः ।
मनुष्याणामपि प्रोक्तो वेने राज्यं प्रशासति ॥

१. C. D. read सद्भिः for सम्यक्. २. D. reads बीजे° for प्रजे°, while B. originally reads यथे° and in margin प्रजे°. ३. C. substitutes °मि° for °धि°. ४. D. omits इति । नियोगमुपन्यस्य मनुः स्वयमेव निषेधति.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

zed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

स महीमखिलां भुञ्जन् राजर्षिप्रवरः पुरा ।
वर्णानां संकरं चक्रे कामोपहतचेतनः ॥
* ततः प्रभृति यो मोहात् प्रमीतपतिकां स्त्रियम् ।
नियोजयत्यपत्यार्थं तं विगर्हन्ति साधवः ' ॥

(म. स्मृ. ९. ६४–६८.)

* ततः किं तत्राह तदेति । प्रमीतपतिकां प्रमीतो हिंसितः पतिर्यस्यास्तां पुत्रवतीमितिशेषः। यो नियोजयत्यपत्यार्थेऽपत्योत्पादनाय तं विगर्हयन्तीत्यन्वयः । अपत्यार्थे विद्यमानपुत्रे सतीति । एषु वेदनश्रुत्यनुरोधेन यस्या म्रियेत इत्युत्तरस्वरसात् सकृत्प्रदीयते कन्या इत्यादिवचनबलात्पुनर्विवाहो निषिद्धो न त्वपत्यार्थे नियोग इति । यत्तु बृहस्पतिः ।

उक्तो नियोगो मनुना निषिद्धः स्वयमेव तु ।
युगह्रासादशक्योयं कर्तुमन्यैर्विधानतः ॥
तपोज्ञानसमायुक्ताः कृतत्रेतायुगे नराः ।
द्वापरे च कलौ नृणां शक्तिहानिर्हि निर्मिता ॥
अनेकधा कृताः पुत्रा ऋषिभिश्च पुरातनैः ।
न शक्यन्तेऽधुना कर्तुं शक्तिहीनैश्चिरंतनैः ॥

इति । तदन्यथासिद्धं निषेधस्य पुनर्विवाहविषयत्वात् । पुत्रप्रयोजना भार्येति तात्पर्यम् । शास्त्रतात्पर्यादग्नीषोमीयपशोरिव क्वचिदननुष्ठानस्य शास्त्रासंकोचकत्वाद्धोलाकाद्यननुष्ठानवदेकमुत्पादयेत्पुत्रमिति नियोगविधेः प्राधान्येनार्थवादस्य न हिंस्यात्सर्वभूतानीतिवत् । स्तनाद्युपमर्दरागनिवर्तनेनान्यथासिद्धेर्गोविन्दराजव्याख्या गरीयसी । अन्यथा संतानकृतेर्दोषापत्तिः । यत्तु ।

अग्निहोत्रं गवालभं संन्यासं पलपैतृकम् ।
देवरेण सुतोत्पत्तिः कलौ पञ्च विवर्जयेत् ॥

इति । तदमूलम् । समूलत्वे वा लाभाख्यात्यादिरागिनां निवृत्तितात्पर्यकम् । अन्यथा यदहरेव विरजेत्तदहरेव प्रव्रजेत् ॥ यावज्जीवमग्निहोत्रं

१. D. reads तदा for ततः.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

itized by eGangotri/Sarayu Trust. Funding IKS-MoF-Grant-2 Equipment Heritage Foundation, Jalga

इति । नन्वत्र विकल्पोऽस्तु विधिप्रतिषेधयोरुभयोर्दर्श-नात् । अतो विनियोगस्य वाग्दत्तादिविषयत्वमनुपपन्न-मितिचेत् । न । मनुनैव नियोगस्य तद्विषयत्वप्रतिपादनात् ।

§ 'यस्या म्रियेत कन्याया वाचा सत्ये कृते पतिः ॥
तामनेन विधानेन निजो विन्देत देवरः ॥
† यथाविध्य्[1]धिगम्यै[2]नां शुक्लवस्त्रां शुचिव्रताम् ।
मिथो भजेताप्रसवात्सकृत्सकृदृतावृतौ' ॥

(म. स्मृ. ९. ६९–७०.)

इति । दत्तकादीनां न बीजिऋक्थभाक्त्वम् । तथाच मनुः—

जुहोतीत्यादिश्रुतिविरोधश्चेति दिक् । अतएव मेधातिथिर्देवराद्वेत्यादिसा-धव इत्यन्ते ग्रन्थे षोडशिग्रहणादिवद्विकल्पः नियोगतदभावयोः पित्रा-द्युद्धरणं फलं गन्तुश्च परमोपकारः तदाप्रभृत्ययं श्लोकोऽर्थवाद एवेति ॥

§ अत्र मेधातिथिः । नियोगरूपत्वात् कन्यागतोऽयं धर्म उच्यते वाचा सत्ये कृते वाग्दाने निवृत्त एकेन दत्ता अपरेण प्रतिगृहीता तामनेन वक्ष्य-माणेन विधानेन निजसोदरो देवरो विन्देत विवाहयेत् । एतेन वाग्द-त्तायाः कन्यायाः देवरेण सह विवाहो भवतीति सिद्ध्यते तथापि तेन देवरेण केवल पुत्रोत्पत्त्यर्थमेव तया सह आप्रसवाद्व्यवायः कार्यः पुत्रो-त्पत्त्यनन्तरं यथाकामं व्यवायादीनां निषिद्धत्वात् ।

† अत्र मेधातिथिः । यथाविधि यथाशास्त्रं वैवाह्यो विधिस्तथा विवाह्य वाचनिकोऽयं विवाहः । पुनर्भूश्च तथोच्यते नवाप्यूढापि सती [भार्या] भवति केवलं परार्थोस्या वाचनिको विवाहः । तथाच दर्शयति न दत्वा कस्यचित्कन्यां पुनरन्यस्य दीयत इति नासौ देवराय दीयत इत्यर्थः । अदत्ता चास्वभूता कथमिव भार्या भवेत् शुक्लवस्त्रां नियमो गमनेऽन्य-स्मिन्नपि नियोगे धर्मोऽयमिष्यते ।

---

१. D. reads अभि° for अधि°. २. B. C. and D. read एताम् for एनाम्.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

zed by eGangotri/Sarayu Trust. Funding IKS-MoE Grant-2 Equipment Heritage Foundation, Ja

¶ 'गोत्ररिक्थे जनयितुर्न भजेद्दत्रिमः सुतः ।
गोत्ररिक्थानुगः पिण्डो व्यपैति ददतः स्वधा' ॥
(म. स्मृ. ९. १४२.)

इति । दत्रिमग्रहणं क्रीतोपलक्षणार्थम् । दत्तव्यतिरिक्तानां गौणपुत्राणां रिक्थभाक्त्वप्रतिपादकानि वाक्यानि युगान्तरविषयाणि । कलौ युगे तेषां पुत्रत्वेन परिग्रहणस्य स्मृत्यन्तरे निषिद्धत्वात्—

'दत्तौरसेतरेषां तु पुत्रत्वेन परिग्रहः ।
देवरेण सुतोत्पत्तिः वानप्रस्थाश्रमग्रहः ।
कलौ युगे त्विमान् धर्मान् वर्ज्यानाहुर्मनीषिणः' ॥

इति । शूद्रधनविभागे विशेषमाह याज्ञवल्क्यः—

'जातोऽपि दास्यां शूद्रेण कामतोंऽशहरो भवेत् ।
मृते पितरि कुर्युस्तं भ्रातरस्त्वर्धभागिकम् ॥
अभ्रातृको हरेत्सर्वं दुहितॄणां सुतादृते' ।
(या. स्मृ. २. १३३–१३४.)

¶ गोत्ररिक्थे गोत्रं रिक्थं धनं च जनकसंबन्धिनी दत्तको न कदाचित्प्राप्नुयात् । पिण्डश्च गोत्ररिक्थानुगामी यस्य गोत्ररिक्थे भजते तस्यैव स पिण्डो दीयते तस्मात् पुत्रं ददतः जनकस्य स्वधापिण्डश्राद्धादि तत्पुत्रकर्तृकं निवर्तते । अतएव नासौ दत्तको द्व्यामुष्यायणः प्रतिग्रहीतृगोत्रत्वात् । जनकगोत्रसंबन्धभावाच्चेति दिक् ।

---

१. D. reads कृत्रिम° for दत्रिम. २. D. reads वोपलक्षणार्थम् for क्रीतोपलक्षणार्थम्. ३. B. reads दाय° for रिक्थ°. ४. D. reads °भागितम् for भागिकम्.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

itized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

इति । कामतः पितुरिच्छया भागं लभते । मृते पितरि यदि परिणीतापुत्रा भ्रातरः सन्ति तदा ते दासीपुत्रं स्वभागादर्धभागिकं कुर्युः । अथ परिणीतापुत्रा दुहितरो वा तत्पुत्रा वा न सन्ति तदा तद्धनं दासीपुत्रो लभते । तत्सद्भावे अर्धमेव । द्विजातीनां दास्यामुत्पन्नस्तु पितुरिच्छयाऽप्यंशं न लभते नाप्यर्धं दूरत एव कृत्स्नं जातोऽपि दास्यां शूद्रेणेति विशेषणात् । किन्त्वनुकूलश्चेज्जीवनमात्रं लभते इत्यभिप्रायः । अपुत्रदायग्रहणक्रममाह याज्ञवल्क्यः—

'पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा ।
तत्सुतो गोत्रजो बन्धुः शिष्यः सब्रह्मचारिणः' ॥
'एषामभावे पूर्वस्य धनभागुत्तरोत्तरः ।
स्वर्यातस्य ह्यपुत्रस्य सर्ववर्णेष्वयं विधिः' ॥

(या. स्मृ. २. १३५–१३६.)

इति । औरसादयो द्वादशविधपुत्रा यस्य न सन्त्यसावपुत्रः । तस्य मृतस्य धनं पत्न्यादीनां पूर्वस्य पूर्वस्याभावे उत्तरोत्तरो गृह्णाति । अयं दायग्रहणक्रमः सर्वेषु मूर्धावसिक्तादिष्वनुलोमजेषु वर्णेषु च ब्राह्मणादिषु वेदितव्य इत्यर्थः । पत्नी विवाहादिसंस्कृता नारी । सा प्रथमं पत्युर्धनं गृह्णाति । तदाह बृहस्पतिः—

'कुल्येषु विद्यमानेषु पितृभ्रातृसनाभिषु ।
असुतस्य प्रमीतस्य पत्नी तद्धनहारिणी' ॥

इति । अत्र विशेषमाह वृद्धमनुः—

---

१. D. omits दूरत एव कृत्स्नम्. २. D. reads कुलेषु for कुल्येषु.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

zed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

'अपुत्रा शयनं भर्तुः पालयन्ती व्रते स्थिता ।
पत्न्येव दद्यात्तत्पिण्डं कृत्स्नमंशं लभेत च' ॥

इति । कृत्स्नमंशं जंगमस्थावरात्मकम् । तदयं अपुत्रदायग्रहणक्रमः । द्वादशविधपुत्रशून्यस्य मृतस्य धनं पत्नी गृह्णाति । तथाच[2] प्रजापतिः—

'जङ्गमं स्थावरं हेम कुप्यं धान्यमथाम्बरम् ।
आदाय दापयेच्छ्राद्धं माससंवत्सरादिकम्' ॥
'पितृव्यगुरुदौहित्रान् भर्तृश्वशुरमातुलान् ।
पूजयेत्कव्यपूर्ताभ्यां वृद्धानप्यतिथींस्तथा' ॥

इति । तदभावे दुहितरः समानजातीया असमानजातीयाश्च यथाभागं गृह्णीयुः । तथाच बृहस्पतिः—

'भर्तुर्धनहरी पत्नी तां विना दुहिता स्मृता ।
अङ्गादङ्गात्संभवति पुत्रवद्दुहिता नृणाम्' ॥
'सदृशी सदृशेनोढा साध्वी शुश्रूषणे रता ।
तस्मात्पितृधनं त्वन्यः कथं गृह्णीत मानवः' ॥

इति । ऊढानूढदुहितृसमवाये कात्यायन आह—

'पत्नी पत्युर्धनहरी या स्याद्व्यभिचारिणी ।
तदभावे तु दुहिता यद्यनूढा भवेत्तदा' ॥

१. C. and D. omit in their text कृत्स्नमंशं जङ्गमस्थावरात्मकं and the portion from तथाच प्रजापतिः to °स्तत्पुत्राश्चेति about 70 lines, and for this insert only as follows :—तदभावे दुहिता । तदभावे दौहित्रः । तदभावे माता । तदभावे पिता । तदभावे भ्राता । तदभावे तत्पुत्रः । तदभावे पितामही । तदभावे तद्धनं पितामहो गृह्णाति तत्पुत्रास्तत्पुत्राश्च ।. २. B. reads तथा for तदा.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

itized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant-2 Equipment Heritage Foundation, Jalga

इति । ऊढास्वपि प्रतिष्ठिताप्रतिष्ठितदुहितृसमवाये अप्रतिष्ठितैव गृह्णाति । तदाह गौतमः—

'स्त्रीधनं दुहितॄणामप्रत्तानामप्रतिष्ठितानां च'।

(गौ. स्मृ. २८. २४.)

इति । न चैतद्गौतमवचनं मातृधनविषयमेवेति मन्तव्यम् । पितृधनेऽप्यस्य समानत्वात् । दुहित्रभावे दौहित्रो धनहारी । तथाच विष्णुः—

'[1]अपुत्रपौत्रसंताने दौहित्रा धनमाप्नुयुः ।
पूर्वेषां तु स्वधाकारे पौत्रा दौहित्रिका मता'॥

(वि. स्मृ.)

इति । मनुरपि—

† '[2]अकृता वा कृता वापि यं विन्देत्सदृशा[3]त्सुतम् ।
पौत्री मातामहस्तेन दद्यात्पिण्डं हरेद्धनम्'॥

(म. स्मृ. ९. १३६.)

---

† अकृता वा कृता वेति पुत्रिकाया एव द्वैविध्यम् । तत्र
'यदपत्यं भवेदस्यां तन्मम स्यात्स्वधाकरम्'।
इत्यभिधाय कन्यादानकाले वरानुमत्या या क्रियते सा कृताभिसंधिमात्रकृता वाग्व्यवहारेण न कृता । तथाच गौतमः—
'अभिसंधिमात्रात्पुत्रिकेत्येकेषाम्'।
(गौ. स्मृ. २८. १९.)

---

१. This quotation does not appear in the printed edition of Vishṇu Smriti (See Bibliotheca edition). २. B. reads this verse as :—

अक्षता वा क्षता वापि यं विन्देत्सदृशात्सुतम् ।
पौत्री पितामहस्तेन दद्यात्पिण्डं हरेद्धनम् ॥.

३. A. reads सदृशम्.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

zed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

इति । नच दुहित्रनन्तरं पितराविस्युपादानमनुपपन्नम् । दौहित्रस्य धनहारित्वेन वक्तव्यत्वादिति मन्तव्यम् । दुहितरश्चेति चशब्देन दौहित्रस्य समुच्चयात् दौहित्राभावे पितरौ धनभाजौ । यद्यप्यत्र पित्रोर्धनग्रहणे क्रमो न श्रूयते तथापि पितराविस्यस्य विग्रहवाक्ये मातृशब्दस्य पूर्वनिपातात् प्रत्यासत्त्यतिशयाच्च मातुरेव पूर्वं धनग्रहणं युक्तमिति केचिदाहुः। अपरे त्वपुत्रधनं पत्न्यभिगामि तदभावे दुहितृगामि तदभावे पितृगामि तदभावे मातृगामि । इति । वृद्धविष्णुवचनात्--

‘ अपुत्रस्याथ कुलजा पत्नी दुहितरोपि च ।
तदभावे पिता माता भ्राता पुत्रश्च कीर्तिता ’ ॥

इति । कात्यायनवचनाच्च ।

‘ पितैव पूर्वधनहारीत्याहुः ’ । ‘ अत्र यद्युक्तं तद्ग्राह्यम् । पित्रोरभावे भ्रातरो धनभाजः ’ । तथाच मनुः

‘ पिता हरेदपुत्रस्य रिक्थं भ्रातर एव चेति ’ ।

(म. स्मृ. ९. १८९.)

इति । अतएव पुत्रिकाधर्मशङ्कयेति प्रागविवाह्यत्वमुक्तम् । पुत्रिकेव कृता अकृता वा पुत्रं समानजातीयाद् वोढुरुत्पादयेत् तेन दौहित्रेण पौत्रकार्यकारणात् पौत्रिकेयवान् मातामहः पौत्री । तथा चासौ तस्मै पिण्डं दद्यात् । एतेन पौत्रिकेयविषयमेतद्वचनं इति तात्पर्यम् । गोविन्दराजस्तु अकृता वेत्यपुत्रिकैव दुहिता तत्पुत्रोऽपि मातामहधने पौत्रिकेय इव मातामह्यादिसत्त्वेप्यधिकारी भवतीत्याह । तदयुक्तम् । पुत्रिकायाः पुत्रतुल्यत्वात् अपुत्रिकातत्पुत्रयोरतुल्यत्वेन तत्पुत्रयोस्तुल्यत्वायोग्यत्वादित्यलं पल्लवितेन ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

itized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

भ्रातृष्वपि सोदर्याः प्रथमं धनभाजः तेषां प्रत्यासन्नत्वात्-अतएव मनुः—

'अनन्तरः सपिण्डाद्यस्तस्य तस्य धनं भवेत्'

(म. स्मृ. ९. १८७.)

इति। भ्रातॄणामभावे भ्रातृपुत्रा इति पूर्ववदवगन्तव्यम्। भ्रातृभ्रातृपुत्रसमवायेऽपि भ्रातृपुत्राणां धनसंबन्धो नास्ति। भ्रात्रभावे भ्रातृपुत्राणामधिकारश्रवणात्। यदा त्वपुत्रे भ्रातरि मृते तद्भ्रातॄणामविशेषेण धनसंबन्धे प्राप्ते भ्रातृधनविभागात् प्रागेव यदि कश्चिद्भ्राता म्रियेत तत्पुत्राश्च सन्ति तदा तत्पुत्राणां पितृतोऽधिकारे प्राप्ते तेषां भ्रातॄणां च विभागो युक्तः। भ्रातृपुत्राणामभावे गोत्रजा धनं गृह्णन्ति। गोत्रजाश्च पितामही सपिण्डाः समानोदकाश्च अतः प्रथमं पितामही धनं गृह्णाति। यत्तु—

'मातर्यपि च वृत्तायां पितुर्माता धनं हरेत्'।

(म. स्मृ. ९. २१७.)

इति। मात्रनन्तरं पितामह्या धनग्रहणे प्रापकं वचनम्। तदनपत्यस्य[2] स्वर्यातस्य धनं पत्न्यभिगामि तदभावे मातृगामि तदभावे भ्रातृपुत्रगामि तदभावे सकुल्यगामि तदभावे बन्धुगामि सहाध्यायिगामि तदभावे ब्राह्मणधनवर्जं राजगामि ब्राह्मणधनं ब्राह्मण एव गृह्णीयादिति। तथाच।

(वि. स्मृ. १७. ४–१३.)

---

१. B. reads सपिण्डं यः for सपिण्डाद्यः. २. This quotation appears in विष्णुस्मृति but some Sûtras are omitted here.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

zed by eGangotri/Sarayu Trust. Funding IKS-MoE Grant-2 Equipment Heritage Foundation, Ja

अपुत्रस्याथ कुलजा पत्नी दुहितरोऽपि वा ।
तदभावे पिता माता भ्राता पुत्राश्च कीर्तिता ॥

इत्यादि । क्रमप्रतिपादकबहुवचनविरोधात् पितामह्या धनसंबन्धमात्रप्रापकं न क्रमपरमित्यवगम्यते । पितामह्या अभावे पितामहः पितृव्यास्तत्पुत्राश्च यथाक्रमं धनं गृह्णन्ति । पितामहसन्तानाभावे प्रपितामही प्रपितामहस्तत्पुत्रास्तत्पुत्राश्चेति सप्तमपर्यन्तं गोत्रजा धनं गृह्णन्ति । सपिण्डानामभावे समानोदका धनं गृह्णन्ति । समानोदकाश्च सपिण्डानामुपरि सप्त पुरुषाः जन्मनामज्ञानपर्यन्ता वा । तदुक्तं बृहन्मनुना——

'सपिण्डता तु पुरुषे सप्तमे विनिवर्तते ।
समानोदकभावस्तु निवर्तेताचतुर्दशात् ॥
जन्मनामस्मृतेरेके तत्परं गोत्रमुच्यते' ॥

इति । गोत्रजानामभावे बान्धवा धनं गृह्णन्ति बान्धवाश्च त्रिविधा[1] बौधायनेन दर्शिताः——

'आत्मपितृष्वसुः पुत्राः आत्ममातृष्वसुः सुताः ।
आत्ममातुलपुत्राश्च विज्ञेया आत्मबान्धवाः ॥
पितुः पितृष्वसुः पुत्राः पितुर्मातृष्वसुः सुताः ।
पितुर्मातुलपुत्राश्च विज्ञेयाः पितृबान्धवाः ॥
मातुः पितृष्वसुः पुत्रा मातुर्मातृष्वसुः सुताः ।
मातुर्मातुलपुत्राश्च विज्ञेया मातृबान्धवाः' ॥

१. C. reads विविधा for त्रिविधा.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

itized by eGangotri Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

इति । बन्धुष्वपि यस्त्वासन्नतरः स एव पूर्वं गृह्णाति । अत एव बृहस्पतिः—

'बहवो ज्ञातयो यत्र सकुल्या बान्धवास्तथा ।
यस्त्वासन्नतरस्तेषां सोऽनपत्यधनं हरेत' ॥

इति । बन्धूनामभावे आचार्यः । आचार्याभावे शिष्यः । तदाह मनुः—

'यो[1] यो ह्यनन्तरः पिण्डात्तस्य तस्य धनं भवेत् ।
अत ऊर्ध्वं सकुल्यः स्यादाचार्यः शिष्य एव च' ॥
(म. स्मृ. ९. १८७.)

इति । आपस्तम्बोऽपि—

'सपिण्डाभावे आचार्यः आचार्याभावे अन्तेवासी–
(आ. ध. २. ६. १४. ३.)

इति । शिष्याभावे सब्रह्मचारी तस्याभावे यः कश्चिच्छ्रोत्रियो गृह्णाति । तदाह गौतमः—

'श्रोत्रिया ब्राह्मणस्यानपत्यस्य ऋक्थं भजेरन्'—
(गौ. स्मृ. २८. ४१.)

इति । तदभावे ब्राह्मणः । तदाह मनुः—

'सर्वेषामप्यभावे तु ब्राह्मणा ऋक्थभागिनः ।
त्रैविद्याः शुचयो दान्तास्तथा[2] धर्मो न हीयते' ॥
(म. स्मृ. ९. १८८.)

---

१. The text of मनु reads अनन्तरः सपिण्डाद्यः for यो यो ह्यनन्तरः पिण्डा°. २. B. reads तेषु for तथा.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

इति । ब्राह्मणधनं न कदाचिदपि राजगामि । क्षत्रियादिधनं तु सब्रह्मचारिपर्यन्तानामभावे राजगामि । तदुक्तं मनुना—

'अहार्यं ब्राह्मणद्रव्यं राज्ञा नित्यमिति स्थितिः ।
इतरेषां तु वर्णानां सर्वाभावे हरेन्नृपः' ॥

(म. स्मृ. ९. १८९.)

इति । नारदेनापि—

'ब्राह्मणार्थस्य तन्नाशे दायादश्चेन्न कश्चन ।
ब्राह्मणायैव दातव्यमेनस्वी स्यान्नृपोऽन्यथा' ॥

इति । संग्रहकारेणापि—

'पितर्यविद्यमानेऽपि धनं तत्पितृसन्ततेः ।
तस्यामविद्यमानायां तत्पितामहसन्ततेः ॥
असत्यामपि तस्यां तु प्रपितामहसन्ततेः ।
एवमेवोपरितनां सपिण्डा ऋक्थभागिनः ॥
तदभावेऽसपिण्डाः स्युराचार्यः शिष्य एव वा ।
सब्रह्मचारी सद्विप्रः पूर्वाभावे परः परः ॥
शूद्रस्यैकोदकाभावे राजा धनमवाप्नुयात् ।
आचार्यस्याप्यभावे तु तथा क्षत्रियवैश्ययोः' ॥

इति । नन्वनपत्यस्य धनं प्रथममेव पत्नी गृह्णातीत्येतदनुपपन्नम् । पत्नीसद्भावेऽपि भ्रातॄणां धनग्रहणस्य पत्नीनां वा भरणमात्रस्य नारदेनोक्तत्वात्—

---

१. C. and D. read एवमेवोपपत्तीनां for एवमेवोपरितनाम्.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

itized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

'भ्रातॄणामप्रजाः प्रेयात् कश्चिच्चेत्प्रव्रजेत वा ।
विभजेरन् धनं तस्य शेषास्ते स्त्रीधनं विना ॥
भरणं चास्य कुर्वीरन् स्त्रीणामाजीवनक्षयात् ।
रक्षन्ति शय्यां भर्तुश्चेदाछिन्द्युरितरासु तत्' ॥

(ना. स्मृ. १३. २५–२६.)

इति । तन्न—

'संसृष्टानां तु यो भागस्तेषामेव स इष्यते' ।

इति प्रक्रम्य "भ्रातॄणामप्रजाः प्रेयात्" इत्यादिवचनस्य पठितत्वेन संसृष्टभ्रातृभार्याणामनपत्यानां भरणमात्रम् संसृष्टभ्रातॄणां च तद्धनहारित्वम्[1] अनेन वचनेन प्रतिपाद्यत इत्यवगमनात् । अथवा 'भ्रातॄणामप्रजाः प्रेयात्' इत्यादिवचनस्य संसृष्टित्वेन

'संसृष्टानां तु यो भागस्तेषामेव स इष्यते ।
अनपत्यों[2]ऽशभाग्योऽपि निर्बीजेष्वितरानियात्' ॥

(ना. स्मृ. १३. २४.)

इत्यनेन पौनरुक्त्यप्रसङ्गात् । अथ वा अविभक्तविषयत्वमस्तु याज्ञवल्क्यवचनं तु विभक्तस्यासंसृष्टिनो भर्तुर्धनं पत्न्येव प्रथमं गृह्णातीत्येवंपरमित्यविरोधः । यत्तु मनुनोक्तम्—

'पिता हरेदपुत्रस्य ऋक्थं भ्रातर एव वा' ।

(म. स्मृ. ९. १८५.)

इति । यदपि कात्यायनेनोक्तम्—

---

१. D. reads धनग्रहणम् for तद्धनहारित्वम् and omits the portion up to इत्यादि वचनस्य संसृष्टित्वेन. २. D. reads अनपत्यांशभागो हि.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

zed by eGangotri/Sarayu Trust. Funding: IKS-MoE Grant-2 Equipment Heritage Foundation, Ja

'विभक्ते संस्थिते द्रव्यं पुत्राभावे पिता हरेत् ।
भ्राता वा जननी वाऽथ माता वा तत्पितुः क्रमात्' ॥

इति । मनुवचनं तावत् न क्रमप्रतिपादनपरम् भ्रातर एव वेति विकल्पश्रवणात् । कात्यायनवचनं तु पत्न्यां व्यभिचारिण्यां पित्रादेरनपत्यधनग्राहित्वप्रतिपादनपरम् ।

'भर्तुर्धनहरी पत्नी या स्यादव्यभिचारिणी ।
अपचारक्रियायुक्ता निर्लज्जा वार्थनाशिका ॥
व्यभिचाररता या च स्त्री धनं सा न चार्हति' ।

इति तेनैवोक्तत्वात् । धनं जीवनायोपक्लृप्तं क्षेत्रांशं नार्हतीत्यर्थः । धारेश्वरस्तु[1] अनपत्यधनं पत्नी गृह्णातीत्येवमादिवचनजातस्य[2] प्रकारान्तरेण विषयव्यवस्थामाह । नियोगार्थिनी पत्नी अनपत्यस्य विभक्तस्य पत्युर्धनं गृह्णाति । तथा च मनुः—

'धनं यो बिभृयाद्भ्रातुर्मृतस्य स्त्रियमेव वा ।
सोऽपत्यं भ्रातुरुत्पाद्य दद्यात्तस्यैव तद्धनम् ।
कनीयाञ् ज्येष्ठभार्यायां पुत्रमुत्पादयेद्यदि ।
समस्तत्र विभागः स्यादिति धर्मो व्यवस्थितः' ॥

(म. स्मृ. ९. १४६, १२०).

इति । विभक्तधने भ्रातरि मृते अपत्यद्वारेणैव पत्न्या धनसंबन्धः । नान्यथा । अविभक्तधनेऽपि तथेत्यभिप्रायः । गौतमोऽपि—

---

१. C. reads वीरेश्वरस्तु for धारेश्वरस्तु. २. C. and D. read °संजातस्य for °जातस्य.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

itized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

'पिण्डगोत्रर्षिसंबन्धा ऋक्थं भजेरन् स्त्री चानपत्यस्य। बीजं वा लिप्सेत'

(गौ. स्मृ. २८. २१-२२.)

इति। अयमर्थः—अनपत्यस्य ऋक्थं पिण्डगोत्रऋषिसंबन्धा भजेरन् स्त्री वा यदि बीजं लिप्स्यते॥

इति। संग्रहकारोऽपि—

'भ्रातृषु प्रविभक्तेषु संसृष्टेष्वप्यसत्सु वा।
गुर्वादेशनियोगस्था पत्नी धनमवाप्नुयात्'॥

इति। तदनुपपन्नं पत्नी दुहितर इत्यत्र नियोगाश्रवणात्। अश्रुतोऽपि नियोगो गौतमादिवचनबलात्कल्प्यते इति युक्तमिति चेत्। तन्न। गौतमादिवचनानामर्थान्तरपरत्वात्[1]। तथा हि। तत्र यद्गौतमवचनं—

'पिण्डगोत्रर्षिसंबन्धा ऋक्थं भजेरन् स्त्री चानपत्यस्य। बीजं वा लिप्सेत'—

(गौ. स्मृ. २८. २१-२२.)

इति। तस्य नायमर्थः यदि बीजं लिप्सेत तदा पत्नी अनपत्यधनं गृह्णातीति। अपि तर्ह्यनपत्यस्य धनं पिण्डगोत्रर्षिसंबन्धा गृह्णीयुः। स्त्री[2] वा गृह्णीयात्। सा स्त्री बीजं वा लिप्सेत संयता वा भवेदिति। वाशब्दस्य पक्षान्तरवचनत्वेन यद्यर्थे प्रयोगाभावात्। यदपि धनं यो

१. B. reads °विषयत्वात् for °परत्वात्. २. D. substitutes जाया न for स्त्री वा ह्रायात.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

zed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

बिभृयादित्यादि मनुवचनं तदपि क्षेत्रजस्यैव धनसंबन्धं वक्ति न पत्न्या इति । संग्रहवचनमपि[1] संयताया एव धनसंबन्धं वक्ति न तु देवरादिनियुक्तायाः ।

अन्यथा—

'अपुत्रा शयनं भर्तुः पालयन्ती व्रते स्थिता ।
पत्न्येव दद्यात्तत्पिण्डं कृत्स्नमंशं लभेत च' ॥

इति । तथा—

'अपुत्रा शयनं भर्तुः पालयन्ती गुरौ[2] स्थिता ।
भुञ्जीतामरणात्क्षान्ता दायादा ऊर्ध्वमाप्नुयुः' ॥

इति मनुकात्यायनवचनविरोधप्रसङ्गात् । तस्मादनपत्यस्य विभक्तस्यासंसृष्टिनो मृतस्य धनं पत्नी गृह्णातीत्येषैव व्यवस्था ज्यायसी । यत्तु स्त्रीणां धनसंबन्धाभावप्रतिपादकवचनम्—

'यज्ञार्थं द्रव्यमुत्पन्नं तत्रानधिकृतास्तु ये ।
अरिक्थभाजस्ते[3] सर्वे ग्रासाच्छादनभाजनाः ॥
यज्ञार्थं विहितं वित्तं तस्मात्तद्विनियोजयेत् ।
स्थानेषु धर्मजुष्टेषु[4] न स्त्रीमूर्खविधर्मिषु' ॥

इति । तद्यज्ञार्थमेव संपादितधनविषयम् । यदपि कात्यायनेनोक्तम्—

---

१. C. reads संरब्धवचनम् and D. शंखवचनम् for संग्रहवचनम्. २. D. reads व्रते for गुरौ. ३. D. and C. read तद्रिक्थभाजः for अरिक्थभाजः. ४. D. reads स्वेषु for धर्म.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

'अदायिकं राजगामि योषिद्भृत्यौर्ध्वदेहिकम् ।
अपास्य श्रोत्रियद्रव्यं श्रोत्रियेभ्यस्तदर्पयेत्' ॥

इति । अयमर्थः—स्त्रीणामशनाच्छादनोपयुक्तं धनिनः श्राद्धाद्युपयुक्तं च मुक्त्वा अदायिकधनं राजगामि भवति । श्रोत्रियद्रव्यं तु योषिद्भृत्यौर्ध्वदैहिकमपास्य श्रोत्रियस्य न राज्ञ इत्यर्थः । यदपि नारदेनोक्तम्—

'अन्यत्र ब्राह्मणात्किंचिद्राजा धर्मपरायणः ।
तत्स्त्रीणां जीवनं दद्यादेष दायविधिः स्मृतः' ॥

(ना. स्मृ. १३. ५२.)

इति । तदुभयमप्यवरुद्धस्त्रीविषयं पत्नीशब्दश्रवणात् । यदपि च हारीतेनोक्तम्—

'विधवा यौवनस्था चेत्पत्नी भवति कर्कशा ।
आयुषो रक्षणार्थं तु दातव्यं जीवनं तदा' ॥

इति । तदपि शङ्कितव्यभिचारस्त्रीविषयम् । यदपि प्रजापतिवचनम्—

'आढकं भर्तृहीनायाः दद्यादामरणान्तिकम्' ॥

---

१. A. reads आदाय for अपास्य. २. A. reads अर्पणम् for अयमर्थः and omits स्त्रीणाम् while B. for the same reads आश्रयणम् for अयमर्थः omitting the word स्त्रीणाम्. ३. A. reads धनम् for धनिनः. ४. B. reads अदायि वान्यत् for अदायिकमन्यत् and substitutes the word भुक्त्वा for मुक्त्वा. ५. A. reads °वृत्यौर्ध्वदैहिकम् for °भृत्यौर्ध्वदैहिकम्. ६. A. reads °शब्दश्रवणात् while B. reads अविरुद्ध° for अवरुद्ध°. ७. D. omits च. ८. C. and D. read आमरणात् स्त्रियाः for आमरणान्तिकम्.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

zed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

इति । यदपि स्मृत्यन्तरे—

'अन्नार्थं तण्डुलप्रस्थमपराह्णे तु सेन्धनम्' ।

इति । तदेतद्वचनद्वयं हारीतवचनेन समानार्थम् । या च श्रुतिः ।

'तस्मात्स्त्रियो निरिन्द्रिया अदायादाः' ।

इति । सा पौत्नीवतग्रहे तत्पत्न्या अंशो नास्तीत्येवंपरा । इन्द्रियशब्दस्य 'इन्द्रियं वै सोमपीथः' इति सोमे प्रयोगदर्शनात् । यत्तु पत्न्याः स्थावरग्रहणनिषेधकं बृहस्पतिवचनम्—

'यद्विभक्ते धने किंचिदाध्यादिविधिसंस्मृतम् ।
तज्जाया स्थावरं मुक्त्वा लभेत गतभर्तृका' ॥

इति । तदितरदायादानुमतिमन्तरेण स्थावरविक्रयनिषेधपरम् । अन्यथा—

'जङ्गमं स्थावरं हेम रूप्यं धान्यरसाम्बरम् ।
आदाय दापयेच्छ्राद्धं माससंवत्सरादिकम् ।
पितृव्यगुरुदौहित्रान् भर्तृस्वस्त्रीयमातुलान् ।
पूजयेत्कव्यपूर्ताभ्यां वृद्धानाथातिथींस्तथा' ॥

इति । अनेन विरोधप्रसङ्गात् । संसृष्टिनां विभागप्रकारमाह मनुः—

---

१. C. B. and D. read स्मृत्यन्तरम्. २. B. and C. read अदाया-हाः and D. अदायादीः. ३. B. C. and D. read सपत्नीव for सा पत्नीव. ४. B. reads विभक्तं धनम् for विभक्ते धने while C. reads संभृतम् for संस्मृतम्. ५. B. and C. read रसान्तरम् for रसाम्बरम्. ६. B. and D. read भर्तुः° for भर्तृ°. ७. A, and B. read वृद्धानप्यतिथीन् for वृद्धानाथातिथीन्. ८. D. reads संसृष्टिविभाग° for संसृष्टिनां विभाग°.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

itized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

'विभक्ताः सह जीवन्तो विभजेरन् पुनर्यदि ।
समस्तत्र विभागः स्याज्ज्यैष्ठ्यं तत्र न विद्यते' ।

(म. स्मृ. ९–२१०.)

इति । समानविभागविधानादेव विषमविभागनिराकरणसिद्धेः ज्यैष्ठ्यं तत्र न विद्यते इति पुनर्विषमविभागनिराकरणं विषमधनेन[1] संसृष्टानां धनानुसारेण विषमविभागप्राप्त्यर्थम् । संसर्गः कैरित्यपेक्षिते बृहस्पतिः—

'विभक्तो यः पुनः पित्रा भ्रात्रा चैकत्र[2] संस्थितः ।
पितृव्येणाथवा प्रीत्या तत्संसृष्टः स उच्यते' ॥

इति । यः पूर्वं पित्रादिना विभक्तः पुत्रादिः पुनः प्रीत्या तेन सह समापन्नः[3] स संसृष्ट उच्यते । येन[4] केनापि सहवासमापन्न इत्यर्थः । क्वचित्संसृष्टिनां विषमविभागकारणमाह[5] बृहस्पतिः—

'संसृष्टानां तु यः कश्चिद्विद्याशौर्यादिनाधिकम् ।
प्राप्नोति तत्र दातव्यो द्व्यंशः शेषाः समांशिनः' ॥

इति । विद्यादिना प्राप्ते अधिके धने अंशद्वयं दातव्यं न सर्वस्मिन्निति । एतत्संसृष्टद्रव्यानुपरोधेनार्जितेऽपि विभाज्यत्वप्राप्त्यर्थम् । अपुत्रस्य संसृष्टिनः ऋक्थग्राहिणं दर्शयति याज्ञवल्क्यः—

---

१. C. reads अधनेन for विषमधनेन. २. A. in marginal reading substitutes वा for च. ३. B. C. and D. read सहवासमापन्नः for सह. समापन्नः. ४. D. adds न before येन. ५. A. B. and C. omit °कारण° while D. substitutes पुनः for क्वचित् and omits संसृष्टिनाम्.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

zed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

'संसृष्टिनस्तु संसृष्टी सोदरस्य तु सोदरः।
दद्याच्चापहरेच्चांशं जातस्य च मृतस्य च'॥
(या. स्मृ. २. १३८.)

इति। अयमर्थः। संसृष्टिनो मृतस्यांशं विभागकालेऽविज्ञातगर्भायां भार्यायां पश्चादुत्पन्नस्य पुत्रस्य इतरः संसृष्टी दद्यात् पुत्राभावे संसृष्ट्येवापहरेत्। न पत्न्यादिः। पत्नीनामप्रत्तदुहितॄणां च भरणमात्रम्। तदाह नारदः —

'भरणं चास्य कुर्वीरन् स्त्रीणामा जीवनक्षयात्।
रक्षन्ति शय्यां भर्तुश्चेदाछिन्द्युरितरासु तत्॥
यदा दुहितरस्तस्याः[1] पित्र्योंऽशो भरणे मतः।
आ संस्काराद्धरेद्भागं परतो बिभृयात्पतिः'॥
(ना. स्मृ. १३. २६—२७.)

इति। सोदरस्य तु सोदर इति सोदरस्य संसृष्टिनो मृतस्यांशं[2] सोदरः संसृष्टिपश्चादुत्पन्नस्य पुत्रस्य दद्यात्। तदभावे स्वयमेवापहरेत् न भिन्नोदरः। संसृष्टीति पूर्वोक्तस्यापवादः। संसृष्टिनो भिन्नोदरस्य सोदरस्यासंसृष्टिनः सद्भावे उभयोरपि विभज्य धनग्रहणमित्याह स एव —

'अन्योदर्यस्तु संसृष्टी नान्योदर्यो धनं हरेत्।
असंसृष्ट्यपि वादद्यात्संसृष्टो[3] नान्यमातृजः'।
(या. स्मृ. २. १३९.)

इति। सापत्नभ्राता संसृष्टो[4] अन्योदर्यधनं हरेत् न

१. B. C. and D. read तु दुहिता तस्याः for दुहितरस्तस्याः. २ A. reads संसृष्टिनः तस्यांशम् for संसृष्टिनो (S.) मृतस्यांशम्. ३. B. C. and D. read सोदरो for संसृष्टो. ४. B. C. and D. omit संसृष्टो.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

itized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

त्वसंसृष्टी । असंसृष्ट्यपि सोदरः सोदरस्य धनमाददीत । न पुनरन्योदर्यः संसृष्ट्येव । अतएव मनुः —

येषां ज्येष्ठः कनिष्ठो वा हीयेतांशप्रदानतः ।
म्रियेतान्यतरो[१] वाऽपि तस्य भागो न लुप्यते ।
सोदर्या विभजेयुस्तं समेत्य सहिताः समम् ।
भ्रातरो ये च संसृष्टा भगिन्य[२]श्च सनाभयः' ॥

(म. स्मृ. ९. २११–२१२.)

इति । अयमर्थः । येषां संसृष्टिनां भिन्नोदराणां भ्रातॄणां मध्ये यः[३] कोऽपि ज्येष्ठः कनिष्ठो मध्यमो वा विभागकाले देशान्तरगमनादिना स्वांशाद्धीयेत तस्य भागो न लुप्यते– पृथगुद्धरणीयः । न संसृष्टिन एव गृह्णीयुः । किन्तु तमुद्धृतं भागमसंसृष्टिनः सोदराः संसृष्टिनश्च भिन्नोदराः सनाभयो भगिन्यश्च देशान्तरगता अपि समागम्य संभूय न्यूनाधिकभावमन्तरेण विभजेयुः । अन्ये मन्यन्ते ।

'असंसृष्ट्यपि वा[४] दद्यात्संसृष्टो नान्यमातृजः' ।

(या. स्मृ. २. १३९.)

इत्यस्यायमर्थः । यत्र संसृष्टा भिन्नोदराः असंसृष्टाश्च सोदराः तत्रासंसृ[५]ष्टा अपि सोदरा एव धनं गृह्णीयुः न तु

१. D. originally reads अन्यः परो and corrects अन्यतरो, while C. reads युज्यते for लुप्यते. २. D. reads भगिन्याः for भगिन्यः. ३. A. and D. omit यः while B. reads यः after कोऽपि. ४. B. and C. read चा for वा and substitute सोदरो for संसृष्टो. ५. B. and D. read असंसृष्टाः for संसृष्टाः.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

zed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

भिन्नोदराः संसृष्टा अपीति । यत्तु 'येषां[1] ज्येष्ठ' इत्यादिमनुवचनं संसृष्टानां भिन्नोदराणामसंसृष्टानामेकोदराणां च सर्वेषां धनग्रहणप्रतिपादकम् । तज्जङ्गमस्थावरात्मकोभयद्रव्यसद्भावविषयम् । अतएव प्रजापतिः—

'अन्तर्धनं तु[2] यद्द्रव्यं संसृष्टानां च तद्भवेत् ।
भूमिं गृहं त्व[3]संसृष्टाः प्रगृह्णीयुर्यथांशतः' ॥

इति । अयमर्थः । संसृष्टानां भिन्नोदरभ्रातॄणामन्तर्धनं गूढधनं द्रव्यं वा जङ्गमात्मकं यथांऽशतो भवेत् । सोदराणामसंसृष्टानां गृहक्षेत्रादिकं स्थावररूपं यथांऽशतो भवेत् । इति। याज्ञवल्क्यवचनं तु जङ्गमस्थावरयोरन्यतरसद्[4]भावविषयमिति। तत्र यद्युक्तं तद्ग्राह्यम् ।

यदा तु संसृष्टभिन्नोदराभावः तदा पिता पितृव्यो वा यः संसृष्टः स एव गृह्णीयात् । तथा च गौतमः ।

'संसृष्टिनि प्रेते संसृष्टो ऋक्थभाक्'—इति ।

(गौ. स्मृ. २८. २८.)

यदा पिता पितृव्यो वा संसृष्टो न विद्यते तदा त्वसंसृष्टभिन्नोदरो भ्राता गृह्णीयात् । तदभावे त्वसंसृष्टपिता । तदभावे माता । तदभावे पत्नी । तदाह शङ्खः—

'स्वर्यातस्य ह्यपुत्रस्य भ्रातृगामि द्रव्यं तदभावे पितरौ हरेयातां तदभावे त्वसंसृष्टः पिता तदभावे माता तदभावे ज्येष्ठा पत्नी' । इति ।

---

१. D. reads तेषां for येषाम्. २. B. and D. read च for तु.
३. B. C. D. substitute च for तु. ४. A. reads संभव° for °सद्भाव°.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

itized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

ज्येष्ठा गुणज्येष्ठा संमता[1] न तु पूर्वोढा । संसृष्टभ्रातृपुत्राणां पत्न्याश्च समवाये धनग्रहणप्रकारमाह नारदः—

'मृते पत्यौ तु भार्यास्स्युर्[2]भ्रातृपितृमातृकाः ।
सर्वे सपिण्डाः स्वधनं विभजेयुर्यथांशतः' ॥

इति । पत्युः[3] भ्रातृपितृमातृभावविशिष्टा अभ्रातृपितृमातृभार्याः सर्वे सपिण्डाः भ्रातृपुत्रादयः । तत्र भ्रातृपुत्राणां स्वपित्रंशतः भार्याणां भर्त्रंशतः संसृष्टधनस्य विभाग इत्यर्थः । पत्नीनामभावे संसृष्टपुत्रांशं तद्भ्रातृ[4]भगिनी गृह्णाति । तथा च बृहस्पतिः—

'या तस्य भगिनी सा तु ततोऽंशं लब्धुमर्हति ।
अनपत्यस्य धर्मोऽयमभार्यापितृकस्य च' ॥

इति । चशब्दो भ्रातृमातृभावसमुच्चयार्थः । केचित्तु
'या तस्य दुहिता'

इति पठित्वा पत्नीनामभावे दुहिता गृह्णीतेत्याहुः । दुहितृभगिन्योरभावे—

'अनन्तरः सपिण्डाद्यस्तस्य तस्य धनं भवेत्' ।

---

१. A. omits गुणज्येष्ठा and reads संयता for संमता. २. A. reads °स्तु स्वभ्रातृ° for °स्युरभ्रातृ°. ३. A. and C. read पत्नी for पत्युः. ४. B. C. and D. do not insert the word °भ्रातृ° while A. originally does not add भ्रातृ but it appears in correction.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

zed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

इति । उक्तप्रत्यासत्तिक्रमेण सर्वे सपिण्डादयो धनं गृह्णीयुः । [१]प्रतिपक्षे दोषाणामभावात् । अत एव बृहस्पतिः—

'मृतोऽनपत्योऽभार्यश्चेदभ्रातृपितृमातृकः ।
सर्वे सपिण्डास्तद्दायं विभजेयु[२]र्यथांशतः' ॥

इति । वानप्रस्थयतिनैष्ठिकब्रह्मचारिणां धनं [३]को वा गृह्णातीत्यपेक्षिते आह याज्ञवल्क्यः—

'वानप्रस्थयतिब्रह्मचारिणां ऋक्थभागिनः ।
क्रमेणाचार्यसच्छिष्यधर्मभ्रात्रेकतीर्थिनः' ॥

(या. स्मृ. २. १३७.)

इति । अत्र प्रातिलोम्यक्रमेण नैष्ठिकब्रह्मचारिणां धनं आचार्यो गृह्णाति न पित्रादिः । उपकुर्वाण[४]कस्य धनं पित्रादय [५]एव गृह्णन्ति । यतेस्तु धनमध्यात्मशास्त्रश्रवणधारणत[६]दनुष्ठानक्षमः सच्छिष्यो गृह्णाति । दुर्वृत्तस्य भागानर्हत्वात् । [७]वानप्रस्थस्य धनं धर्मभ्रात्रै[८]कतीर्थी गृह्णाति । धर्मभ्राता समानाचार्यकः । एकतीर्थी एकाश्रमी । धर्मभ्राता चासावेकतीर्थी च धर्मभ्रात्रेकतीर्थी ।

---

१. D. reads प्रतिपदोक्तानां for प्रतिपक्षे दोषाणाम्. २. B. C. and D. read विभजेरन् for विभजेयुः. ३. B. and C. read के च and D. के वा for को वा. ४. C. and D. also A. drop °क°. ५. B. and C. do not insert एव. ६. D. reads °धारणानुष्ठान° for धारणतदनुष्ठान. ७. A. reads वानप्रस्थधनं for वानप्रस्थस्य धनं. ८. C. and D. read °भ्रात्रेक° for भ्रात्रैक.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

itized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

अथवा। वानप्रस्थयतिब्रह्मचारिणां धनमाचार्यसच्छिष्य-धर्मभ्रात्रेकतीर्थिनः क्रमेणैव गृह्णन्ति। पूर्वपूर्वा[1]भावे उत्तरोत्तरो गृह्णातीत्यर्थः। यत्तु वसिष्ठेनोक्तम्—

'अनंशा[2]स्त्वाश्रमान्तरगताः'।

(व. स्मृ. १७. ५२.)

इति। तदन्याश्रमिणामन्याश्रमिधनग्रहणनिषेधपरम्। न तु समानाश्रमिणां परस्परऋक्थग्रहणनिषेधपरम्।

नन्वेतेषां धनसंबन्ध एव नास्ति कुतस्तद्विभागः। प्रतिग्रहादेर्धनार्जनोपायस्य निषिद्धत्वात्।

'अनर्थ[3]निचयो भिक्षुः'।

(गौ. स्मृ. ३. ११.)

इति गौतमस्मरणाच्च। तत्र—

'अह्नो मासस्य षण्णां वा तथा संवत्सरस्य च।
अर्थस्य निचयं कुर्यात्कृतमाश्वयुजे त्यजेत्'॥

इति। वानप्रस्थस्य धनसंयोगोऽस्ति।

'कौपीनाच्छादनार्थं तु वासोऽपि बिभृयाद्यतिः।
योगसंभारभेदांश्च गृह्णीयात्पादुके तथा'॥

इत्येव[4]मादिवचनाद्यतेरपि वस्त्रपुस्तकादिकं विद्यत एव।—

---

१. B. C. and D. read पूर्वस्य पूर्वस्य. २. D. originally reads अन्यांशाः and in margin reads अनंशाः. ३. B. C. and D. read अनिचयो for अनर्थनिचयो. ४. A. reads इति वचनात् and B. and C. इत्यादिवचनात् for इत्येवमादिवचनात्.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

zed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

नैष्ठिकस्यापि शरीरयात्रार्थं वस्त्रादिपरिग्रहोऽस्त्येवेति तद्विभागो घटत एव। दायानर्हानाह[2] मनुः—

‘अनंशौ क्लीबपतितौ जात्यन्धबधिरौ तथा।
उन्मत्तजडमूकाश्च ये च केचिन्निरिन्द्रियाः’ ॥

(म. स्मृ. ९. २०१.)

इति। निरिन्द्रियाः व्याधिनः विकलेन्द्रियाः। नारदोऽपि—

‘पितृद्विट् पतितः षण्ढो यश्च स्यादौपपातिकः[3]।
औरसा अपि नैतेंऽशं लभेरन् क्षेत्रजाः कुतः’ ॥

(ना. स्मृ. १३. २१.)

इति। वसिष्ठोऽपि—

‘अनंशास्त्वाश्रमान्तरगताः’।

(व. स्मृ. १७. ५२.)

इति। याज्ञवल्क्यः—

‘क्लीबोऽथ[4] पतितस्तज्जः पङ्गुरुन्मत्तको जडः।
अन्धोऽचिकित्स्यरोगाद्या[5] भर्तव्याः स्युर्निरंशकाः[6]’ ॥

(या. स्मृ. २. १४०.)

इति। तज्जः पतितोत्पन्नः। आदिशब्देन मूकादयो गृह्यन्ते। एते निरंशकाः ऋक्थभाजो न भवन्ति। केवलम-

---

१. A. does not insert °आदि°. २. A. reads दायादानर्हा° for दायानर्हा°. ३. A. reads °पादिकः. ४. B. C. and D. read क्लीबोऽन्धः for क्लीबोऽथ, while B. and C. स्तब्धः for तज्जः. ५. B. and C. read °रोगार्ताः for °रोगाद्याः. ६. C. and D. read निरंशाः for निरंशकाः.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

itized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

शनाच्छादनदानेन भर्तव्याः पोषणीयाः । अभरणे तु प्रत्यवाय-माह मनुः—

'सर्वेषामपि तु न्याय्यं दातुं शक्त्या मनीषिणा ।
ग्रासाच्छादनमत्यन्तं पतितो ह्यददद्भवेत्' ॥
(म. स्मृ. ९. २०२.)

इति । अत्यन्तं यावज्जीवमित्यर्थः । पतितस्य भर्तव्यत्वमपि नास्तीत्याह देवलः—

'तेषां पतितवर्ज्येभ्यो भक्तं वस्त्रं प्रदीयते' ।

इति । पतितशब्देन तज्जातोऽप्युपलक्ष्यते । 'पतितं तज्जवर्ज्यं बिभृयुः' इति बौधायनस्मरणात् । आश्रमान्तरगता अपि ते भर्तव्याः । अतएव वसिष्ठः ।

'अनंशास्त्वाश्रमान्तरगताः ।
क्लीबोन्मत्तपतिताश्च भरणं क्लीबोन्मत्तानाम्' ॥
(व. स्मृ. १७. ५२–५४.)

इति । अंशानर्हाणां पुत्रास्त्वंशभाजः । तदाह देवलः—

तत्पुत्राः पितृदायांशं लभेरन् दोषवर्जिताः ।

इति । निरंशकानां पुत्रा औरसाः क्षेत्रजाश्च क्लैब्यादिदोषवर्जिता भागहारिणो न दत्तकादयः । अत एव याज्ञवल्क्यः परिसंचष्टे—

---

१. D. substitutes the word अन्न for अशन while A. omits °दानेन and reads अशनाच्छादनेन. २. D. originally reads अकरणे and in margin अभरणे. ३. A. reads मनीषिणः. ४. B. and C. read भर्तव्यमपि and D. भर्तव्यत्वमपि. ५. A. and C. read भुक्तं and B. reads भक्तं but substitutes वस्तु for वस्त्रं. ६. A. omits this quotation and इति बौधायनस्मरणात् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

'औरसाः क्षेत्रजास्तेषां निर्दोषा भागहारिणः'।

इति। निरंशकानां दुहितरो यावद्विवाहं भर्तव्याः संस्कर्तव्याश्च पत्न्यश्च साधुवृत्तयो यावज्जीवं भर्तव्याः। तथाच स एव—

'सुताश्चैषां च[1] भर्तव्या यावद्वै भर्तृसात्कृताः[2] ॥
अपुत्रा योषितश्चैषां भर्तव्याः साधुवृत्तयः[3]।
निर्वास्या व्यभिचारिण्यः प्रतिकूलास्तथैव च'॥

(या. स्मृ. २. १४१–१४२.)

इति। अन्यानपि भागानर्हान् दर्शयति कात्यायनः[4]—

'अक्रमोढासुतश्चैव सगोत्राद्यश्च जायते।
प्रव्रज्यावसितश्चैव न ऋक्थं तेषु चार्हति'॥

इति। मनुरपि—

'अनियुक्तासुतश्चैव पुत्रिण्याप्तश्च देवरात्।
उभौ तौ नार्हतो भागं जारजातककामजौ'॥

(म. स्मृ. ९. १४३.)

इति। स्त्रीधनविभागमाह याज्ञवल्क्यः—

'पितृमातृपतिभ्रातृदत्तमध्यग्न्युपागतम्[5]।
आधिवेदनिकाद्यं च स्त्रीधनं परिकीर्तितम्॥

---

१. A. omits च. B. and C. substitute तु for च while D. प्र° for the same. २. B. and C. read °संस्कृताः. ३. B. and C. read सानुवृत्तयः for साधुवृत्तयः. ४. B. reads याज्ञवल्क्यः for कात्यायनः but the following quoted verse does not occur in the texts of याज्ञवल्क्य. ५. A. reads पितृदत्तं भ्रातृमातृदत्तम् for पितृमातृपतिभ्रातृदत्तम्.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

itized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

बन्धुदत्तं तथा शुल्कमन्वाधेयकमेव च ।
अप्रजायामतीतायां बान्धवास्तदवाप्नुयुः' ॥

(या. स्मृ. २. १४३–१४४.)

इति । अध्यग्न्युपागतं विवाहकालेऽग्निसंनिधौ मातुलादिभिर्दत्तम् । तथा च कात्यायनः—

'विवाहकाले यत्स्त्रीभ्यो दीयते ह्यग्निसंनिधौ ।
तदध्यग्निकृतं सद्भिः स्त्रीधनं परिकीर्तितम्' ॥

इति । आधिवेदनिकमधिवेदननिमित्तमधिविन्नस्त्रियै दत्तम् । आद्यशब्देन अध्यावाहनिकक्रयादिप्राप्तं च । तथाच मनुः—

'अध्यग्न्यध्यावाहनिकं दत्तं च प्रीतिकर्मणि ।
भ्रातृमातृपितृप्राप्तं षड्विधं स्त्रीधनं स्मृतम्' ॥

(म. स्मृ. ९. १९४.)

इति । षड्विधमिति न्यूनसङ्ख्याव्यवच्छेदार्थम् । नाधिकसङ्ख्याव्यवच्छेदाय । अध्यावाहनिकप्रीतिदत्तयोः स्वरूपं कात्यायनेनोक्तम्—

यत्पुनर्लभते नारी नीयमाना पितुर्गृहात् ।

---

७. B. and C. read अतीतायामप्रजसि for अप्रजायामतीतायाम्. ८. B. reads अध्यग्न्युपावहम् for अध्यग्न्युपागतम्. ९. B. C. and D. read अध्यावहनिकम् for अध्यावाहनिकम् and omit च. १०. B. and C. read तु पैतृकात् for पितुर्गृहात्.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

अध्यावाहनिकं नाम स्त्रीधनं तदुदाहृतम्[1] ।
प्रीत्या दत्तं तु यत्किंचित्[2] श्वश्र्वा वा श्वशुरेण वा ।
पादवन्दनिकं[3] चैव प्रीतिदत्तं तदुच्यते' ॥

इति । बन्धुदत्तं कन्याया मातृपितृभिर्दत्तम् । शुल्कं यद्गृहीत्वा कन्या दीयते । अन्वाधेयकं[4] परिणयनादनु पश्चाद्दत्तम् । तदुक्तं कात्यायनेन:—

'गृहोपस्करवाह्यानां दोह्याभरणकर्मिणाम्[5] ।
मूल्यं लब्धं तु यत्किंचित् शुल्कं तत्परिकीर्तितम् ॥
विवाहात्परतो यत्तु लब्धं भर्तुः कुलात्स्त्रिया ।
अन्वाधेयं तु तद्द्रव्यं लब्धं पितृकुलात्तथा' ॥

इति । पित्रादिभिः स्त्रीभ्यो धनदाने विशेषमाह कात्यायनः—
'पितृमातृपतिभ्रातृज्ञातिभिः स्त्रीधनं स्त्रियै ।
यथाशक्त्या द्विसाहस्राद्[6] दातव्यं स्थावराद्दृते' ।

इति । यथाशक्ति स्थावरव्यतिरिक्तं धनं द्विसहस्र-कार्षापणपर्यन्तं दातव्यमित्यर्थः । अयं च नियमः प्रत्यब्दा दाने वेदितव्यः । अनेकाब्देषु तूपजीवनार्थं सकृदेव दाने नायमवधिनियमः । नापि स्थावरपर्युदासः । तथा[7] च बृहस्पतिः—

---

१. B. reads तत्स्त्रीधनमुदाहृतम्. २. A. substitutes च for तु and reads अन्येन for श्वश्र्वा. ३. A. reads अधिवेदनिकम् for पादवन्दनिकम्. ४. B. C. and D. read °अन्वाधेयिकम् for अन्वाधेयकम्. ५. D. originally reads कर्मिणाम् but corrects °कर्मणाम्. ६. A. reads °साहस्रम् for साहस्राद्. ७. तथाच बृहस्पतिः—'दद्याद्धनं च पर्याप्तं क्षेत्रांशं वा यदिच्छति is omitted by B. C. and D.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

itized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

'दद्याद्धनं च पर्याप्तं क्षेत्रांशं वा यदिच्छति' ।

इति । अत एव सौदायिके स्थावरेऽपि यथेष्टविनियोगार्हत्वमुक्तं तेनैव—

'ऊढया कन्यया वापि भर्तुः पितृगृहेऽपि वा ।
भ्रातुः सकाशात्पित्रोर्वा लब्धं सौदायिकं स्मृतम् ॥
सौदायिकं धनं प्राप्य स्त्रीणां स्वातन्त्र्यमिष्यते ।
यस्मात्तदानृशंस्यार्थं तैर्दत्तमुपजीवनम् ।
विक्रये चैव दाने च यथेष्टं स्थावरेष्वपि' ।

इति । पतिदत्तस्थावरे तु विशेषमाह नारदः—

'भर्त्रा प्रीतेन यद्दत्तं स्त्रियै तस्मिन्मृतेऽपि तत् ।
सा यथाकाममश्नीयाद्दद्याद्वा स्थावरादृते' ।

इति । पित्रादिभिरुपाध्यादिना दत्तं स्त्रीधनं न भवतीत्याह कात्यायनः—

'तत्र सोपाधि यद्दत्तं यच्च योगवशेन वा ।
पित्रा भ्रात्राथवा पत्या न तत्स्त्रीधनमिष्यते' ।

इति । उत्सवादौ धारणार्थं दत्तमलंकारादिकं सोपाधिदत्तम् । योगवशेन वञ्चनादिनेत्यर्थः । शिल्पादिप्राप्तमपि स्त्रीधनं न भवतीत्याह स एव—

---

१. A. reads तदैतत् for तैर्दत्तम्. २. A. reads अपि for तु and C. and D. read °षु for the same. ३. A. substitutes च and B. यत् for तत्. ४. D. reads सोपाधिना दत्तम् for सोपाधिदत्तम्. ५. A. reads वचनादिना for वञ्चनादिना. ६. B. and C. read wrongly शिक्यादि° for शिल्पादि°.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

zed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

'प्राप्तं शिल्पैस्तु यद्वित्तं प्रीत्या[1] चैव यदन्यतः।
भर्तुः स्वाम्यं तदा तत्र शेषं तु स्त्रीधनं स्मृतम्'।

इति। अन्यतः सख्यादित इति यावत्। तदेतत्स्त्रीधनं दुहितृदौहित्र[2]तद्दुहितृपुत्ररहितायां स्त्रियामतीतायां बान्धवा भर्त्रादयो गृह्णन्ति। अत्रैवं क्रमः। मातरि वृत्तायां[3] प्रथमं दुहिता गृह्णाति। अत एवोक्तम् याज्ञवल्क्येन[4]—

'मातुर्दुहितरः शेषमृणात्ताभ्य ऋतेऽन्वयः'।

(या. स्मृ. २. ११७.)

इति। गौतमोऽपि—

'स्त्रीधनं दुहितॄणां अप्रत्तानां अप्रतिष्ठितानां च'

(गौ. स्मृ. २८. २४.)

इति। दुहितॄणामभावे दुहितुर्दुहितरो गृह्णन्ति। तद्दुहितॄणां प्रसूता चेदिति याज्ञवल्क्यस्मरणात्—

भिन्नमातृकाणां दौहित्राणां विषमाणां समवाये मातृतो भागकल्पना॥

तथाच गौतमः—

'पितृमातृष्वसृवर्गे भागविशेषः'।

(गौ. स्मृ. २८. १७.)

इति। दुहितृदौहित्रीणां समवाये मनुः—

---

१. B. and C. read प्राप्तम् for प्रीत्या. २. B. and C. read दुहितृदौहित्रदौहित्रपुत्र° and D. originally दुहितृपुत्र° and in the margin दुहितृदौहित्रतद्दुहित्रपुत्र° for दुहित्रदौहित्रपुत्र°. ३. B. C. and D. read प्रेतायाम् for वृत्तायाम्. ४. B. C. and D. read तेनैव for याज्ञवल्क्येन but it seems incorrect.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

itized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

'यास्तासां स्युर्दुहितरस्तासामपि यथार्हतः ।
मातामह्या धनात्किंचित्प्रदेयं प्रीतिपूर्वकम्' ॥

(म. स्मृ. ९. १९३.)

इति। दौहित्रीणामप्यभावे दौहित्रा धनहारिणः । तथाच नारदः—

'मातुर्दुहितरोऽभावे दुहितॄणां तदन्वयः' ।

(ना. स्मृ. १३. २.)

इति । दुहितृदुहितॄणामभावे तदन्वयो दौहित्रौ गृह्णातीत्यर्थः । दौहित्राणामभावे तु—

'विभजेरन् सुताः पित्रोरूर्ध्वं ऋक्थमृणं समम्' ।

(या. स्मृ. २. ११७.)

इत्यादियाज्ञवल्क्यवचनतः मातृऋणापाकरणतोऽवशिष्टं मातृधनं पुत्रा गृह्णन्ति । यत्तु मनुनोक्तम्—

'जनन्यां संस्थितायां तु समं सर्वे सहोदराः ।
भजेरन् मातृकं ऋक्थं भगिन्यश्च सनाभयः' ॥

(म. स्मृ. ९. १९२.)

इति । एतत् पुत्राणां दुहितॄणां च संभूय मातृऋक्थग्राहित्वपरं न भवति । किंतु तेषां धनसंबन्धे प्राप्ते समविभागप्राप्त्यर्थं समशब्दश्रवणात् । यदपि शङ्खलिखिताभ्यामुक्तम्—

'समं सर्वे सहोदरा मातृकं ऋक्थमर्हन्ति कुमार्यश्च' ।

---

१. This portion is omitted in A.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

zed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

इति। तदपि मनुवचनेन समानार्थम्। अथवा एतद्वचनद्वयं भर्तुः कुललब्धस्त्रीधनविषयम्। अस्मिन्नेव विषये बृहस्पतिः—

‘ स्त्रीधनं तदपत्यानां दुहिता च तदंशिनी।
अप्रत्ता चेत्समूढा तु लभते सा न मातृकम्’।

इति। अपत्यानां पुमपत्यानाम्। यत्तु पारस्करेणोक्तम्।

अप्रत्तायास्तु दुहितुः स्त्रीधनं परिकीर्तितम्।
पुत्रैस्तु[1] नैव लभते प्रत्तायां तु समांशभाक्[2]’।

इति। तदप्रतिष्ठितोढदुहितृविषयम्। अत एव मनुः—

‘ मातुस्तु यौतकं यत्स्यात्कुमारीभाग एव सः’।
(म. स्मृ. ९. १३१.)

इति। यौतकं पितृकुललब्धम्। अनपत्यहीनजातिस्त्रीधनं उत्तमजातीय[3]सपत्नीदुहिता गृह्णाति। तदभावे तदपत्यम्। तदुक्तं मनुना —

‘ स्त्रियास्तु यद्भवेद्वित्तं पित्रा दत्तं कथंचन।
ब्राह्मणी तद्धरेत्कन्या तदपत्यस्य वा भवेत्’॥
(म. स्मृ. ९. १९८.)

इति। ब्राह्मणी जात्युत्तम[4]जात्युपलक्षणार्थम्। पुत्राणामभावे पौत्रा गृह्णन्ति पौत्राणामपि पितामह्यृणापाकरणे। पुत्रपौत्रै ऋणं देयमिति अधिकारश्रवणात्। अस्तु ऋणापाकरणेऽधिकारः। ऋक्थभाक्त्वं कुत इति चेत्। तन्न।

---

१. B. C. and D. read पुत्रैस्तु for पुत्रस्तु. २. D. reads समांशता for समांशभाक्. ३. A. B. and C. read °जाति° for °जातीय°. ४. A. reads जात्यधम° for जात्युत्तम°.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

itized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

'ऋक्थभाजः ऋणं प्रतिकुर्युः'—

इति गौतमवचनेन ऋक्थभाजामेव ऋणापाकरणाधिकारश्रवणात् । पौत्राणामप्यभावे भर्त्रादयोऽपि ऋक्थभाजः । अत्रैव विवाहभेदेन विशेषमाह मनुः—

'ब्राह्मदैवार्षगान्धर्वप्राजापत्येषु यद्धनम् ।
अप्रजायामतीतायां भर्तुरेव तदिष्यते' ॥
येत्वस्याः स्याद्धनं दत्तं विवाहेष्वासुरादिषु ।
अप्रजायामतीतायां मातापित्रोस्तदिष्यते ॥

(म. स्मृ. ९. १९६–१९७.)

इति । ब्राह्मदैवार्षगान्धर्वप्राजापत्यविवाहेषु संस्कृताया भार्याया यद्धनं तद्दुहित्रादिपौत्रान्ततद्धनहारिसन्ततेरभावे सति भर्तृगामि न पुनर्मात्रादिगामि इत्यर्थः । आसुरराक्षसपैशाचविवाहसंस्कृताया भार्याया धनं मातापित्रोर्भवतीत्यर्थः ।

यत्तु कात्यायनेनोक्तम्—

'बन्धुदत्तं तु बन्धूनामभावे भर्तृगामि तत्' ।

इति । तदासुरादिविवाहसंस्कृतस्त्रीधनविषयम् । अतएवोक्तं तेनैव—

१. C. reads वसु for धनम्. २. A. does not insert this whole verse. ३. B. C. and D. omit तत्°. ४. A. reads मात्रादीनाम् for मात्रादिगामि. ५. A. omits this whole portion—आसुरराक्षसपैशाचविवाहसंस्कृताया भार्याया धनं मातापित्रोर्भवतीत्यर्थः. ६. A. omits °धन°.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

zed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

'आसुरादिषु यल्लब्धं स्त्रीधनं पैतृकं स्त्रियां[1] ।
अभावे तदपत्यानां मातापित्रोस्तदिष्यते' ।

इति । भर्त्रादिभिर्दत्तमपि शुल्काख्यं स्त्रीधनं सोदरा एव गृह्णन्ति[2] तथाच गौतमः—

'भगिनीशुल्कं सोदर्याणामूर्ध्वं मातुः' ।

(गौ. स्मृ. २८. २६.)

इति । सोदर्याणामभावे मातुर्भवतीत्यर्थः । यत्पुनस्तेनैवोक्तम् ।

'स्वं च शुल्कं वोढाऽर्हति' ।

इति । तच्छुल्कग्रहणानन्तरं संस्कारात्प्राक्मृतायां द्रष्टव्यम् । अतएव याज्ञवल्क्यः—

'मृतायां दत्तमादद्यात्परिशोध्योभयव्ययम्[3]' ॥

(या. स्मृ. २. १४६.)

इति । यत्तु कन्यायै मातामहादिभिर्[4]दत्तं भूषणादि तदपि सोदरा एव गृह्णीयुः । तथाच बौधायनः—

'रिक्थं मृताया गृह्णीयुः कन्यायाः सोदराः समम् ।
तदभावे भवेन्मातुस्तदभावे पितुर्भवेत्' ॥

इति । अनपत्यपुत्रिकाधनमपि सोदरो गृह्णाति । तथाच पैठीनसिः—

---

१. A. reads स्त्रियाः and B. and D. स्त्रियम् for स्त्रिया. २. A. reads सोदर एव गृह्णाति for सोदरा एव गृह्णन्ति. ३. B. and C. read भवत्ययम् for उभयव्ययम्. ४. D. reads पितामहादिभिः for मातामहादिभिः.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

itized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

'प्रेतायां पुत्रिकायां तु न भर्ता द्रव्यमर्हति ।
अपुत्रायां कुमार्यां च भ्रात्रा तद्ग्राह्यमित्यपि' ।

इति । पुत्रिकायां पितुः पश्चादौरससद्भावे स एव गृह्णीयान्न भर्ता । यत्तु मनुवचनम्—

'अपुत्रायां मृतायां तु पुत्रिकायां कथंचन ।
धनं तत् पुत्रिकाभर्ता हरेचैवाविचारयन्' ॥
(म. स्मृ. ९. १३५.

इति । तत्पश्चादुत्पन्नभ्रात्रभावे वेदितव्यम् । यत्तु क्वचिदनपत्यं स्त्रीधनं स्वस्रीयादीनां भवतीत्युक्तं बृहस्पतिना —

'मातृष्वसा मातुलानी पितृव्यस्त्री पितृष्वसा ।
श्वश्रूः पूर्वजपत्नी च मातृतुल्याः प्रकीर्तिताः ॥
यदाऽऽसामौरसो न स्यात्सुतो दौहित्र एव वा ।
तत्सुतो वा धनं तासां स्वस्रीयाद्याः समाप्नुयुः' ॥

इति । अस्यायमर्थः । ब्राह्मादिविवाहेषु भर्तुरभावे आसुरादिषु मातापित्रोरभावे मातृष्वस्रादीनां धनं यथाक्रमं मातृष्वस्रीयाद्याः गृह्णीयुः । क्वचिज्जीवन्त्याः सप्रजाया अपि पत्न्या धनं भर्ता गृह्णीयादित्याह याज्ञवल्क्यः—

'दुर्भिक्षे धर्मकार्ये च व्याधौ संप्रतिरोधके ।
गृहीतं स्त्रीधनं भर्ता न स्त्रियै दातुमर्हति' ॥
(या. स्मृ. २. १४७.)

---

१. A. reads दायम् for द्रव्यम्. २. B. C. and D. read ग्राह्यमिति for ग्राह्यमित्यपि. ३. B. originally reads तस्य द्रव्यं for पुत्रिकायाम्. ४. A. B. and C. substitute तु for तत्. ५. B. and C. read बन्धवादीनां and D. originally स्वस्रीयादीनां and in margin बन्धवादीनां for स्वस्रीयादीनाम्. ६. D. reads पुत्रो for सुतो while A. substitutes च for वा. ७. D. omits °द्या°.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

इति । संप्रतिरोधके बन्दिग्रहादौ स्वकीयद्रव्याभावे स्त्रीधनं गृहीत्वा पुनस्तस्यै न दद्यात् । प्रकारान्तरेण गृहीतं पुनर्दद्यादेव । तथाच कात्यायनः--

'न भर्ता नैव च सुतो न पिता भ्रातरो न च ।
आदाने वा विसर्गे वा स्त्रीधने प्रभविष्णवः ॥
यदि चैकतरोऽप्येषां स्त्रीधनं भक्षयेद्बलात् ।
सवृद्धिकं प्रदाप्यः स्याद्दण्डं चैव समाप्नुयात् ॥
तदेव यद्यनुज्ञाप्य भक्षयेत्प्रीतिपूर्वकम् ।
मूलमेव स दाप्यः स्याद्यद्यसौ धनवान् भवेत्'

इति । देवलोऽपि--

वृत्तिराभरणं शुल्कं लाभश्च स्त्रीधनं भवेत् ।
भोक्त्री तत्स्वयमेवेदं पतिर्नार्हत्यनापदि ॥
वृथा मोक्षे च भोगे च स्त्रियै दद्यात्सवृद्धिकम्' ।

इति । विभाज्यद्रव्यमाह कात्यायनः--

'पैतामहं च पित्र्यं च यच्चान्यत्स्वयमार्जितम् ।
दायादानां विभागे तु सर्वमेव विभज्यते' ॥

इति । पितृद्रव्योपजीवनेन स्वयमर्जितं यत्तदेव विभजेत् तदनुपजीवनेनार्जितस्याविभाज्यत्वात् । एतत्त्रितयमपि ऋणावशिष्टं विभजेत् । तथा च स एव--

---

१. B. and C. substitute हि and D. तु for च. २. B. and C. read भोक्ता तत्स्त्रीधने चेदम् for भोक्त्री तत्स्वयमेवेदम्. ३. D. reads यच्च स्यात् for यच्चान्यत्. ४. B. C. and D. omit यत्तदेव विभजेत्.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

itized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

' ऋणं प्रीतिप्रदानं च दत्वा शेषं विभाजयेत् ' ॥

इति । ऋणप्रदानार्थं धनाभावे पितृऋणमपि विभजेत् । ' ऋक्थं ऋणं सममिति वचनात् ' ।

ऋक्थं ऋणमितिवचनादिनिवृत्त्यर्थं शोध्यमित्याह स एवः—

' ऋणमेवंविधं शोध्यं विभागे बन्धुभिः सह[1] ।
गृहोपस्करवाह्याश्च दोह्या[2]भरणकार्मिणः ॥
दृश्यमाना विभज्यन्ते कोशं[3] गूढमब्रवीद्भृगुः ' ।

इति । अत्र कोशग्रहणमितरदिव्य[4]प्रतिषेधार्थम् । तथा च स एव—

' शङ्काविश्वाससंधाने विभागे ऋक्थिनां सदा ।
क्रियासमूहकर्तृत्वे कोशमेवं[5] प्रदापयेत् ' ।

इति । अविभाज्यद्रव्यमाह याज्ञवल्क्यः—

' पितृद्रव्याविरोधेन यदन्यत्स्वयमार्जितम् ।
मैत्रमौद्वाहिकं चैव दायादानां न तद्भवेत् ।
क्रमादभ्यागतं द्रव्यं हृतमभ्युद्धरेत्तु यः ।
दायादेभ्यो न तद्द्याद्विद्यया लब्धमेव च ' ॥

(या. स्मृ. २. ११८–११९.)

---

१. A. reads सदा for सह. २. D. reads वोह्या° for दोह्या°. ३. D. originally reads शोकं मूढे and in margin शोकं गूढे for कोशं गूढम्. ४. D. reads °द्रव्य° for °दिव्य°. ५. D. reads originally शोकमोहम् and in the margin कोशमेव, while A. कोशमेवम्.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

इति। पितृद्रव्याविनाशेन यत्स्वयं कृष्यादिना उपार्जितं यच्च विद्यादिना लब्धं विवाहाच्च यल्लब्धं तद्भ्रात्रादीनां न भवेत्। यत्तु[1] पित्रादिक्रमायातं चोरादिभिरपहृतं[2] पित्रादिभि[3]-रनुद्धृतं द्रव्यं पुत्राणां मध्ये यः कश्चि[4]दितराभ्यनुज्ञयोद्धरति तत्तस्यैव भवति। क्षेत्रं[5] तु तुरीयांशमेवोद्धर्ता गृह्णाति शेषं तु[6] सर्वेषां सममेव। तथाच शङ्खः—

'पूर्व[7]नष्टां तु यो भूमिं यः कश्चिदुद्धरेत् श्र[8]मात्।
यथा[9]भागं लभन्त्यन्ये दत्वांशं तु तुरीयकम्'।

इति। तथा विद्ययाध्यापनादिना लब्धमपि स्वस्यैव भवति। पितृद्रव्याविरोधेनेति सर्वत्र शेषः। अत एव मनुः—

अनुपघ्नन् पितृद्रव्यं श्रमेण यदुपार्जयेत्।
(दायादेभ्यो न तद्दद्याद्विद्यया लब्धमेव च।)
स्वयमीहितलब्धं तन्नाकामो दातुमर्हति॥

(म. स्मृ. ९. २०८.)

इति। श्रमेण कृष्यादिना। पितृग्रहणमविभक्तोपलक्षणार्थम्। व्यासोऽपि—

---

१. A. and D. omit तु. २ B. and C. read अनुधृतम् omitting अपहृतम् पित्रादिभिः. ३. A. reads अन्यैः for पित्रादिभिः. ४. B. C. and D. omit कश्चित्. ५. B. C. and D. read क्षेत्रे for क्षेत्रं. ६. A. omits तु and also च after तथा. ७. A. reads पुनः. B. पूर्वं, and C. पूर्णम् for पूर्व°. ८. B. C. and D. read क्रमात् for श्रमात्. ९. A. and C. read °भागेन लभते for °भागं लभन्ति.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

itized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

'विद्याप्राप्तं शौर्यधनं यच्च सौदायिकं भवेत् ।
विभागकाले तत्तस्य नान्वेष्टव्यं च[1] ऋक्थिभिः' ॥

इति । अविभाज्यविद्याधनस्य लक्षणमाह कात्यायनः—

'परभक्तोपयोगेन प्राप्ता विद्यान्यतस्तु या ।
तया प्राप्तं धनं यत्तु विद्याप्राप्तं तदुच्यते ।
उपन्ये[2]स्तेषु यल्लब्धं विद्यया पणे[3]पूर्वकम् ।
विद्याधनं तु तद्विद्याद्विभागे न नियोज्यते ।
शिष्यादार्त्विज्यतः प्रश्नात् संदिग्धप्रश्ननिर्णयात् ।
स्वज्ञानशा[4]सनाद्वादात् लब्धं प्राध्यापनाच्च यत् ॥
परं निरस्य यल्लब्धं विद्यातोऽ[5]द्भुतपूर्वकम् ।
विद्याधनं तु तद्विद्यान्न विभाज्यं बृहस्पतिः ॥
शि[6]ल्पिष्वपि हि धर्मोऽयं स्वस्थाद्यच्चाधिकं भवेत् ।
विद्याबलकृतं चैव याज्यतः शिष्य[7]तस्तथा ॥
एतद्विद्याधनं प्राहुः सामान्यं यदतोऽन्यथा' ।

इति । अने[8]न विद्याधनादन्यथाभूतमविभक्तपित्रादिद्रव्योपयोगप्राप्तं तदविभक्तानां सामान्यं साधारणमिति यावत् । क्वचिद्विद्याप्राप्तमपि धनं विभाज्यमित्याह नारदः—

---

१. B. C. and D. read स्वऋक्थिभिः for च ऋक्थिभिः. २. B. and C. read उपायस्तेषु while D. originally reads उपलब्धेषु and in the margin उपन्यस्तेषु for उपन्यस्तेषु. ३. B. reads रणपूर्वकम् for पणपूर्वकम्. ४. A. reads °शंसनात् for शासनात् and substitutes वाऽपि for वादात् while B. and C. read सज्ञान° for स्वज्ञान and प्राधान्यतो ब्रूयात् for प्राध्यापनाच्च यत् while A. reads प्राधान्यतश्च यत् for प्राध्यापनाच्च यत्. ५. A. and D. originally read द्यूतपूर्वकम् for °द्भुतपूर्वकम्. ६. A. reads संनिविष्टे for शिल्पिष्वपि. and D. originally reads मूल्याद्यत्राधिकम् for स्वस्थाद्यच्चाधिकम्. ७. A. reads यान्यत्तच्छिष्यतः तथा and B. and C. read यान्यतो मिश्रितस्तथा for याज्यतः शिष्यस्ततथा. ८. A. and D. originally read अतो for अनेन.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

zed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

'कुटुम्बं बिभृयाद्भ्रातुर्यो विद्यामधिगच्छतः ।
भागं विद्याधनात्तस्मात्स लभेताश्रुतो[1]ऽपि सन्' ॥
(ना. स्मृ. १३. १०.)

इति । कात्यायनोऽपि—
'कुले विनीतविद्यानां[2] भ्रातॄणां पितृतोऽपि वा ।
शौर्यप्राप्तं तु यद्वित्तं विभाज्यं तद्बृहस्पतिः' ॥

इति । अविभक्तस्य कुले पितृव्यादेः पितृतोऽपि वा प्राप्तविद्यानां यद्धनं शौर्यादिनाऽप्राप्तं विद्ययैव प्राप्तं तद्विद्याधनं[3] विभाज्यमिति । पितृद्रव्या[4]र्जितेनार्जिते विद्याधने भागद्वयमर्जकस्या[5]ह वसिष्ठः—

'येन चैषां यदुपार्जितं[6] स्याद्द्व्यंशमेव लभेत' ।
(व. स्मृ. १७. ५१.)

इति । यत्तु—
'सामान्यार्थसमुत्थाने विभागस्तु समः स्मृतः' ॥

इति । तद्विद्येतरकृष्याद्यु[7]पार्जितधनविषयम् । अविभाज्यविद्याधने अर्जकेच्छया अंशमाह[8] गौतमः—

'स्वयमर्जितं चैव वैद्येभ्यो वैद्यः कामं दद्यात्'

इति । इच्छा[9]भावेत्वाह नारदः—
वैद्यो वैद्याय नाकामो दद्यादंशं स्वतो धनात् ।

---

१. B. and C. read °ऽसुतोऽपि for °श्रुतोऽपि. २. D. originally reads कुलतोवाप्तविद्यानाम् for कुले विनीतविद्यानाम्. ३. D. reads शौर्यादिभिः प्राप्तं तद्विद्याधनम्. ४. D. reads पितृव्याविरोधेन. ५. B. and C. read एकस्य for अर्जकस्य. ६. B. C. and D. read स्वयमुपार्जितम् for यदुपार्जितम्. ७. B. and C. read विद्येतरतया for विद्येतरकृष्यादि. ८. B. reads अंशविभागम् and B. and C. read अंशान् for अंशम्. ९. B. and C. add तत् to इच्छा.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

itized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

पितृद्रव्यं समाश्रित्य न चेत्तेन तदाहृतम्[१] ' ॥

(ना. स्मृ. १३. ११.)

अवैद्याय[२] सकामोऽपि न दद्यात् । तदाह कात्यायनः—

' नाविद्यानां[३] तु वैद्येन देयं विद्याधनं क्वचित् ।

समविद्याधिकानां तु देयं वैद्येन तद्धनम् ' ॥

इति । विद्याप्राप्तधनवत् शौर्यादिप्राप्तमपि धनमविभाज्यमित्याह स एव—

' शौर्यप्राप्तं विद्यया च स्त्रीधनं चैव यत्स्मृतम् ।

एतत्सर्वं विभागे तु विभाज्यं नैव रिक्थिभिः ॥

ध्वजाहृतं भवेद्यत्तु विभाज्यं नैव तत्स्मृतम् ' ।

इति । ध्वजाहृतस्य लक्षणं तेनैवोक्तम् —

' संग्रामादाहृतं यत्तु विद्राव्य द्विषतां बलम् ।

स्वाम्यर्थं जीवितं त्यक्त्वा तद्ध्वजाहृतमुच्यते ' ॥

इति । बृहस्पतिरपि—

' पितामहपितृभ्यां च दत्तं मात्रा च यद्भवेत् ।

तस्य तन्नापहर्तव्यं शौर्यभार्याधनं तथा ' ॥

इति । शौर्यप्राप्तधनस्वरूपं च कात्यायनेन दर्शितम्—

' आरुह्य संशयं यत्र प्रसभं कर्म कुर्वते ।

तस्मिन् कर्मणि तुष्टेन प्रसादः स्वामिना कृतः ॥

तत्र लब्धं तु यत्किंचित् धनं शौर्येण तद्भवेत् ' ।

---

१. A. B. and C. reads तद्धनमा° for तेन तदा°. २. D. reads अविद्याय. ३. D. originally reads अविद्यायाम् for नाविद्यानाम् while A. substitutes °धनं for °धनात्.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

zed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

इति । पित्रादिद्रव्योपजीवनेन विद्याप्राप्तधनवत्[1] शौर्य-प्राप्तधनेऽप्यर्जकस्य भागद्वयमाह व्यासः—

'साधारणं समाश्रित्य यत्किंचिद्वाहनायुधम् ।
शौर्यादिनाप्नोति धनं भ्रातरस्तत्र भागिनः ॥
तस्य[2] भागद्वयं देयं शेषास्तु समभागिनः ।

इति । अन्यदप्याविभाज्यमाह मनुः—

'वस्त्रं[3] पत्रमलंकारं कृतान्नमुदकं स्त्रियः ।
योगक्षेमं प्रचारं च न विभाज्यं प्रचक्षते' ।

(म. स्मृ. ९. २१९.)

इति । वस्त्रं पितृ[4]धृतं वस्त्रम् । पितृधृतं वस्त्रं पितुरूर्ध्वं विभागे श्राद्धभोक्त्रे दातव्यम् । तथाच बृहस्पतिः—

'वस्त्रालंकारशय्यादि पितुर्यद्वाहनादिकम् ।
गन्धमाल्यैः समभ्यर्च्य श्राद्धभोक्त्रे तदर्पयेत्' ॥

इति । अन्यानि तु वस्त्राणि विभाज्यान्येव । पत्र[5]मश्व-शिबिकादिवाहनं तदपि यद्येनारूढं तत्तस्यैव । अनारूढं तु सर्वैर्विभाज्यम् । अलंकारोऽपि यो येन धृतः स तस्यैव । अधृतः साधारणो विभाज्य एव—

'पत्यौ जीवति यस्त्रीभिरलंकारो धृतो भवेत् ।
न तं भजेरन् दायादा भजमानाः पतन्ति ते' ॥

(म. स्मृ. ९. २००.)

---

१. B. C. and D. substitute इव for °वत्. २. A. does not insert this line. ३. B. and C. do not insert this whole verse and also इति. ४. A. and D. omit पितृ. ५. A. B. C. and D. originally read पत्रं वाहनं before पत्रमश्वशिबिकादि°.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

itized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

इति। तेनैव धृत इति विशेषेनोपादानात्[1]। कृतान्नं तण्डुलमोदकादि[2]। तदपि यथासंभवं भोक्तव्यं न विभाज्यम्। उदकं तदाधारः कूपादिः। सोऽपि विषमः[3] पर्यायेण भोक्तव्यो न मूल्यद्वारेण विभाज्यः। स्त्रियश्च दास्यो विषमाः पर्यायेण कर्म कारयितव्याः।

तथा च बृहस्पतिः—

'एकां स्त्रीं कारयेत्कर्म यथांशेन गृहे गृहे।
बह्व्यः समांशतो देया दासानामप्ययं विधिः'॥

इति। पित्रावरुद्धास्तु समा अपि न विभाज्याः। तथाच गौतमः—

'स्त्रीषु संयुतास्[4]स्वविभागः'॥

(गौ. स्मृ. २८. ४७.)

इति। योग इति श्रौतस्मार्ताग्निसाध्यमिष्टं कर्म लक्ष्यते। क्षेमः इति लब्धपरीक्षणहेतुभूतं बहिर्वेदिदानतडागाराम-निर्माणादि पूर्तं कर्म लक्ष्यते। तदुभयं पितृद्रव्यविरोधेनार्जि[5]तमप्यविभाज्यम्। तदुक्तं लौगाक्षिणा—

'क्षेमं पूर्तं यागमिष्टमित्याहुस्तत्त्वदर्शिनः।
अविभाज्ये च ते प्रोक्ते शयनासनमेव च'॥

---

१. A. reads विशेषणोपादानात् and B. and C. विशेषेणोपादानात् for विशेषेनोपादानात्. २. D. reads मोदकतन्दुलादि and for यथासंभवं originally reads यथासंभूय. ३. D. reads विषमपर्यायेण for विषमः पर्यायेण. ४. B. and C. read युक्तासु for संयुतासु. ५. A. B. and C. read °विरोधार्जितम् for °विरोधेनार्जितम्.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

zed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

इति । अथवा योगक्षेमशब्देन छत्रंचामरशस्त्रवाहनादि-प्रभृतय उच्यन्ते । प्रचारो गृहारामादिषु प्रवेशनिर्गममार्गः । सोऽप्यविभाज्यः । यत्तु उशनसा क्षेत्रस्याप्यविभाज्यत्व-मुक्तम्—

'अविभाज्यं सगोत्राणामासहस्रकुलादपि ।
याज्यं क्षेत्रं च पत्रं च कृतान्नमुदकं स्त्रियः' ॥

इति । तत्प्रतिग्रहलब्धक्षेत्रं क्षत्रियासुतेन सार्धं ब्राह्मणी-सुतेन अविभाज्यमित्येवं परम् ।

'न प्रतिग्रहभूर्देया क्षत्रियादिसुताय च' ।

इति स्मरणात् । अन्ये मन्यन्ते । वस्त्रादयोऽपि विभा-ज्या एव ।

तथाच बृहस्पतिः—

'वस्त्रादयोऽविभज्यायैरुक्तं तैर्न विचारितम् ।
धनं भवेत्समृद्धानां वस्त्रालङ्कारसंश्रितम् ॥
मध्यस्थितमनाजीव्यं दातुं नैकस्य शक्यते ।
युक्त्या विभजनीयं तदन्यथानर्थकं भवेत् ॥
विक्रीय वस्त्राभरणमृणमुद्ग्राह्य लेखितम् ।
कृतान्नं वा कृतान्नेन परिवर्त्य विभज्यते ॥
उद्धृत्य कूपवाप्यम्भस्त्वनुसारेण गृह्यते ।

१. A. B. C. and D. read शस्त्रचामरछत्रोपानत्प्रभृतयः. २. A. B. and C. read वाप्यम् for याज्यम्. ३. D. reads °संस्थितम्. ४. A. reads तैः कस्य for नैकस्य. ५. D. substitutes च for वा. ६. B. C. and D. read तदनुसारेण for त्वनुसारेण.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

itized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant2 Equipment Heritage Foundation, Jalga

एकां स्त्रीं कारयेत्कर्म यथांशेन गृहे गृहे ॥
बह्व्यः समांशतो देया दासानामप्ययं विधिः ।
योगक्षेमवतो लाभः समत्वेन विभज्यते[1] ।
प्रचारश्च यथांशेन कर्तव्यो ऋक्थिभिः सह ' ॥

इति । तेन[2] वस्त्रादीनामेवि[3]भाज्यत्वप्रतिपादकं मनुवचनमुशनोवचनं चानादरणीयम्[4] । तदनुपपन्नम् । विरोधे हि वचनानां विषयव्यवस्थाश्रयणं युक्तं न चान्यथाकरणम्[5] । बृहस्पतिवचनानां तु अधृतवस्त्रादिविषयत्वम् । मन्वादिवचनस्य तु धृतवस्त्रादिविषयत्वं पूर्वमेवोक्तमिति विषयव्यवस्था घटते ।

विभागकाले केनचिद्वञ्चितं[6] पश्चादुद्भावितं चेत् तत्सर्वे[7] समं विभजेयुः । तथाच याज्ञवल्क्यः—

' अन्योन्यापहृतं द्रव्यं विभक्ते[8] यत्तु दृश्यते ।
तत्पुनस्ते समैरंशैः विभजेरन्निति स्थितिः ' ॥

(या. स्मृ. २. १२६.)

इति । समशब्दो विषमविभाग[9]निरासार्थः । विभजेरन्निति बहुवचनेन येन दृष्टं तेनैव न ग्राह्यमिति दर्शयति[10] ।

---

१. D corrects विभाज्यते. २. B. and C. read नव° for तेन. ३. B. and C. read °मापि for °मवि. ४. B. and C. substitute only वा° for चाना.° ५. B. C. and D. read बाधाश्रयणम् for चान्यथाकरणम्. ६. D. originally reads अपहृतम् and in the margin वञ्चितम् and adds a word वित्तम् after वञ्चितम्. ७. A. reads सर्वम् for सर्वे. ८. B. and C. read विभक्तम् for विभक्ते. ९. B. reads °भाग° for °विभाग°. १०. B. C. and D. read दर्शयितुम् for दर्शयति.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

zed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

मनुरपि—

‘ऋणे धने च सर्वस्मिन् प्रविभक्ते यथाविधि ।
पश्चाद्दृश्येत यत्किंचित् तत्सर्वं समतां नयेत्’ ॥
(म. स्मृ. ९. २१८.)

इति । अपहृतद्रव्यवच्छास्त्रोक्तानतिक्रमेण विषमभागतया विभक्तमपि समतां नयेत् । तथाच कात्यायनः—

‘अन्योन्यापहृतं द्रव्यं दुर्विभक्तं च यद्भवेत् ।
पश्चात्प्राप्तं विभज्येत समभागेन तद्गुः’ ॥

इति । एवं च सति वञ्चितद्रव्यस्य पश्चाद्दृष्टस्यैव विभागविधानात् पूर्वं विभक्तस्य [1]पुनर्विभागो नास्तीत्यवगम्यते । यत्तु मनुनोक्तम्—

‘विभागे तु कृते किंचित्सामान्यं यत्र दृश्यते ।
नासौ विभागो विज्ञेयः कर्तव्यः पुनरेव हि’ ॥

इति । तद्विभक्तद्र[2]व्येष्वायव्ययकरणादर्वाग्वेदितव्यम् । अन्योन्यापहृतमित्यादिवचनानां निर्विषयतापत्तेः । अत्रान्योन्यव[3]ञ्चने दोषोऽप्यस्ति । तथाच श्रुतिः—

‘यो वै भागिनं भागान्नुदते चयते वैनं स यदि
वैनं न चयतेऽथ पुत्रमथ पौत्रं चयते’ ।

इति । अयमर्थः । यो भागिनं भागार्हं भागान्नुदते भागाद[4]पाकरोति भागं तस्मै न प्रयच्छतीति यावत् । [5]अथ भागाच्च्युतः एनमपहारकं [6]चयते नाशयति पापिनं करोतीति

१. B. and C. read पश्चात् for पुनः. २. A. reads °द्रव्यार्जनव्यय° for °द्रव्येष्वायव्यय°. ३. B. and C. read °वचने for °वञ्चने. ४. B. and C. read अप्रकरोति for अपाकरोति. ५. B. C. and D. do not insert अथ. ६. B. and C. read पर्यते for चयते and substitute याथिकम् for पापिनम्.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

itized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

यावत् । यदि तं न नाशयति तदा तस्य पुत्रं पौत्रं वा नाशयतीति । यत्तु मनुनोक्तम्[1]—

'यो ज्येष्ठो विनिकुर्वीत लोभाद् भ्रातॄन् यवीयसः ।
सोऽज्येष्ठः स्यादभागश्च नियन्तव्यश्च राजभिः' ॥

(म. स्मृ. ९. २१३.)

इति । तत्स्वतन्त्रस्यापि ज्येष्ठस्य समुदायद्रव्यापहारे दोषोऽस्ति किमुतास्वतन्त्राणां यवीयसामित्येवं प्रतिपादनपरम् । न तु ज्येष्ठस्यैव दोषे[2]प्रतिपादनपरम् । अन्यथा स्मृत्या श्रुतेः सङ्कोचापत्तेः । विभक्तानां कर्तव्यमाह नारदः—

'यद्येकजाता बहवः पृथग्धर्माः पृथक्क्रियाः ।
पृथक्कर्मगुणोपेता न चेत्कार्येषु संमताः ॥
स्वभागान्[3]यदि दद्युस्ते विक्रीणीयुरथापि वा ।
कुर्युर्यथेष्टं तत्सर्वमीशास्ते स्वधनस्य च' ॥

(ना. स्मृ. १३. ४२-४३.)

इति । एकस्माज्जाता विभक्ता भ्रातरः परस्परानुमतिमन्तरेण धनसाध्येष्टापूर्तादिधर्मकारिणो भवेयुः । तथा धन[4]साध्यकृष्यादिकर्म[5]कारिणो भवेयुः । तथा विभिन्नोलूखलमुसलादिकर्मोपसर्जनद्रव्योपेताः स्युः । तथा च[6] कार्येषु भ्रातरो यदि न संमताः तदाताननादृत्य कार्यं कुर्युः । तथा विभक्ता

---

१. B. and C. read °वचनम् for मनुनोक्तम्. २. B. and C. read शेष° for दोष°. ३. B. and C. read स्वभावात् for स्वभागान्. ४. B. C. read द्रव्यव्यय° for धन° while D. reads द्रव्य but omits व्यय. ५. A. omits कर्म. ६. B. C. and D. do not insert च while D. reads originally संगताः.

72

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

zed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

भ्रातरः स्वभोगान्यदि दद्युर्विक्रीणीयुर्वा न दद्युर्वा[2] तत्सर्वं यथेष्टं कुर्युः । यस्मात्ते[3] विभक्ताः स्वधनस्येशाः स्वतन्त्राः स्वामिन इत्यर्थः । यत्तु बृहस्पतिवचनम्—

'विभक्ता वाऽविभक्ता वा दायादाः स्थावरे समाः ।
एको ह्यनीशः सर्वत्र दानाधमनविक्रये' ॥

इति । तदेवं व्याख्येयम् । अविभक्तेषु द्रव्येषु[4] साधारणत्वादेकस्यानीश्वरत्वात् सर्वैरनुज्ञाऽवश्यं[5] कार्या । विभक्तेषु तूत्तरकालं विभक्ताविभक्त[6]संशयव्युदासनसौकर्याय सर्वाभ्यनुज्ञा । न पुनरेकस्यानीश्वरत्वेन । अतो विभक्तानुमतिव्यतिरेकेणापि व्यवहारः सिध्यत्येवेति । यत्तु स्मृत्यन्तरम्—

'स्वग्रामज्ञातिसामन्तदायादानुमतेन च ।
हिरण्योदकदानेन षड्भिर्गच्छति मेदिनी' ॥

इति । तस्यायमभिप्रायः । तत्र ग्रामानुमतिः 'प्रतिग्रहः प्रकाशः स्यात्स्थावरस्य विशेषतः' इति स्मरणात् । व्यवहारप्रकाशनार्थमेवापेक्ष्यते । न पुनर्ग्रामानुमतिमन्तरेण व्यवहारो न सिध्यतीति । सामन्तानुमतिरपि सीमाविप्रतिपत्तिनिरासार्थमेव । दायादानुमतिरपि विभक्ताविभक्तसंशयव्युदासेन व्यवहारसौकर्यार्थमेव । हिरण्योदकदानमपि विक्रये कर्तव्ये सहिरण्योदकं दत्वा दानरूपेण स्थावरविक्रयं कुर्यादित्येवमर्थम् ।

---

१. B. C. and D. read स्वभावात् for स्वभागान्. २. B. and C. read विक्रीणीयुः तानादद्यो वा for विक्रीणीयुर्वा न दद्युर्वा. ३. B. C. and D. read तस्मात् for यस्मात् while B. and C. add न before विभक्ताः. ४. B. C. and D. read द्रव्यस्य for द्रव्येषु. ५. B. C. and D. read सर्वाभ्यनुज्ञा अवश्यं कार्या for सर्वैरनुज्ञाऽवश्यं कार्या. ६. A. omits °अविभक्त°.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

itized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

'स्थावरे विक्रयो नास्ति कुर्यादाधिमनुज्ञया'।

इति स्थावरविक्रयस्य निषिद्धत्वात्।

'भूमिं यः प्रतिगृह्णाति यश्च भूमिं प्रयच्छति।
तावुभौ पुण्यकर्माणौ नियतं स्वर्गगामिनौ'॥

इति दानप्रतिग्रहयोः प्रशंस्तत्वाच्च[1]। विभागापलापे निर्णयकारणमाह याज्ञवल्क्यः—

'विभागनिह्नवे ज्ञातिबन्धुसाक्ष्यभिलेखितैः[2]।
विभागभावना ज्ञेया गृहक्षेत्रैश्च यौतकैः'॥

(या. स्मृ. २. १४९.)

इति। ज्ञातयः पितृबन्धवः। बन्धवस्तु[3] मातुलादयः। लेख्यं विभागपत्रम्। एभिर्विभागनिर्णयो ज्ञातव्यः। यौतकैः[4] पृथक्कृतैर्गृहक्षेत्रैः। अन्यदपि विभागलिङ्गमाह नारदः—

'विभागधर्मसंदेहे दायादानां विनिर्णयः।
ज्ञातिभिर्भागलेख्येन पृथक्कार्यप्रवर्तनात्॥
भ्रातॄणामविभक्तानामेको धर्मः प्रवर्तते।
विभागे सति धर्मोऽपि भवेत्तेषां पृथक् पृथक्॥
साक्षित्वं प्रातिभाव्यं[5] च दानं ग्रहणमेव च।
विभक्ता भ्रातरः कुर्युर्नाविभक्ताः परस्परम्॥
दानग्रहणपश्वन्नगृहक्षेत्रप्रतिग्रहाः।
विभक्तानां पृथक् ज्ञेया[6] दानधर्मागमव्ययाः॥

१. B. and C. read प्राशस्त्यात्. २. B. and C. read बन्धुभिश्च विलेखितैः for बन्धुसाक्ष्यभिलेखितैः. ३. B. and C. read बान्धवेषु for बन्धवस्तु. ४. A. reads यौतके पृथक्कृतैर्गृहक्षेत्रे. ५. A. and D. read प्रति° for प्राति°. ६. B. reads नेया for ज्ञेया.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

zed by eGangotri/Sarayu Trust. Funding IKS-MoE Grant-2 Equipment Heritage Foundation, Ja

येषामेताः क्रिया लोके प्रवर्तन्ते स्वरिक्थिषु ।
विभक्तानवगच्छेयुर्लेख्यमप्यन्तरेण तान्' ॥

(ना. स्मृ. १३. ३६-४०.)

इति । बृहस्पतिरपि—

'पृथगायव्ययधनाः कुसीदं च परस्परम् ।
वणिक्पथं च ये कुर्युर्विभक्तास्ते न संशयः' ॥

इति । कुसीदवाणिज्यादिभिर्लिङ्गैर्विभागनिर्णयः साक्ष्याद्यभावे वेदितव्यः । तथा च स एव—

'साहसं स्थावरस्वाम्यं[1] प्राग्विभागश्च रिक्थिनाम् ।
अनुमानेन विज्ञेयं न स्युर्यत्र[2] च साक्षिणः' ॥

इति । साहसादिसाधकलिङ्गान्यपि स एवाह—

'कुलानुबन्धव्याघातहोढं साहससाधकम्[3] ।
स्वस्वभोगस्थावरस्य विभागस्य पृथग्धनम्' ॥

इति । कुलानुबन्धः पूर्वपुरुषवैरानुबन्धः । व्याघातः परस्परस्य होढं बलादपहृतं द्रव्यं तस्य दर्शनं[4] स्वस्यात्मनो भोगः परस्परं पृथग् ग्रहणादेर्विभागलिङ्गत्वमविभक्तेषु निषिद्धत्वेनावगन्तव्यम् । तथाच याज्ञवल्क्यः—

---

१. B. and C. read स्थावरं स्वाम्यम् for स्थावरस्वाम्यम्. २. D. originally reads यस्य and in the margin यत्र. ३. B. reads साधकौ for साधकम् and also B. and C. read स्वस्य भौमस्थावरस्य for स्वस्वभोगस्थावरस्य. ४. B. and C. read बान्धवत्वादपहृतद्रव्यतोंशादर्शनम् for बलादपहृतं द्रव्यं तस्य दर्शनम्.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

itized by eGangotri/Sarayu Trust. Funding:IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

'भ्रातृणामथ दम्पत्योः पितुः पुत्रस्य चैव हि ।
प्रातिभाव्यमृणं साक्ष्यमविभक्तेन तु स्मृतम्' ॥

(या. स्मृ. २. ५२.)

इति । साक्षिलेख्ययुक्तिभिर्निर्णयस्याशक्यत्वे ।

'युक्तिष्वप्यसमर्थासु शपथैरेवं मर्दयेत्' ।

इति प्राप्तं दिव्यं निषेधति वृद्धयाज्ञवल्क्यः—

'विभागधर्मसंदेहे बन्धुसाक्ष्यभिलेखितैः ।
विभागभावना कार्या न भवेद्दैविकी क्रिया' ॥

(या. स्मृ. २. १४९.)

इति । कथं तर्हि तत्र निर्णय इत्याकाङ्क्षायामाह मनुः—

'विभागे यत्र संदेहो दायादानां परस्परम् ।
पुनर्विभागः कर्तव्यः पृथक् स्थानस्थितैरपि' ॥

इति । यत्र संदेहो युक्तिभिरपि नापैति तत्र पुनर्विभागः कर्तव्य इत्यर्थः । यत्तु तेनैवोक्तम्—

'सकृदंशो निपतति सकृत्कन्या प्रदीयते ।
सकृदाह ददामीति त्रीण्येतानि सकृत्सकृत्' ॥

इति । तद्युक्त्यादिभिर्निर्णेतुं शक्तौ सत्यां वेदितव्यम् ।

---

१. B. and C. read दान्यम् for साक्ष्यम्. २. B. originally reads एनमर्हयेत् and in the margin एनमर्दयेत्. ३. B. and C. omit तर्हि. ४. This verse does not appear in the several printed editions of the मनु but it has, in a manuscript, been commented upon by मेधातिथि a wellknown commentator. ५. B. reads ददातीति and C. ददानीति.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ized by eGangotri/Sarayu Trust. Funding: IKS MoE-Grant-2 Equipment Heritage Foundation, Ja

स्वयं कृतस्य संदिग्धस्य[1] विभागस्य पुनः प्रवर्तको राज्ञा दण्डनीय इत्याह बृहस्पतिः—

'स्वेच्छाकृतविभागो यः पुनरेव विसंवदेत् ।
स राज्ञां[2] शक्यते स्थाप्यः शासनीयोऽनुबन्धतः' ॥

इति । अनुबन्धतो निर्बन्धतः[3] ।

॥ इति दायविभागः ॥

। अथ द्यूतसमाह्वयाख्ये विवादपदे निरूप्येते ।

तयोः स्वरूपमाह मनुः—

'अप्राणिभिर्यत्क्रियते तल्लोके द्यूतमुच्यते ।
प्राणिभिः क्रियते यस्तु स विज्ञेयः समाह्वयः' ॥

(म. स्मृ. ९. २२३.)

इति । अप्राणिभिरक्षवध्र[4]शलाकादिभिः । प्राणिभिः[5] कुक्कुटादिभिः । तथाच नारदः—

'अक्षवध्रशलाकाद्यैर्देवनं जिह्मकारितम् ।
पणक्रीडा वयोभिश्च पदं[6] द्यूतसमाह्वयम्' ॥

(ना. स्मृ. १६. १.)

---

१. B. C. and D. read असंदिग्धस्य while B. and C. omit विभागस्य. २ B. and C. read राज्ञांशे स्वके while D. राज्ञांशे क के. Both seem to be incorrect. ३. A. B., and C. read निबन्धतः. ४. B. and C. read °वध° and D. originally reads वद्ध for वध्र. ५. B. and C. omit प्राणिभिः. ६. B. and C. read पदद्यूत°, D. also the same.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

itized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

इति । अक्षाः पाशकाः । वध्राश्चर्मपट्टिकाः । शलाका दन्तादिमयाः दीर्घचतुरस्राः । आद्यशब्देन कपर्दिकादयो गृह्यन्ते । तैः पणपूर्वकं यद्देवनं क्रीडनं[1] क्रियते तद्द्यूतं वयोभिः पक्षिभिः कुक्कुटादिभिः च कारान् मल्लमेषादिभिश्च प्राणिभिर्या पणपूर्विका क्रीडा क्रियते स समाह्वय इत्यर्थः । बृहस्पतिरपि—

'अन्योन्ये[2]परिगृहीताः पक्षिमेषवृषादयः ।
प्रहरन्ते कृतपणास्तं वदन्ति समाह्वयम्'

इति । द्यूतस्थानं सभिकेनाधिष्ठितं कार्यमित्याह स एव—
'साभिका[3]धिष्ठितं कार्यं तस्करज्ञानहेतुना[4]' ।
इति । त[5]त्र पक्षान्तरमाह नारदः—

'अथवा कितवो राज्ञे दत्वा भागं यथोदितम् ।
प्रकाशं देवनं कुर्यादेवं दोषो न विद्यते' ॥

(ना. स्मृ. १६. ८.)

इति । द्यूतसभा[6]धिकारिणो वृत्तिमाह याज्ञवल्क्यः—
'ग्लहे[7] शतिकवृद्धेस्तु सभिकः पञ्चकं शतम् ।
गृह्णीयाद्धूर्त[8]कितवादितराद्दशकं शतम्' ॥

(या. स्मृ. २. १९९.)

---

१. B. and C. omit क्रीडनम्. २. B. and C. read अन्योन्यम्. ३. A. B. C. and D. originally read सविका° for साभिका°. ४. B. C. read °हेतुना; D. °हेतवे. ५. B. and C. read अत्र for तत्र. ६. B. originally reads °शलाका° and in the margin °सभा°. ७. B. and C. read गृहे and D. also originally the same. ८. B. C. and D. originally read द्यूत° for धूर्त°.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

zed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

इति । परस्परसंप्रतिपत्त्या कितवपरिकल्पितपणो ग्लहः । तत्र तदाश्रया शतिका शतपरिमिता तदधिकपरिमाणा वा वृद्धिर्यस्यासौ शतिकवृद्धिः । तस्मात्कितवात्पञ्चकं शतं सभिकः आत्मवृत्त्यर्थं गृह्णीयात् । पञ्चपणा आयो यस्मिन् शते तच्छतपञ्चकम् जितग्लहस्य विंशतितमं भागं गृह्णीयादिति यावत् । कितवनिवासार्थं शाला सभा तत्राधिष्ठितः सभिकः । सभापतिस्तु कल्पिताक्षादिनिखिलक्रीडोपकरणः तदुपचितद्रव्योपजीवी । इतरस्मादपूर्णशतवृद्धेः कितवाद्दशकं शतं जितद्रव्यस्य दशमं भागं गृह्णीयादित्यर्थः । एवं स्थापितस्य सभिकस्य कृत्यमाह स एव—

'स[1] सम्यक्पालितो दद्याद्राज्ञे भागं यथाकृतम् ।
जितं तद्वाहयेत्[2] जेत्रे दद्यात् सत्यं वचः क्षमी' ॥

(या. स्मृ. २. २००.)

इति । यः क्लृप्तवृत्तिर्द्यूताधिकारी राज्ञा धूर्तकितवेभ्यो रक्षितः स राज्ञे यथाप्रतिपन्नमंशं दद्यात् । जितं द्रव्यं पराजितसकाशादासेधादिना उद्धृत्य जेत्रे[3] दद्यात् । तथा क्षमी भूत्वा द्यूतकारिणां विश्वासार्थं स[4]त्यं वचो दद्यात् । बृहस्पतिरपि—

'सभिको ग्राहकस्तत्र दद्याज्जेत्रे[6] नृपाय च' ।

---

१. D. originally reads असम्यक् for स सम्यक् and substitutes originally °क्रमम्. for °कृतम्. २. D. originally reads उद्माहयेत् for तद्वाहयेत् while B. and C. and D. in the margin read क्षेत्रे for जेत्रे. ३. B. and C. read क्षेत्रे. D. also originally the same for जेत्रे. ४. B. and C. add स before सत्यम्. ५. D. reads इति for अपि. ६. B. and C. read क्षेत्रे for जेत्रे.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

itized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

इति । पराजितकितवानां बन्धनादिना पणग्राहको भवेत् । पणग्रहणादर्वागेव स्वकीयं पणं[1] राज्ञे[2] जेत्रे च यथाभागं दद्यादित्यर्थः । तथा च कात्यायनः—

‘ जेतुर्दद्यात्स्वकं द्रव्यं जितं ग्राह्यं[3] त्रिपक्षकम् ।
सद्यो वा[4] सभिकेनैव कितवात्तु न संशयः ’ ॥

इति । यदा सभिको जेत्रे जितं द्रव्यं दापयितुं न शक्तः तदा राजा दापयेदित्याह याज्ञवल्क्यः—

‘ प्राप्ते नृपतिना भागे[5] प्रसिद्धे धूर्तमण्डले ।
जितं ससभिके स्थाने दापयेदन्यथा न तु ’ ॥

(या. स्मृ. २. २०१.)

इति । अन्यथा प्रच्छन्ने सभिकरहिते अदत्त[6]राजभागे द्यूते जितं पणं जेत्रे न दापयेदित्यर्थः । अत्र जयपराजयविप्रतिपत्तौ निर्णयकारणमाह स एव—

‘ द्रष्टारो व्यवहाराणां साक्षिणश्च त एव हि ’ ।

(या. स्मृ. २. २०२.)

इति । द्यूताख्यव्यवहाराणां द्रष्टारः कितवा एव राज्ञा नियोक्तव्याः न तु श्रुताध्ययनसंपन्ना इत्युक्तलक्षणाः । साक्षिणश्च त एव द्यूतकारा एव । विष्णुरपि—

---

१. B. C. and D. do not insert पणम्. २. A. omits राज्ञे and also च. ३. D. originally reads वाह्यम् for ग्राह्यम्. ४. D. originally reads सद्योवसतिकेनैव. ५. B. originally reads भावेप्रसिद्धद्यूतमण्डले while A. B. and C. substitute °द्यूत° for °धूर्त°. ६. A. reads अतीत for अदत्त.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

zed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

‘ कि[1]तवेष्वेव तिष्ठेरन् कितवाः संशयं प्रति ।
य एव तत्र द्रष्टारस्त एवैषां तु साक्षिणः ’ ॥

इति । साक्षिणां परस्परविरोधे राजा विचारयेदित्याह बृहस्पतिः—

‘ उभयोरपि संदिग्धौ कितवाः स्युः परीक्षकाः ।
यदा वि[2]द्वेषिणस्ते तु तदा राजा विचारयेत् ’ ॥

इति । कूटद्यूतकारिणो दण्डमाह याज्ञवल्क्यः—

‘ राज्ञा सचिह्नं निर्वास्याः कूटाक्षोपाधिदेविनः ’ ॥
(या. स्मृ. २. २०२.)

इति । कूटैरक्षादिभिरुपाधिभिर्मणिमन्त्रादि नामतिवञ्चनेन ये दिव्यन्ति तान् श्वपदेनाङ्कयित्वा स्वराष्ट्रान्निर्वासयेदित्यर्थः । निर्वासने विशेषमाह नारदः—

‘ कूटाक्षदेविनः पापान् राजा राष्ट्राद्विवासयेत् ।
कण्ठेऽक्षमालामासज्य स ह्येषां विनयः स्मृतः ’ ॥
(ना. स्मृ. १६. ६.)

इति । द[3]ण्डने विशेषमाह विष्णुः—

‘ द्यूते कूटाक्षदेविनां करच्छेदः ।
उपाधिदेविनां स[4]न्दंशच्छेदः ’ ॥
(वि. स्मृ. ९. १३५–१३६.)

इति । अनि[5]र्युक्तद्यूतकारिणो दण्डमाह नारदः—

---

१. D. reads कितवा एव. २. D. originally reads विप्रेक्षिणः for विद्वेषिणः. ३. D. reads दण्डे for दण्डने. ४. D. reads संदेश°. ५. B. and C. read अनियुक्ताः and D. originally अनियुक्ते and in the margin अनियुक्ताः for अनियुक्त°.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

itized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

'अनिर्दिष्टस्तु यो राज्ञा द्यूतं कुर्वीत मानवः ।
न सतं प्राप्नुयात् कामं विनयं चैव सोऽर्हति' ॥

(ना. स्मृ. १६. ७.)

इति । द्यूते[1] विहितं कर्मजातं समाह्वये अतिदिशति याज्ञवल्क्यः—

'एष एव विधिर्ज्ञेयः प्राणिद्यूते समाह्वये' ।

(या. स्मृ. २. २०३.)

इति । सभिकवृत्तिकल्पनादिलक्षणो धर्मः समाह्वयेऽपि विज्ञेय इत्यर्थः । प्राणिद्यूते प्राणिनां जयपराजयौ तत्स्वामिनोरित्याह बृहस्पतिः—

'द्वन्द्वयुद्धेन यः कश्चिदवसादमवाप्नुयात् ।
तत्स्वामिना पणो देयो यस्तत्र परिकल्पितः' ॥

इति । पणपरिकल्पनमपि कृताकृतमित्याह नारदः—

'परिहासकृतं यच्च यच्चाप्यविदितं नृपे ।
तत्रापि नाप्नुयात् काम्यं[2]मथवाऽनुमतं तयोः' ॥

इति । काम्यः[3] कामः पणः । यत्तु मनुनोक्तम्—

'द्यूतं समाह्वयं चैव यः कुर्यात्कारयेत वा ।
तान् सर्वान् घातयेद्राजा शूद्रांश्च द्विजलिङ्गिनः ॥

(म. स्मृ. ९. २२४.)

---

१. B. and C. read द्यूतं विहितं कर्मजातम् while D. विहितकर्मजातम्. २. D. reads originally कामं यथा and in the margin काम्यं यथा; while B. and C. काममथ all for काम्यम् अथ. ३. D. reads काम्यकामपणः.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

zed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

प्रकाशमेतत् तास्कर्यं यद्देवनसमाह्वयौ ।
तयोर्नित्यं प्रतीघाते नृपतिर्यत्नवान् भवेत् ॥
(म. स्मृ. ९. २२२.)

द्यूतं समाह्वयं चैव राजा राष्ट्रान्निवारयेत् ।
राजान्तकारिणावेतौ द्वौ दोषौ पृथिवीक्षिताम् ॥
(म. स्मृ. ९. २२१.)

कितवान् कुशीलवान् कौलान् पाषण्डानपि मानवान्।
विकर्मस्थान् शौण्डिकांश्च क्षिप्रं निर्वासयेत्पुरात् ' ॥
(म. स्मृ. ९. २२५.)

इत्यादि। तत्सर्वं कूटाक्षदेवनविषयतया राज्ञामध्यक्षसभिकरहितविषयतया वा योज्यम् । अत एव बृहस्पतिः—

' द्यूतं निषिद्धं मनुना सत्यशौचधनापहम् ।
अभ्यनुज्ञातमन्यैस्तु राजभागसमन्वितम् ।
सभिकाधिष्ठितं कार्यं तस्करज्ञानहेतुना ' ॥

इति ।

द्यूतसमाह्वयाख्ये विवादपदे निरूपिते ।

प्रसक्तोद्देशक्रमानुरोधेन ऋणादानादिसमाह्वयान्तान्यष्टादश व्यवहारपदानि निरूपितानि ।

---

१. D. reads कुत्सितकलान् पाखण्डांश्चैव while B. कुशीलवान् क्रूरान् पाषण्डस्थांश्च for कुशीलवान् कौलान् पाषण्डानपि. २. A. reads °सुखापहम् while D. originally reads तत्रैव for मनुना. ३. B. and C. read मनूक्तोद्देश° and D. मनुनोक्तोद्देश°.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

itized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

अथ बृहस्पतिना निरूपितं प्रकीर्णकाख्यं विवादपदमभिधीयते ।

तस्य च[1] लक्षणभेदौ नारदेन निरूपितौ[2]—

'प्रकीर्णकेषु[3] विज्ञेया व्यवहारा नृपाश्रयाः ।
राज्ञामाज्ञाप्रतीघातस्तत्कर्मकरणं तथा ॥
पुनः प्रमाणसंभेदः प्रकृतीनां तथैव च ।
पाषण्डनैगमश्रेणीगणधर्मविपर्ययाः ॥
पितापुत्रविवादश्च प्रायश्चित्तव्यतिक्रमः ।
प्रतिग्रहविलोपश्च लोप आश्रमिणामपि[4] ॥
वर्णसंकरदोषश्च तद्वृत्तिनियमस्तथा ।
न दृष्टं यच्च पूर्वेषु सर्वं तत्स्यात् प्रकीर्णकम्' ॥

(ना. स्मृ. १७. १–४.)

इति । प्रकीर्णके विवादे ये विवादा राजाज्ञोल्लङ्घन–तदाज्ञाकरण–तत्कर्मकरणादि[5]विषयास्ते नृपसमवायिन एव । तत्र स्मृत्याचारव्यपेते मार्गे वर्तमानानां प्रतिकूलतामाज्ञाय व्यवहारनिर्णयं नृप एव कुर्यात् । एवं वदता यो नृपाश्रयो व्यवहारस्तत्प्रकीर्णकमित्युक्तं भवति । तत्र राजाज्ञाप्रतिघाते विशेषदण्डमाह याज्ञवल्क्यः—

---

१. A. and D. omit च. २. D. reads दर्शितौ. ३. D. reads पुनर्ज्ञेया for °षु विज्ञेया while B. and C. तैर्ज्ञेयाः for विज्ञेयाः. ४. D. reads लोपश्चाश्रमिणामपि. ५. A. B. and C. read °रक्षणादि° for °करणादि°.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ized by eGangotri/Sarayu Trust. Funding IKS-MoE Grant-2 Equipment Heritage Foundation, Ja

'न्यूनं वाभ्यधिकं वापि लिखेद्यो राजशासनम् ।
पारदारिकचोरं वा मुञ्चतो दण्ड उत्तमः' ॥
(या. स्मृ. २. २९९.)

इति । राजदत्तभूमेर्निबन्धनस्य वा परिमाणन्यूनत्वमाधिक्यं वा प्रकाशयन्[1]राजशासनं यो विलिखति यश्च पारदारिकं चोरं वा गृहीत्वा राज्ञेऽनिवेद्य मुञ्चति तावुभावुत्तमसाहसं दण्डनीयौ । व्यासोऽपि—

'न्यायस्थाने गृहीत्वार्थं अधर्मेण विनिर्णयम् ।
करोत्युत्तरकार्याणि[2] राजद्रव्यविनाशकः[3] ॥
उत्कोचजीविनो द्रव्यहीनान् कृत्वा विवासयेत्' ।

इति । तत्कर्मकरणे दण्डमाह याज्ञवल्क्यः—

'राजयानासनारोढुर्दण्ड[4] उत्तमसाहसः' ।
(या. स्मृ. २. ३०३.)

इति । कात्यायनोऽपि—

'राजक्रीडासु ये सक्ता राजवृत्त्युपजीविनः ।
अप्रियं चास्य यो वक्ता वधं[5] तेषां प्रकल्पयेत्' ॥

इति । राज्ञः कोशापहरणादौ दण्डमाह मनुः—

---

१. D. originally reads प्रकाशयेद्राज° and in the margin प्रकाशयन् राज°. २. D. originally reads कुर्वन्त्युत्कोचकास्ते तु and in the margin कुर्वन्त्युत्तरकार्याणि and कुर्वन्ति साहसं कार्यम् for करोत्युत्तरकार्याणि. ३. B. and C. read °विनाशके while D. originally विनाशकाः and in the margin विनाशके. ४. B. C. and D. originally राजयानासनारोहे दण्डो मध्यमसाहसः and in the margin D. reads समारोहे for °सनारोहे. ५. A. B. read बलं while D. reads बन्धम् for वधम्°.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

itized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

'राज्ञः कोशापहर्तॄंश्च प्रतिकूलेषु च स्थितान्।
घातयेद् विविधैर्दण्डैर्हरेत् सर्वस्वमेव च'॥

(म. स्मृ. ९. २७९.)

इति। सर्वस्वापहारेऽपि यद्यस्य जीवनोपकरणं तत्तस्य नापहर्तव्यमित्याह नारदः—

'आयुधान्यायुधीयानां बीजानि कृषिजीविनाम्।
वेश्यास्त्रीणामलंकारान् वाद्यातोद्यानि तद्विदाम्॥
यच्च यस्योपकरणं येन जीवन्ति कारुकाः।
सर्वस्वहरणेऽप्येतन्न राजा हर्तुमर्हति'॥

(ना. स्मृ. १७. १०–११.)

इति। ब्राह्मणस्य वधस्थाने मौण्ड्यमाह मनुः—

'ब्राह्मणस्य वधो मौण्ड्यं पुरान्निर्वासनाङ्कने।
ललाटे चाभिशस्ताङ्कः प्रयाणं गर्दभेन तु'॥

इति। कोपात्परस्परभेदनादौ दण्डमाह याज्ञवल्क्यः—

'द्विनेत्रभेदिनो राजद्विष्टादेशकृतस्तथा।
विप्रचिह्नेन शूद्रस्य जीवतोऽष्टशतो दमः'॥

(या. स्मृ. २. ३०४.)

इति। यत्तु स्मृत्यन्तरेऽभिहितम्—

'द्विजातिलिङ्गिनः शूद्रान् चित्रदण्डेन घातयेत्'॥

---

१. C. reads भरीणां चोपजीविकाम्. Printed texts of the मनु also follow this reading but it appears from the following line that the author माधवाचार्य does not agree with it. २. D. reads प्रमाणम् for प्रयाणम्. ३. D. in margin and printed texts of the याज्ञवल्क्य read विप्रत्वेन च for विप्रचिह्नेन.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

zed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

इति। तद् वृत्त्यर्थं ब्राह्मणलिङ्गधारणे[1] वेदितव्यम्। ब्राह्मणपीडाकारिणो दण्डमाह मनुः—

'ब्राह्मणान् बाधमानं तु कामादवरवर्णजम्।
हन्याच्चित्रैर्वधोपायैरुद्वेगकरैर्नृपः'॥

(म. स्मृ. ९. २४८.)

इति। शूद्राणां प्रव्रज्यादौ दण्डमाह कात्यायनः—

'प्रव्रज्यावसितं[2] शूद्रं जपहोमपरं तथा।
वधेन शासयेत् पापं दण्ड्यो वा द्विगुणं दमम्'॥
तीरितं[3] चानुशिष्टं च यत्र क्वचन विद्यते।
कृतं तद्धर्मतो ज्ञेयं न तत्प्राज्ञो निवर्तयेत्॥

(म. स्मृ. ९. २३३.)

इति। तदर्थिप्रत्यर्थिनोरन्यतरवचनाद्व्यवहारस्य अधर्मतो वृतत्वाशङ्कायां पुनर्द्विगुणदण्डप्रतिज्ञापूर्वकं व्यवहारं प्रवर्तयेत्। न पुनर्धर्मतो वृत्तत्वनिश्चयेऽपि राज्ञा लोभादिना प्रवर्तनीय इत्येवंपरम्। यत्पुनर्नृपान्तरेणापि न्यायापेतं कार्यं निवर्तितं तदपि सम्यक्परीक्षणेन धर्म्ये पथि स्थापनीयम्।

'न्यायापेतं यदन्येन राज्ञाऽज्ञानकृतं भवेत्।
तदप्यन्यायविहितं पुनर्न्याये निवेशयेत्'॥

इति स्मरणात्। अन्यायप्रगृहीतदण्डधनस्य गतिमाह—

'राज्ञान्यायेन यो दण्डो गृहीतो वरुणाय तम्।
निवेद्य दद्याद् विप्रेभ्यः स्वयं त्रिंशद् गुणीकृतम्'॥

१. D. reads धारिणः for धारणे. २. A. reads वासितम् and B. and D. वासिनम् for वसितम्. ३. A. B. and C. omit the portion तीरितं etc. to सत्त्वविच्छेदापत्तेः.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

itized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

इति । अन्यायेन यो दण्डो राज्ञा लोभादिना गृहीतः तं त्रिंशद् गुणीकृतं वरुणायेदं इति संकल्प्य ब्राह्मणेभ्यः स्वयं दद्यात् । यच्च दण्डरूपेण यावद् गृहीतमन्यायेन तत्तस्मै प्रतिदेयम् । अपहारदोषप्रसङ्गात् । इतरथा अन्यायदण्डग्रहणे पूर्वस्वामिनः सत्त्वविच्छेदापत्तेः ।

इति । एवं शास्त्रोक्तमार्गेण[1] व्यवहारदर्शिनो राज्ञः फलमाह यमः—

'एवं धर्मप्रवृत्तस्य राज्ञो दण्डधरस्य च ।
यशोऽस्मिन्[2] प्रथते लोके स्वर्गे वासस्तथाऽक्षयः' ॥

इति । मनुरपि—

'एवं सर्वानिमान्राजा व्यवहारान् समापयन् ।
व्यपोह्य किल्बिषं सर्वं प्राप्नोति परमां गतिम्' ॥

(म. स्मृ. ८. ४२०.)

इति श्रीमहाराजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपाल-
साम्राज्यधुरंधरस्य माधवामात्यस्य कृतौ पराशरस्मृति-
व्याख्यायां माधवीयायां तृतीयं व्यवहारकाण्डम्
समाप्तम् ॥

॥ समाप्तं चेदं व्यवहारकाण्डम् ॥

॥ समाप्ता चेयं पराशरस्मृतिस्तस्या व्याख्या च ॥

---

१. A. B. and C. read °मार्गमाह यमः. २. B. and C. read वासो for यशो.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

zed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

itized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

पराशरधर्मसंहितायास्तृतीयस्य व्यवहारकाण्डस्य विषयानुक्रमणिका ।

विषयाः	पृष्ठ
मङ्गलाचरणम्	१
ग्रन्थकर्तुः परम्पराकथनम् ...	१
व्यवहारप्रस्तावोपोद्घातः ...	२
क्षत्रियविशेषस्य राज्ञः क्षितिपालनं धर्मः	२
क्षितिपालनशब्दार्थः	२
क्षुद्राणां चोरादीनां शिक्षार्थं राजावतार इति कथनम्	३
ऋणादानादिव्यवहारविचार एव राज्ञः कर्तव्य इति बृहस्पतिराह.	४
राजादिशब्दविचारः	५
भूपादगुणप्रयुक्तराजधर्मकथनम् ...	५
व्यवहारशब्दस्यार्थिप्रत्यर्थिविवादत्वकथनम्...	६
रूढिलक्षणकथनम्	६
धर्मविच्छेदे विवादोत्पत्तिरिति कथनम्	६
द्वेषलोभादिदुष्टस्यैव व्यवहारकर्तृत्वं बृहस्पतिराह	७
व्यवहारशब्दस्य यौगिकार्थत्वकथनम्...	७
व्यवहारशब्दव्युत्पादनम् ...	७
व्यवहारस्य सपणत्वापणत्वाभ्यां द्वैविध्यकथनम्	८
व्यवहारस्यावान्तरभेदकथनम् ...	९
चतुष्पादव्यवहारलक्षणम् ...	१०
चतुस्स्थानव्यवहारलक्षणम् ...	१०
चतुस्साधनव्यवहारलक्षणम् ...	११
चतुर्हितव्यवहारलक्षणम् ...	११
चतुर्व्यापिव्यवहारलक्षणम् ...	११
चतुष्कारिव्यवहारलक्षणम् ...	११
त्रियोनिव्यवहारलक्षणम् ...	१२
द्व्यभियोगव्यवहारलक्षणम् ...	१२
द्विद्वारव्यवहारलक्षणम्... ...	१२
द्विगतिव्यवहारलक्षणम् ...	१३
अष्टाङ्गव्यवहारकथनम् ...	१३
अष्टादशपदव्यवहारकथनम् ...	१५
शतशाखव्यवहारलक्षणम् ...	१५
चतुष्पाद्व्यवहारस्य व्यवस्था ...	१६
निर्णयाख्यचतुर्थपादस्य धर्मादिभिश्चतुर्भिर्निष्पत्तिः ...	१६
धर्मादीनां निर्णयहेतुत्वम् ...	१६
व्यवहारस्य निर्णयहेतुत्वम् ...	१७
चरित्रजन्यनिर्णयकथनम् ...	१७
राजशासनस्य निर्णयहेतुत्वम् ...	१७
धर्मादीनां चतुर्णां पूर्वपूर्वस्य बाध्यत्वमुत्तरोत्तरस्य बाधकत्वम् ...	१७

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

विषयाः पृष्ठं

व्यवहारेण धर्मबाधोदाहरणम् ...१८
राजानुशासनशब्दार्थः १८
धर्मस्य कर्त्रादिपादभेदेन व्यवस्था ...१९
व्यवहारस्य त्रियोनित्वद्वियोनित्वादि २०
अष्टादशपदानां मध्ये एकैकस्यानन्तत्वम् २०
व्यवहारस्य द्विपदत्वकथनम् ...२०
अनन्तत्वेनोक्तानां व्यवहाराणामष्टादशस्वन्तर्भावकथनम् ...२१

इति व्यवहारपरिच्छेदः ।

अथ सभा निरूप्यते ।

धर्माधिकरणभूतायाः सभाया निर्माणप्रकारः २१
सभायां राज्ञः प्रवेशविधिः ...२२
सभां प्रविश्य राज्ञा मन्त्रिभिः सह कार्याणामनुसंधानम् ...२२
व्यवहारविचारकालकथनम् ...२३
व्यवहारकाले वर्ज्यास्तिथयः ...२३
सभायाश्चातुर्विध्यम् २४
सभाव्यतिरिक्तान्यमुख्यदशस्थानानि २४
आरण्यकसार्थिकादिनिर्णयव्यवस्था २४
वर्गिणां गणप्रभृतीनां कथनम् ...२५
सभ्यानां लक्षणम् २६
सभ्यानां संख्याकथनम् ...२६
वर्ज्यसभासदकथनम् २७
राज्ञः प्रतिनिधेर्लक्षणम् ...२७

विषयाः पृष्ठं

प्रतिनिधिना राजवत्सर्वकार्यनिर्वहणम् २७
व्यवहारन्यायकर्ता प्राड्विवाकः ...२७
राजशब्दार्थकथनम् २८
प्राड्विवाकशब्दार्थकथनम् ...२८
प्राड्विवाकलक्षणानि २८
प्राड्विवाकस्य गुणाः २९
प्राड्विवाकस्यानुकल्पः ...२९
प्राड्विवाकपदे ब्रह्मक्षत्रविशामधिकारः २९
वृषलयोजने बाधकथनम् ...२९
गणकलेखकयोर्नियोजनावश्यकता ...२९
गणकलक्षणम् २९
लेखकलक्षणम् ३०
साध्यपालयोजनकथनम् ...३०
साध्यपाललक्षणम् ३०
राज्ञा कतिपयैर्वणिग्भिः अधिष्ठितं सदः कर्तव्यम् ३१
वणिजामुपयोगकथनम् ...३१
राजादियुक्तसभाया दशाङ्गानि । दशानामपि चैतेषां पृथक्पृथक्कर्म ...३१
राज्ञो यथाविधिविचारे फलम् ...३२
विचारवैपरीत्ये दोषकथनम् ...३२
सभ्यानां यथाविधिविचारे फलम् ...३२
सभ्यानां वैपरीत्ये दोषकथनम् ...३२
यथाशास्त्रवादिनः कार्यानिष्पत्तावपि न प्रत्यवायः ३३
अपक्षपातिनो राज्ञो निष्पापत्वम् ...३३

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

itized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

विषयाः पृष्ठं

अन्यथावादिनः सभ्यस्य दण्डः ... ३३
उत्कोचजीविनः सभ्या निर्वास्याः... ३४
अनिर्णीतेऽर्थेऽर्थिना रहःसंभाषणे प्राड्विवाकोऽपि दण्ड्यः ... ३४
राजादीनां सभायामुपवेशनप्रकारः ३५
अङ्गिनो व्यवहारस्याङ्गप्रत्यङ्ग-कल्पना ३५
वृद्धज्ञानियुक्तायाः सभायाः प्रशंसा ३५

इति सभाविचारः।

अथ व्यवहारदर्शनविधिः।

मूर्धाभिषिक्तो राजा व्यवहारान्पश्येत् ३६
धर्मासनगतस्य राज्ञो लक्षणम् ... ३६
वैवस्वतव्रतलक्षणम् ३७
व्यवहारदर्शिना नृपेण धर्मशास्त्रमर्थशास्त्रं चानुसरणीयम् ... ३७
धर्मशास्त्राणां परिगणनम् ... ३७
नीतिशास्त्ररूपार्थशास्त्रलक्षणम् ... ३७
अर्थशास्त्रे धर्मशास्त्राविरुद्धांशः उपादेयः ३८
धर्मशास्त्रयोर्द्वयोर्विरोधे न्यायेन निर्णयः... ... ... ३९
न्यायानाश्रयणे बाधकथनम् ... ३९
न्यायस्य निर्णायकत्वकथनम् ... ३९
नृणां स्वरवर्णेङ्गिताकारैरन्तर्गतं भावं विभावयेत् ... ४०
भूतछलयोर्मध्ये छलं हेयं भूतमुपादेयम् ४०

विषयाः पृष्ठं

निर्णये साक्ष्यादिकं प्रमाणम् ... ४०
देशाचारस्यानुकल्पत्वकथनम् ... ४१
देशाचारस्वरूपम् ४१
तत्तद्देशीयानां मिथो विवादे देशाचारान्निर्णयः ४१
इतरैः सह विवादे शास्त्रतो निर्णयो न तु देशदृष्टतः ४१
लेख्यादिप्रमाणाभावे राज्ञा स्वेच्छया निर्णयः कार्यः ... ४१
वणिगादिसमयेषु समयिभिरेव निर्णयः ४१
निर्णयकारिणामुत्तमाधमभावकथनम् ४२
निर्णयकरणे राज्ञो नियमः ... ४२
छलादिष्वस्यापवादः... ... ४२
पञ्चाशत् छलानां परिगणनम् ... ४२
सापराधानां लक्षणानि ... ४४
आज्ञालङ्घनादीनामपराधत्वं विवादमन्तरेणापि दण्डनहेतुत्वात् ४४
द्वाविंशतिपदानां कथनम् ... ४५
स्तोभकसूचकयोः स्वरूपकथनम् ४५
राज्ञा शास्त्रादिपर्यालोचनपूर्वकमेव कार्यं कर्तव्यम् ... ४५
अष्टादशप्रकृतीनां कथनम् ... ४६
जात्यादीनां समीक्षणत्वकथनम् ४६
उन्मार्गवर्तिनां बलात्स्वमार्गे स्थापनं राज्ञा कर्तव्यम् ... ४६
कार्यदर्शनप्रकारः ४७

इति व्यवहारदर्शनविधिः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

zed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

विषयाः पृष्ठं

अथासेधादिविधिः।

आसेधार्हाणां कथनम् ...४७
आसेधस्य भेदाः ४७
आसेधानर्हाः ४८
असेध्यासेधकयोः स्वकालोल्लङ्घने दण्डः ४८
अनासेध्यानां कथनम् ...४८
द्रव्यदापनीयसमयकथनम् ...५०
आसिद्धो यदि नागच्छेत्तदा राज्ञा वलात्समानेयः ५०
आह्वानानर्हाणां कथनम् ...५०
स्वजातिप्रभुकालक्षणम् ...५१
आहूतो यदि नागच्छेत्तर्हि दण्ड्यः ५१
आपन्नस्यानागमनेऽपि न दण्ड ...५१

इत्यासेधविधिः।

अथ दर्शनोपक्रमः।

धर्मासनाधिष्ठितस्य कार्यदर्शन - रम्भे विधिः ५२
दर्शनारब्धुः कर्तव्यम् ५२
पृष्टश्च कार्यं यथावदावेदयेत् ...५२
आवेदनकाले सभ्यादयो वर्जनीयाः ५३
अर्थिनः प्रतिनिध्यभ्यनुज्ञा ...५३
नियोगमन्तरेणापि पित्रादयो विवादं कुर्युः ५३
उक्तेभ्यो व्यतिरिक्तस्य विवाद-निषेधः ५४
आवेदितार्थस्य लेखनीयत्वकथनम्...५४
लिखितार्थस्य संभावितत्वे तत्र प्रभोः प्रवृत्तिः ५४

विषयाः पृष्ठं

आहूतस्य प्रत्यर्थिनः सुरक्षितस्थाने स्थापनम् ५४
स्थापितस्य छलवादित्वं भूत-वादित्वं वा लक्षणैर्निश्चेयम् ...५५
लिङ्गान्तराणां कथनम् ...५५
छलवादपक्षे प्रतिभुवो ग्रहणम् ...५६
वर्ज्यानां प्रतिभुवां कथनम् ...५७
वादिनः प्रतिभूदानासामर्थ्ये कर्तव्यम् ५७
अभियोक्त्रादीनामुक्तिक्रमः ...५८
विवादे पूर्वाभियोक्तुरेव प्रतिज्ञा-वादित्वम् ५९
पूर्वाभियोक्तेऽप्यपवादकथनम् ...५९
उभयोर्युगपदर्थिप्रत्यर्थित्वे उत्कृष्ट-जातेर्बहुपीडस्य वार्थिनो वादः पूर्वं द्रष्टव्यः ५९
अनेकवादियुग्मानां युगपदुपस्थाने दर्शनक्रमः ६०

इति दर्शनोपक्रमः।

अथ चतुष्पाद्व्यवहारोपक्रमः।

चतुर्णां पादानां नामानि ...६०
प्रतिज्ञालक्षणम् ६०
पक्षदोषाणां कथनम् ६१
तेषामप्रसिद्धादीनां लक्षणानि ...६१
स्थावरविवादेषु देशकालादीनि दश निवेद्यानि ६२
भाषालक्षणम् ६२
भाषादोषकथनम् ६३
भाषादोषाणां विस्तरेण विवरणम् ...६३

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

itized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalga

विषयाः पृष्ठं

साधारणेऽर्थे बहुसंबन्धिनि कार्ये पक्षः ६४
एकेनाप्यर्थिना बहुसाध्यनिर्देशो युगपन्न कर्तव्यः। कालभेदेन तु कर्तव्यः ६५
पूर्ववादिनो नियमाः ६५
अप्रगल्भे वादिनि निर्णये कालदानम् ६६
कालदानेऽवकाशेयत्ता ... ६६
पूर्वपक्षस्य चातुर्विध्यम् ... ६६
शोधितस्यैव पूर्ववादस्य पत्रे विलेखनम् ६७
उत्तरदर्शनात्पूर्वमेव पूर्ववादशोधनम् ६७
हेयादेययोः पूर्वपक्षयोर्विवेचनम् ...६७

इति प्रतिज्ञापादविवरणम्।

अथोत्तरपादनिरूपणम्।

पूर्ववादिसमक्षं श्रुतार्थस्य लेखनम् ६८
उत्तरदानप्रकारः ६८
उत्तरे स्वतः प्रवृत्त्यभावेऽन्येन दापनीयम् ६८
उत्तरलक्षणम् ६९
सहसोत्तरं दातुमसमर्थे कालदानम् ...६९
कालदाने दिनमर्यादा ७०
कालदानावधिव्यवस्था ... ७०
कालदानस्य विषयः ७१
कालदानार्हाणि ऋणादीनि ... ७१
कालदानेऽनर्हाणि ७१

विषयाः पृष्ठं

उत्तरस्य चत्वारो भेदाः ...७२
तत्र मिथ्यादीनां स्वरूपम् ... ७२
मिथ्योत्तरस्यावान्तरभेदकथनम् ... ७३
उत्तराभासकथनम् ७३
अप्रसिद्धादीनामुत्तराभासानां विवरणम् ७३
संकराख्य उत्तराभासः ...७७
मिथ्याकारणोक्तयोः संकरे विचारः ७७
कारणप्राङ्न्यायसंकरे प्रत्यर्थिन एव क्रियाद्वयम् ७७
मिथ्योत्तरकारणयोर्यौगपद्ये विचारः ७८
मिथ्याप्राङ्न्यायसङ्करे कारणप्राङ्न्यायसंकरे च योजना ...७९
निरुत्तरे प्रत्यर्थिनि दिनावधिः ... ८१
हीनवादिलक्षणम् ८१
हीनवादिनो वैशद्येनोक्ताः ...८१
हीनवादिनश्चातुर्विध्यम् ...८२
हीनत्वे कालावधिः ८२
दैविकादिविघ्नेन कालातिक्रमे नापराधः ८२
हीनवादिनो दण्डेन पुनर्वादाधिकारः ८२
अन्यकृतविवादविषये हानिर्नेति कथनम् ८३
हानिर्नेत्युक्तस्यापवादः ...८४
वादोपक्रमोत्तरं निवृत्तयोरुभयोरपि दण्डः ८४
अवश्चनया प्रशान्तानां न दण्डः ...८५
अर्थिप्रत्यर्थिनोरभियोगे नियमः ८५

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

विषयाः पृष्ठं

